N.A.
Shaivaratnakar
शैवरत्नाकर
Sanskrit
Handwritten on paper
N.A.
152 (Folio No. 1 missing)
13.5"x5.2" very bad condition
Incomplete

यांतदानीं तमपाहरन् ॥१७॥ तस्मिन्काले सपूतात्मा भगवान्नाहिलः प्रभुः ॥ स्वदेहमेव
धूपाग्नौ वर्पयामास निश्चलः ॥१८॥ तस्मिन्क्षणे देववरः प्रसन्नः सोरा ष्ट्र नाथः करुणा
स नाथः ॥ तद्रूपपात्रेण सह स्वभक्त्या निनाय कैलासमथो हि लेशं ॥१९॥ तत्संप्रदायवि
ख्यातः सकलागमतत्त्ववित् ॥ शिवदेवमहायोगी चास्ते स्म धरातले ॥२०॥ अणिमादि
महासिद्धिमणिराशिमहार्णवः ॥ शिवपंचाक्षरीसिद्धस्त्रिकालज्ञः समाधिमान् ॥२१॥
पत्रे पंचाक्षरीवर्णान् शिवमंत्रस्य संयमी ॥ यायामार्थयते विद्यां प्रकाशयति तत्र तां
॥२२॥ तस्य शिष्यवरो जातो धरणीधरसंयमी ॥ तत्प्रसादोदितो शेषः विशेषज्ञानवि
श्रुतः ॥२३॥ वेदवेदांतसिद्धांतवेदि सर्वागमाकरः ॥ शिवभावैकनिरतो वितरेतरभा

वतः॥२४॥सकदाचिन्महातेजाश्रीशैलोत्तरदिकृतटे॥क्षेत्रंमहेश्वरंमाघ्यपंचरात्र
मुवासहि॥२५॥नियमेनुस्थितेतस्मिन्तत्रश्रीधरणीधरेक्वचित्समाधिवेलायांशि
वदेवगुरुस्वयं॥२६॥दर्शयित्वानिजंरूपंइहेकास्तिमहाशिला॥तदंतर्लिंगरूपेण
स्थितमुद्धृत्यमांमुने॥२७॥प्रतिष्ठापयतत्रैवसुत्तवानंभुविमुक्तिदः॥सतथेति
प्रतिज्ञायतत्रस्यानाभिमांतथा॥२८॥कथयन्तत्रतैःसाकंतांदृष्टंतत्स्थलेशिलां॥
भित्वातल्लिंगमुद्धृत्यसजन्मंगलमव्ययं॥२९॥दृष्ट्वासानंदपुलकस्तुष्वागद्गदयागि
रानत्वासंपूज्यजानीयप्रतिष्ठाप्यविधानतः॥३०॥प्रासादमटपद्वारमाकारादीनका
रयेत॥विरचैश्यापरंतत्रशिवदेवहराह्वयं॥३१॥गीतवादि[illegible]नृत्यादिविभवै

सं

र्विविधोत्सवैः॥ अर्चयन् शिवदेवेशमवसत्तत्र सुव्रती॥३१॥ वृ॥ वैशाख्याधरणी
धरोमुनिरसौप्रत्यब्दमसादरान्नैवेद्यमहितं ददातिशिवदेवेशायतस्मैसच॥भु
क्तातत्कलिकारुचोश्यविभुनादत्तंयथानृकृते गीतैर्नृत्यतिनादृगत्रमहिमातस्यैव
भातिप्रभोः॥३३॥ तसुत्रमथ्ययसुधामणिमेवकार्यप्वादिश्यतत्रशिवदेवमुपास
मानः॥वाग्हृरदर्शनमुखाखिलसिद्धिसिद्धिस्तामथ्युवासनगरंधरणीधुरिंद्रः
॥३४॥ एवमेषतपःकुर्वन्मुनिर्वर्षशतावधि॥अंतेसमाधिमविशन्महायोग
समाधिना॥३५॥ तस्मिन्मुनींद्रे धरणीधरायसमाधिनिष्ठेतनयोप्यदेनं॥यथा
पितातच्छिवदेवलिंगंभजन्वहाँखिलपौरकार्यं॥३६॥ मल्लिनाथशिवदेवनामको
तत्सुतोगुणनिधीबभूवतुः॥तत्रजेष्ठतनयोप्यवष्टतनमायर्येयोगनिमग्नमान

सः॥३७॥द्वितीयपुत्रः शिवदेवधीमणिः संगीतसाहित्यसकलाविलासितः॥तदन्वयां
भोधिनिपूर्णचंद्रमाबभौ जगन्मोहनमूर्तिचंद्रमः॥३८॥तन्मंत्रयोगहठयोगलयाख्य
योगश्रीराजयोगाविदितःपरमार्थयोगीवेदी॥भूलोकपावनसमागतशंभुमूर्तिः
सत्कीर्तिपूरयतिपूर्णजगत्करंडः॥३९॥वाक्सिद्धिदूरश्रवणेक्षणाभ्रजलानले
३ स्तंभनवादवश्यैः॥ज्योतिःप्रकाशममुरैवरनेकैःमसिद्धमागच्छिवदेवयोगी॥
भुक्ताप्राणितलोपशोवितरणंचिनुस्य देवोः॥४०॥पुराभूतव्रातविधानसंभ्रमवशा
द्वित्तायपश्चात्सुधीः॥सर्वज्ञेशिवदेवसंयमिवरे रम्यकृपालोन्यदान्नोचेत्तस्यमहा
त्मनो वितरणेतादृक्प्रभावःकुतः॥४१॥व्याघ्रस्यलूतिकाजाले जगस्यविषतंतुषु॥
यावद्बंधोस्तिसंसारे तावन्नास्तिमहात्मनः॥४२॥गुणीकृतमहादोषस्तृणीकृ

लजगत्रयः॥क्षणीकृतमहाकालः शिवदेवगुरुर्बभौ॥४१॥एवमेव खिलान् भोगान्भु
क्त्वांते ससमाधिना॥व्याभिमापपरंज्योतिर्ब्रह्मरंध्रं प्रकाशयन्॥४२॥श्रीशैले कृष्ण
वेणीतटभुवि निहिते योगिनस्तस्य देहं वर्षांते तत्प्रवाहे भ्रमसरति चरितेत तत्तरे भिद्य
माने॥तद्देहेत त्प्रवाहे परिसरति तदाश्वर्ववत्कांतिमत्वं ब्रह्मसारत्वं भ्रमरूपत्वं सक
लजनदृशां तत्र चित्रं चकार॥४३॥शिवदेवगुरुक्षीरसिंधो जातो व्यरज्यत॥सो
मनाथमहायोगी दीपाद्दीपांतरं यथा॥४४॥भक्तानां पालनार्थं प रिहतफणिभस्मास्थि
मालाकमालः श्रीमान्सौराष्ट्रनाथस्वयमिति सुभग गः सोम्यसर्वज्ञमूर्त्तिः॥सोयं विश्वंभरा
यां व्यचरत मुरसोमेश्वरो नामभूत्वा॥नानाभूपालमौलिग्रथितमणिगणोद्दृष्टपादारविं
दः॥४५॥संसारकांतारचरन्जीनानां खेदापनोदायचरन्धरण्यां॥कलानिधिः श्रीगुरु

२
८

सोमनाथोजगामशांतिपरमांयथांते ॥४६॥ शिवदेवाग्रजातस्य मल्लिनाथस्यनंदनो ॥ धरणीधरयोगींद्रज्योतिर्नाथोविरेजतु ॥४७॥ ज्योतिर्नाथः सनाथः सगुणमणिगणैः सर्वशास्त्रागमज्ञोयोगीभोगीवियोगीभवभयदुरितेवीरमाहेश्वरोसौ ॥ निर्मथ्यज्ञानमंथानिखिलशिवपुराणागमादिंदुरंतं ॥ शैवाचाराश्रितानांवितनमकरोत्प्रेवरत्नाकराख्यं ॥४८॥ वीरतंत्रे ॥ शैवसंस्कारिणांशैवज्ञानधर्मविदांसतां ॥ अष्टाविंशतिभेदोक्तंतत्त्वशैवमितिस्मृतं ॥४९॥ कामिकंयोगजंचिंत्यं कारणंत्वजितंतथा ॥ दीप्तंसूक्ष्मंसहस्रंच अंशुमान्सुप्रभेदकं ॥५०॥ विजयंचैवविश्वासंस्वायंभुवमथानलं ॥ वीरंचरौरवंचैवमुकुटंविमलंतथा ॥५१॥ चंद्रज्ञानंचबिंबंच प्रोद्गीतंललितंतथा ॥ सिद्धंसंतानसर्वोक्तपारमेश्वरमेवच ॥५२॥ किरणंवातुलंचैवअष्टाविंशतिसंहिताः ॥

इत्यागमेषु सर्वेषु वेदान्तोपनिषत्सु च ॥५३॥ शाखासु धर्मशास्त्रेषु पुराणेष्वखिलेषु च ॥
इतिहासेषु सूक्तेषु पौरुषेयेषु सर्वतः ॥५४॥ वीरमाहेश्वराचारो तनदुद्धारः मकल्प्यते ॥
श्रीरुद्रभाष्कलाश्वेताश्वतरबृहदारण्यमाध्यंदिनोनिरसकठब्रह्मात्माशिवसंकल्प
सौगर्भकांसायनशुल्ककालाग्निरुद्र ॥ कपालशापीयगालववाजसनेयजाबालके
नेषहंसपवमानकेवल्यबोधायननारायणकांडन ॥ अथर्वशिरः शिखा ॥ पैप्पलिप्पै
सौलननारायणवार्तीतवेयपौंडलि ॥ दुंदुभिदंडिलांगुलि ॥ मांडुकपारक्रम । सुकरावदे
कशाठपरमावदेकरणविद्यावाराहवैजावजरकु ॥ हिरण्यकेशिधेयपशुके यथानवया
ईवेयवैनेयवैधेयचर्वक भ्रवणासुरायणीय ॥ जौतशापायणीय ॥ खल्वरूपाच्यमुद्र
लग्नौब्रह्ल ॥ आश्वलायनदेवचार्षि ॥ संख्यायणीय ॥ मैत्रायणीय ॥ साम ॥ त्वरितवा

१०२
५

सुधायणीय ॥ नारायणीया सत्य स त्याषा डि शौनकीशासबार्हस्पत्य मौंडिकाह्वये तिशा
खोपनिषदादिषु मन्यते ॥ स्मृतयः ॥ ॐ ॥ मन्वत्रि विष्णु हारितयाज्ञवल्क्ययोश
नोंगिरसः ॥ यमापस्तंब संवर्तः कात्यायनबृहस्पतिः ॥ पराशरव्यासशंख लिखितादक्ष
गौतमौ शातातपोवसिष्टश्च धर्मशास्त्रप्रयोजनाः ॥ इत्यादि धर्मशास्त्रेषु मन्यते ॥ ब्रा
ह्मंपाद्मंवैष्णवंचशैवंभागवतंतथा ॥ तथान्यं नारदीयंचमार्कंडेयंच सप्तमं ॥ आ
ग्नेयमष्टमंप्रोक्तं भविष्यं नवमंतथा ॥ दशमं ब्रह्मवैवर्तं लैंग्यमेकादशं तथा ॥ वारा
हं द्वादशं प्रोक्तं स्कंदं दिव्यं त्रयोदश ॥ चातुर्दशं वामनंच कौर्मं पंचदशं तथा ॥ मात्स्यंच
गारुडंचैवब्रह्मांडंचततः परं ॥ इत्यष्टादशपुराणोपपुराणादिषु मन्यते ॥ ॐ
श्रीमद्वीरशैवाचारनिरतैः स्वंदेकनिष्ठापरैः सदा लिंगसंहितेस्तु लिंगपादोदक

प्रसादोपभोगसाधनैः ॥ शिवभक्तैः सकलश्रुतिस्मृतीतिहासपुराणोक्तप्रकारेण ॥ ॐ
श्रीनंदिनाथवीरकवीरभद्रभृंगिरिटिपुष्पदंतभंडाभरणरुंडाभरणदंडपाणिचंडेश्व
र ॥ दारुकरेणुकवीरकर्णविजयकर्णघंटाकर्णरेणुकर्णभीमकर्णशंखुकर्णगोकु
र्णसुकेतुरूपमन्युभृगुदधीचिगौतमादिप्रमथगणैर्मुनिगणैः पुरातनभक्तगणैश्चै
वमनुष्ठित्वात्तवपमपि तेषां मार्गमेवावलंब्य वर्तयंतस्तमेवार्थं तैरेव भक्तैः सार
मुद्धृत्य धीरशैवमार्गावलंबिनां महेश्वराणां सुप्रबोधाय शैवरत्नाकरं वक्ष्यामः ॥
ॐ ॥ अस्मिन्नेव शैवरत्नाकरे वर्णाश्रमधर्म शैवभेद वीरमाहेश्वरभेद शिवाधि
क्यप्रकरण पंचाक्षरमाहात्म्यं च ध्यानप्रकरण उपचारनिर्णय श्रीविभूतिमाहा
त्म्य रुद्राक्षमाहात्म्य गुरुशिष्यलक्षण दीक्षाप्रकरण पंचाक्षरमाहात्म्य लिं

ण्र
६

गोत्पत्ति लिंगलक्षण॥अंतर्यागविधि॥लिंगार्चनविधिसदाचारविधि॥पादोदकमाहा
त्म्य॥प्रसादमाहात्म्य॥सदाचारप्रकरण॥प्राणलिंगस्थल॥जंगमस्थल॥शिवयो
गीश्वरशरणैक्यस्थल॥पात्रदेशकालधर्म॥परोपकारप्रकरण॥माहेश्वरमाहात्म्य
नीसेकविंशत्यध्यायः॥ॐ॥तत्रादौवर्णाश्रमधर्मः॥वायवीयसंहितायां॥श्रीदेव्यु
वाच॥केनवश्यो महादेवमर्त्यानां मंदचेतसां॥ अल्पसत्त्वोल्पबुद्धीनामस्थानाम
कृतात्मनां॥ईश्वरउवाच॥५५॥नकर्मणानतपसानजपैर्नसमाधितः॥नज्ञाने
ननचान्येनवश्योहंश्रद्धयाविना॥५६॥श्रद्धाहेतुस्वधर्मस्यरक्षणंवर्णिनामिह॥
स्ववर्णाश्रमधर्माभ्यांवर्त्तेतेयस्तुमानवः॥५७॥तस्यैवभवतिश्रद्धामयिनान्यस्यक
स्यचित्॥क्षमाशांतिश्चसंतोषःसत्यमस्तेयमेवच॥५८॥ब्रह्मचर्यमथज्ञानवैराग्यं

भस्मसेवनं॥सर्वसंगनिवृत्तिश्चदशैतानिविशेषतः॥५९॥अध्यापनंचाध्ययनं
यजनंयाजनंतथा॥दानंप्रतिग्रहंचेतिकर्माणिब्राह्मण्यस्यषट्॥६०॥अध्याप
नंयाजनंचक्षत्रियस्याप्रतिग्रहः॥रक्षणंसर्ववर्णानांयुद्धेशत्रुविधस्तथा॥दुष्टप
क्षिमृगाणांचदुष्टानांशासनंनृणां॥अविश्वासस्यसर्वेषविश्वासोनृमयोगिषु॥
॥६१॥स्त्रीणांसंसर्गकालेषुचसुरक्षणमेवच॥सदासंचारितेश्चारैर्लोकवृत्तां
तवेदनं॥६२॥सदास्त्रभरणंचैवभस्मकंचुकधारणं॥सज्ञोशिवाश्रमस्थाना
मेषधर्मस्यसंग्रहः॥६३॥गोरक्षणंचवाणिज्यंकृषिर्वैश्यस्यकथ्यते॥६४॥उद्यान
करणंचैवममक्षेत्रेसमाश्रयः॥कपिलाक्षीरपानेनब्राह्मणीगमनेनच॥६५॥
वेदाक्षरविचारेणशूद्रस्यनरकंध्रुवं॥ब्रह्मचर्यवनस्थानांयतीनांब्रह्मचारिणां॥

ध्रु.र.
७

लिंगांगयोर्नां भूयो दिवाभिक्षासने तथा ॥ ६६ ॥ वानप्रस्थाश्रमस्थानां समानमिदमि
ष्यते ॥ धर्मपत्न्यास्तु गमनं गृहस्थस्य विधीयते ॥ ६७ ॥ स्त्रीणां तु भर्त्तुशुश्रूषा ध
र्मो नान्यः सनातनः ॥ मदर्चनं च कल्याणि नियोगो भर्त्तुरस्ति चेत् ॥ ६८ ॥ या ना
री भर्त्तृशुश्रूषां विहाय व्रततत्परा ॥ सा नारी नरकं याति नात्र कार्या विचारणा ॥ ६९
अथ भर्त्तृविहीनायाः वक्ष्ये धर्मं समासतः ॥ व्रतं दानं तपः शौचं भूशय्या नक्तभो
जनं ॥ ७० ॥ ब्रह्मचर्यं सदा स्नानं भस्मना सलिलेन वा ॥ दांतिर्मौनं क्षमा निसं
संविभागो यथाविधि ॥ ७१ ॥ इति संक्षेपतः प्रोक्तो ममाश्रमनिषेविणां ॥ ब्राह्मक्ष
त्रविशां देवि यतीनां ब्रह्मचारिणां ॥ ७२ ॥ तथैव वानप्रस्थानां गृहस्थानां च सुंद
रि ॥ शूद्राणामपि नारीणां धर्म एषः सनातनः ॥ ७३ ॥ आज्ञया सिद्धमखिलं ध

र्ममाश्रमिणामिह॥ ब्रह्मणाकल्पितं पूर्वं ममैवाज्ञापुरःसरं॥ ७४॥ सतुपेता महो
धर्मोबहुवित्त क्रियान्वितः॥ नासंतफलभू यिष्टं क्लेशायाससमन्वितः॥ ७५॥
न शक्यते चेत्त्य: कर्तुमल्पवित्तैर्द्विजातिभिः॥ सुखोपायमथोव च्मी धर्मं काम्या
र्थसाधनं॥ ७६॥ महात्मनामनन्यानां मयि विन्यस्तचेतसां॥ अष्टधा लक्षणं माकु
र्मम धर्माधिकारिणां॥ ७७॥ मद्भक्तजनवात्सल्यं पूजायां चानुमोदनं॥ स्वयमभ्य
र्चनं चैव ममार्थे चांगवेष्टनं॥ ७८॥ मत्कथाश्रवणे भक्तिः स्वरनेत्रांगविक्रिया॥
ममानुस्मरणं नित्यं सर्वदा मयि केलवं॥ ७९॥ भक्तेरष्टविधं चिन्हं यस्मिन्म्लेच्छे
पि वर्त्तते॥ स विप्रेंद्रो मुनि श्रीमान् सयतिः सच पंडितः॥ ८०॥ न मे प्रियश्चतुर्वे
दी मद्भक्त श्वपचोपि सः॥ तस्मै देयं ततो ग्राह्यं सच पूज्यो मम ज्ञया॥ ८१॥ ज्ञा

१२.
१४
श्री

नं ज्ञेयमनुष्ठेयमधिकारोयसाधनं॥ साध्यं चेति षडर्थानां संग्रहः स्त्वेषसंग्रहः॥८२
गुरोरधिगतं ज्ञानं ज्ञेयं पाशः पशुः पतिः॥ लिंगार्चनाद्यनुष्ठेयं मस्सैवाधिकृते
द्विजे॥८३॥ साधनं शिवमंत्राद्यं साध्यं शिवसमानता॥ षडर्थसंग्रहस्या
स्यज्ञानात्सर्वज्ञतोच्यते॥८४॥ ॥इति श्रीशैवरत्नाकरे प्रथमोऽध्यायः॥१॥ श्री
वीरतंत्रे शैवाः सप्तविधा ज्ञेयास्तेषां भेदः शृणुष्व हि॥ अनादिशैवो प्रथमोऽद्या
दिशैवो द्वितीयकः॥१॥ तृतीयस्तु महाशैवश्चतुर्थोऽप्यनुशैवकः॥ पंचमोऽवां
तरः शैवः षष्ठः प्रवर उच्यते॥२॥ सप्तमो ह्यंत्यशैवस्तु शैवानां भेद उच्यते॥ अना
दिशैवो विज्ञेयो ह्यहमेव न संशयः॥३॥ शिव हि जास्तु विप्रेंद्रा ह्यादिशैवा
प्रकीर्तिताः॥ कौशिकः काश्यपश्चैव भारद्वाजोऽत्रिरेव च॥ गौतमश्चैव पंचै

ते पंचवक्त्रे प्रदीक्षिताः ॥ तेषां ऋषीणां वंशे तु जाताश्चैव शिवद्विजाः ॥ ४ ॥ पुनर्दीक्षां न
चार्हंति कर्तव्या चेत्तु निष्फला ॥ उपनीयं च काले तु मंडले पूजयेच्छिवं ॥ ५ ॥ स्तपनं चा
गमं ध्यर्थं कारयेच्च शिवद्विजान् ॥ महाशेवाख्यविप्रास्तु शिवदीक्षासमन्विताः ६
आत्मार्थं वा परार्थं वा शिवदीक्षाविवर्जितः ॥ पूजयेद्यादि विप्रस्तु सर्वे देवलको भवेत्
॥ ७ ॥ विप्रक्षत्रियविट्छूद्रा दीक्षिताश्च विशेषतः ॥ आत्मार्थं यजनं कार्यं न कर्तव्यं प
रार्थकं ॥ ८ ॥ सोमशंभौ ॥ अदीक्षितश्चतुर्वेदी शिवलिंगं यः स्पृशेत् ॥ कल्पकोटि सहस्रा
णि भ्रमति ब्रह्मराक्षसः ॥ ९ ॥ वैदिकैर्भर्गगेहे तु प्रविष्टे स्पर्शने कृते ॥ षड्डोढा नि
विसृज्याथ पुनः पुण्याहमाचरेत् ॥ १० ॥ एते सुलक्षणैर्युक्तो गर्हितः सर्वकर्मसु ॥

स्थिरलिंगेतुयस्तूज्ञां नकुर्वीत कदाचन ॥ ११ ॥ क्षत्रिया अपि वैश्याश्च ह्यनुशैवा इति
स्मृताः ॥ शूद्रो वांतर शैवस्तु उच्यते क्रमशोधुना ॥ १२ ॥ सवर्णा बष्टम ध्यस्वकुलालाः पा
र्श्वकास्तथा ॥ अवरशैवमाख्याता भिदमन्यं शृणुष्वपि ॥ १३ ॥ अन्येषां चैव जातीनां मस्य शैवमिहो
च्यते ॥ वायवीयसंहितायां ॥ शैवैर्माहेश्वरैश्चैव कार्यं मंतर्ब हिः क्रमात् ॥ १४ ॥ शैवामाहेश्वरश्चै
तिनासंत मिहमिद्यते ॥ यथातथान भिद्यंते शैवामाहेश्वरा अपि ॥ १५ ॥ शिवाश्रिते कुयज्ञेषु ज्ञा
नयज्ञरतानराः ॥ माहेश्वराः समाख्याताः कर्मयज्ञरताभुवि ॥ तस्मादभ्यंतरे कुर्युः शैवामाहेश्वरा
बहिः ॥ १६ ॥ बाह्येवाभ्यंतरेवापि यत्र स्यान्मनसोरतिः ॥ प्राग्वासनावशादेव तत्र निष्ठां समाच   श्रीशिव
रेत् ॥ १७ ॥ वहिर्यागोपचारेण देवं देवींच पूजयेत् ॥ अथवांतर्बहिश्चैव पूजयेत्परमेश्वरं ॥ १८ ॥ अथ

वीरतंत्रे॥ ज्ञानगम्यंरहस्यंचवैकैवल्यपदकारणं॥ वीरशैवमितिप्रोक्तं एतल्लक्षणमुच्यते॥१९॥ एकए
वायतेतस्मिन्सर्वस्मिन्जगतीतिहः॥ विशिष्टमीर्यतेयस्माद्वीरइत्यभिधीयते॥ शिवेनकृतसं
बंधंशैवमित्याहुर्तबुधैः॥ उभयोःसंपुटीभावाद्वीरशैवमितिस्मृतं॥२०॥ शैवंतुद्विविधंप्रोक्तंश्रौतम
श्रौतमेवच॥ श्रुतिसारमयंश्रौतंस्वतंत्रमितरंस्मृतं॥२१॥ यतोवाचोनिवर्त्तंते अप्राप्यमनसेतिय
त्श्रुतिस्मृत्यादिवर्त्तित्वादश्रौतमितिगीयते॥२२॥ अयंशैवानुवृत्त्यैवकालेनक्षीणकर्मणा॥ अ
नहंतालभेतत्तुस्वयमेवहिसंभवेत॥२३॥ पूर्वसंस्कारमासाद्यकर्मपाकंपरिक्ष्यच॥ जाति
धर्मानुरोधेनशैवमश्रौतमाचरेत॥ कर्मजास्सर्वदेहेभ्यो विभत्यात्स्य जायते॥ तत्तद्धर्मेस्वजे
न्नोचेत्सुधीरपिविपत्स्यते॥२४॥ ॥इतिश्रीशैवरत्नाकरे द्वितीयोध्यायः॥२॥ ॥ ॥ ॥ श्री
ग्रंथांतरे॥ त्वंविश्वकर्त्तातवनास्तिकर्त्तात्वंविश्वभर्त्तातवनास्तिभर्त्तात्वंविश्वहर्त्तातवनास्ति

हर्त्ता त्वं विश्वनाथस्त्वनास्तिनाथः ॥१॥ तासर्यसंग्रहे ॥ त्वं ब्राह्मणस्त्वदुपधावनमेव कार्यं त्व ब्राह्मणैस्तदितरेण भवे सुपास्याः ॥ त्वं ब्राह्मणे नवरचर्णि निषेवणेन संभाव्ययेन दिवसः प्रवदेम माणं ॥१॥ वातूलतंत्रे ॥ ब्राह्मणः कथ्यते रुद्रः क्षत्रियः कमलोदरः ॥ वैश्यः कमलगर्भश्च शूद्रस्यासाकशासनः ॥२॥ ब्रां ॥ वीरतंत्रे ॥ ब्राह्मणस्य शिवो देवः क्षत्रियस्य जनार्दनः ॥ वैश्यस्य भास्करो देवः शूद्राणां सर्वदेवताः ॥३॥ पाराशरपुराणे ॥ ततो विप्रस्य संबंध शिवेनैव हि युज्यते ॥ संकराः सर्वदेवाश्च वृषलस्तु पुरंदरः ॥४॥ पितामहस्तु वैश्यश्च क्षत्रियः परमो हरिः ॥ ब्राह्मणो भगवान्रुद्रः सर्वेषां घामुत्तमोत्तमः ॥५॥ ब्रह्म भावो पि रुद्रस्य ब्राह्मण्यं नैव हेतुजं ॥ ब्राह्मणो वै सदा लोके ब्राह्मणं चोपधावति ॥६॥ महाब्राह्मणं वं ...र भीमुपधावेन्नचे तरं ॥ सदा महांतमात्मानं विरूपाक्षं द्विजोत्तमं ॥७॥ वातुलतंत्रे ॥ रुद्र एव सदा साक्षाद्ब्राह्मणो

मीशान

शिवरहस्ये चतुर्थांशे दधीचिवचनं॥ मग्धेंदुचूड करुणातरणिं विहाय खद्योतवद्धि धिहरीद्रमुखान्सुरांश्च॥
सेवंति गाढतमसे कविनाशहेतुं मूढा हि ते दृढतरं मृड भक्तिहीनाः॥ ४

ब्रह्मभावतः॥ ब्राह्मणः पठितस्तस्मात् ब्राह्मणो रुद्र एव वै॥ ८॥ प्रजानां पालको राजा विष्णुः सर्वस्य पा
लकः॥ तेन राजा हरिस्तस्मात् स राजा न द्विजोत्तमः॥ ९॥ राजाधिराजः सर्वेषां त्र्यंबकस्त्रिपुरांतकः॥
तस्यैवानुचराः सर्वे ब्रह्मविष्णुपुरोगमाः॥ १०॥ स्कांदे॥ विष्णुसंज्ञाह्यसंख्यातां ह्यसंख्याताः पिता
महाः॥ असंख्याताः सुरेंद्राश्च निस्सरएको महेश्वरः॥ ११॥ व्यासविष्णुसंवादे॥ विष्णुरुवाच॥ ॥ज
गाम शरणं देवं सर्वभावेन शंकरं॥ संसज्य तृणवत्सर्वं ब्रह्मविष्णुदिकं तथा॥ १२॥ यो महादेव
तौ मन्ये नहीनं देवेन दुर्मतिः॥ स कस्साधारणं ब्रूते सोऽत्यजो नात्यजो स जः॥ १३॥ कर्त्ताहं सर्वजग छ्वा
तां मम कर्त्ता महेश्वरः॥ तस्य देवाधिदेवस्य कर्त्ता कोपि न विद्यते॥ १४॥ महेश्वरपदासक्तेः स्थानं
भवति संपदां॥ यथाहं तं दधीचेन विष्णोर्वक्षश्रीयः पदं॥ १५॥ अतत्रमेव वचनं व्यास शृणु मूर्ख
यथार्थवत्॥ यच्छ्रुत्वा सर्वभूतानां शिव एव भवेन्मतिः॥ १६॥ किमत्र बहुनोक्तेन शिवं ध्याये

शै॰व
११

न्छिवंकरंशिवादन्यंसरित्सज्यदेवतंभुक्तिमुक्तये॥१७॥सौरसंहितायां॥सर्वान्देवान्परित्य
ज्ययजेसंचास्यमीश्वरं॥सर्वान्मंत्रान्परित्सज्यजेपसंचाक्षरीपरां॥१८॥शिवमेकंपरित्सज्य
योन्यदेवमुपासते॥तृषितोजान्हवीतीरेकूपंखनतिदुर्मतिः॥१९॥पराशरपुराणे॥विहाय
सांबमीशानंयजंते देवतांतरं॥तेमहाघोरसंसारेपतंतिपरिमोहिताः॥२०॥शिवधर्मे॥महे
श्वरकृतंसर्वंत्रैलोक्यंसचराचरं॥तेकृतघ्नंभविष्यंतियेनभक्तामहेश्वरे॥२१॥दधीचिवी
रभद्रगौतमादिभिः॥दक्षाध्वरादिषुशैवेतरवैदिकानांश्रौतस्मार्त्तानुष्ठानंवाक्यात्रैनैव
पारायत्तंभवतिइतिशिवभक्तिश्चनजायतइति॥पूर्वमेवचनमुक्तंभवति॥यथाक्रममुच्यते॥
किंसासारे॥भवंतिबहुधाविमाविद्याभ्यासेनजन्मना॥आचारेणचनामानितेषांवक्ष्ये
पृथक्पृथक्॥२२॥जातिसंस्कृत्यनुष्ठानसदाचारागमात्मनाः॥पंचैतेसंतियस्यासौस

द्ब्राह्मण इति स्मृतः॥२३॥ विमोक्तः सर्वसंस्कारैराचारेणान्वितः स्वयः॥ शुद्धब्राह्मणदंसस्योक्तं
तिर्विमैरुदाहृतः॥२४॥ वेदमध्यापयेच्छिष्यान्याचारध्यापकस्मृतः॥ वेदशास्त्रश्रुतिह्माती यो
सौमहृ इति स्मृतः॥२५॥ चतुर्वेद धरो योसौ विरित्यभिधीयते॥ एकां शारवामतेधीयः सर्वश्रो
त्रियसंज्ञकः॥२६॥ सषडंगभृतिर्योसावनूचानाभिधानकः॥ कल्पज्ञोऋषिकस्यस्मादभ्रू
णिः सूत्रार्थवाचकः॥२७॥ समस्तश्रुतिमंत्रज्ञो योगाभ्यस्तस्सयोगवित्॥ सदाग्निहोत्रीवी
रारव्यः कविः कार्यं करोति यः॥२८॥ काव्यं करोति यो देवानू मति धर्मायशासनं॥ स विप्रः स
र्कविर्ज्ञेयः पुरस्तादृषिवंशजः॥२८॥ भृत्यर्थं यो द्विजो मर्त्यान्प्रति काव्यं करोति यः॥ सदुष्क
विरिति प्रोक्तो द्विजातिषु कनीयसः॥२९॥ आधानं कृतवान्योसावाप्ताग्निरिति सः स्मृतः॥
सप्ततंतुकृतो येन सोमयाजी स उच्यते॥३०॥ चतुर्दश विप्रवरा योग्याश्रौतक्रियास्वमी॥ एतैः

शै०र०
१२

कृतानिकर्माणिसफलानिभवंतिवै ॥ ३१ ॥ तज्जातोविधवायातुजातोविप्रखलुगोलकः ॥ तथैवो
पपतेर्जातः कुंडाख्योभर्तृयोषिति ॥ ३२ ॥ तथैवजातः कन्यायांविप्रात्कानीनसंज्ञकः ॥ तथैवो
पपतेर्जातः ॥ भवंतिजन्मनाविप्रास्त्रयस्सीगोलकादयः ॥ ३३ ॥ येषांविप्राः कृतसंस्कारानस्युरा
धानपूर्वकाः ॥ कथंचिदप्ययोग्यास्युर्विप्रैस्संस्पर्शनादिषु ॥ ३४ ॥ यत्रैकगोत्रयोर्जातस्त्रिपुं
सोर्यःप्रमादतः ॥ सचंडालइतिज्ञेयोयोग्यश्चंडालजातिषु ॥ ३५ ॥ यस्यांकन्यांचब्राह्मण्यं
जातःसन्यासिनस्सुयः ॥ सचंडालस्तथाविप्रासुव्यवसायसमुद्भवः ॥ ३६ ॥ श्रुत्यानुष्ठानर
हितोयोसोबृवइतिस्मृतः ॥ संस्कारहारिविप्रासस्यस्तवकीर्णहतव्रतः ॥ ३७ ॥ दुःशील
श्चैतत्भिताना(?)ख्यावीरहास्यत्कपालकः ॥ सःकरोतिहिभेषज्यंभृतयेदेवतार्चनं ॥ ३८ ॥
चंडिकाराधनंचैतेत्रयःपांडितसंज्ञकाः ॥ येतेनाचारदुष्टास्स्युरेवंकेचिद्भवंतिहि ॥ ३९ ॥

जन्मनाभावतोभ्रष्टाःपतिताइहृते स्मृताः॥ यःस्वशाखांपरित्यज्यपरशाखांसमाश्रयेत्॥
सशाखारंडइत्युक्तःपतितोयमितिस्मृतः॥ किंतलोवृषलीभर्त्ताग्रामानेचाचदुःकविः॥ ४१॥
सेवकोन्रुपदेवज्ञःषटमीपतिताह्वयाः॥ मगधाधिपःशाकुनीकोदेवानुष्टानविक्रयी॥
४२॥ महापातकीनःपंचनवेतेपतिताह्वयाः॥ सत्राधिकारियोविप्रोन्रपस्यान्यस्यचा
ज्ञया॥ ४३॥ पतितःसतुविज्ञेयःकन्याविक्रयिकस्तथा॥ देवांस्तीर्थेभ्यपानीयकारयि
त्वाचकारुभिः॥ ४४॥ प्रतिमाविक्रयंयोसौकरोतिपतितःस्मृतः॥ जीवनार्थंपर
स्त्रीनिधृत्वातीर्थांप्रयातियः॥ ४५॥ गुरुःपित्रोर्विनाशोपिपतितश्चेतिकीर्तितः॥
अथवास्त्रिभृतांमुख्यभृतयोसहयातियः॥ ४६॥ तीर्थेसपतितोज्ञेयोयस्यकस्य
चिदाज्ञया॥ चंडलादत्सजातेर्वाप्रतिग्रणहातियोद्विजः॥ ४७॥ अज्ञानात्तस्त्रियंगच्छे

शै०र०
९३

सतितः सोपिकीर्तितः॥ ज्ञात्वैज्ञातियो विप्रोगमनं चप्रतिग्रहं॥ ४८॥ गच्छेद्गृण्हीतवा
भुङ्क्तेसद्विज्ञातिर्भवेपति॥ ताम्बूलवादिकांकृत्वातयाजीवतियोद्विजः॥ ४९॥ पतितः
सतुविज्ञेयस्तत्क्रविक्रयिकस्तथा॥ वेश्यामाश्रित्यसतद्द्रव्यमुपजीवतियोद्विजः॥ ५०॥ नि
रंतरमासमेकं ततः सपतितस्मृतः॥ महिषीत्युच्यतेभार्यासाचव्यभिचरेद्यदि॥ ५१॥
तांवीक्ष्य तूष्णिमास्तेयः स तुस्यान्माहिषाह्वयः॥ वेदेभ्यश्चसकर्मेभ्यः पठनात्साठाक
स्मृतः॥ ५२॥ दानकर्मानुपात्रेत्वमेतेषां नहिविद्यते॥ पतितेष्वेषुयद्दत्तंदातादुर्गत
येस्मृताः॥ ५३॥ शूद्रादीनांनमस्कारे योग्यास्युःपतिताअपि॥ तेभ्यःश्रेष्ठाइतिद्वेयाव
हुमानविधावपि॥ ५४॥ अत्रोक्तपतितानेतान्नजातुसद्व्रजणादयः॥ नार्चयेयुरमी
श्रेष्ठायदितेयांतुदुर्गतिः॥ ५५॥ पतितोपिवरोविप्रोनहिशूद्रोजितेंद्रियः॥ कपरित्यज्य

गांदुग्धांखरीं दुग्धवतीं दुहेत् ॥५६॥ स्वस्यायोग्यक्रियायुक्तो यदि शूद्रस्तपश्चरेत् ॥ कृतेते
तपस्तस्यनरकायैवकल्प्यते ॥५७॥ शूद्रं किमपिनेत्रं यो द्विजोगृण्हातियद्यपि ॥ सशूद्र इति
वक्तव्योनतुब्राह्मणसंज्ञकः ॥५८॥ एवंज्ञात्वास्वधर्मेणब्राह्मणोब्राह्मणंयजेत् ॥ ब्राह्म
णानां विशेषेण ब्राह्मणावै गतिर्मतिः ॥५९॥ अनेकजन्मशुद्धानां श्रौतस्मार्त्तानुवर्त्ति
नां ॥ नराणांक्षीणपापानां शिवेभक्तिः प्रजायते ॥६०॥ बहुधाकृतसत्कर्मफलसंक्षीणक
र्मसु ॥ सत्सुशैवीभवेद्भक्तिःपुनरावृत्तिहारिणी ॥६१॥ ततो विषयवैराग्यंवैराग्याज्ज्ञा
नसंभवः ॥ ज्ञानेनहिपराभक्तिः प्रसादस्तदनंतरं ॥६२॥ प्रसादान्मुच्यतेजंतुर्मुक्तः
शिवसमोभवेत् ॥ वेदः साक्षाच्छिवोवेदावेदाध्यायीसदाशिवः ॥६३॥ तस्माद्वेदपरो
परो नित्यं वेदाध्यायिनमर्चयेत् ॥ योनवेत्तिशिवंतत्वं निराभासं निराकुलं ॥६४॥

शै०र० शास्त्रवित्सर्ववेत्तापि चतुर्वेदी पशुस्तु कः ॥ मनुष्येषु च ब्राह्मणो यथा विशिष्टो भवति ॥ त
३४ थादेव निर्वहे महाब्राह्मणः परमेश्वर एव विशिष्टः ॥ ॥ इति श्रीशैवरत्नाकरे तृतीयोऽध्या
श्री यः ॥ ३ ॥ ७ ॥ ८ ॥ ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ श्री
शिवधर्मशास्त्रे। पूर्णमेकार्णवे घोरे नष्टे स्थावरजंगमे ॥ विवादः सुमहानासीद्ब्रह्मवि
ष्णोः परस्परं ॥ १ ॥ अहं कर्ता त्वहं कर्ता चान्यो नेयो जगतः प्रभुः ॥ एवमाह हरिं ब्रह्मा ब्रह्माणं
च हरिस्तथा ॥ २ ॥ तयोर्दर्पापहारार्थं प्रबोधार्थाय देवयोः ॥ मध्ये समुत्थितं लिंगमैश्वरं तेजसं
परं ॥ ३ ॥ ज्वालामालावृतं दिव्यमप्रमेयमनोपमं ॥ योजनायतविस्तीर्णं स्थितं तद्वि
मलं भसि ॥ ४ ॥ ज्वालाभिर्मोहितौ तस्य लिंगस्य सुरसत्तमौ ॥ तथा विस्मयमापन्नौ
पश्यंतावमसाधिपौ ॥ ५ ॥ गतावूर्ध्वमधस्तस्य संप्रधार्य परस्परं ॥ कृतांजलिपु

टोभूत्वा लिंगंतु षष्ठावतु सदा ॥ ६ ॥ नमस्तेज्ञान लिंगाय शिव लिंगाय लिंगिने ॥ नमस्तेमूढ
लिंगायपरलिंगायभोगिने ॥ ७ ॥ जगत्कारण लिंगायजगतांपतयेनमः ॥ आवयोःपतये
निसंपत्तिनांपतयेनमः ॥ ८ ॥ एवंस्तुत्वामहादेवंप्रणम्य शिरसापुनः ॥ ब्रह्मविष्णोसमाप
न्नोभक्त्यापरमयायुभो ॥ जिह्वाचापल्यलोभेन वेदितासिहियन्मया ॥ तत्क्षंतव्यमनोपम्यं कस्त्वांसो
तिमहार्णवं ॥ १० ॥ लिंगमध्येपरंलिंग स्थितंभादेशसंमितं ॥ समाधिस्तांत्रसंपन्नो दृष्ट्वंतोशिवा
त्मकं ॥ ११ ॥ नैवतत्कांचनंरौप्यंताम्रंस्फाटिकमौक्तिकं ॥ लक्षमात्रस्थितंशांतंकेवलंतच्छिवात्म
कं ॥ १२ ॥ तयोस्तुष्टोमहादेवः प्रददौवरमुत्तमं ॥ सृष्टिंकुरुष्वहेब्रह्मन् त्वंपालयजनार्दन ॥ कारण
त्वमनुप्राप्य तत्रैवांतरधीयत ॥ प्रांजलिःप्रणतोभूत्वाब्रह्मविष्णुमतःपरं ॥ १३ ॥ पूर्वंलिंगंसम
भ्यर्च्य पश्चात्कार्याणिचक्रतुः ॥ ब्रह्माब्रह्माक्षरैर्दिव्यैर्लिंगंपूजयतेसदा ॥ १४ ॥ गंधपुष्पादिभिर्नि

संचिस्सुः पूजयते शिवं ॥ तदाम भृति ब्रह्माद्याः प्रतिष्ठाप्य सुरासुराः ॥१५॥ तल्लिंगानुकूलं लिंग
मीडितमुनयः सदा ॥ परं गूढं शरीरस्थं लिंगक्षेत्रमनादिमत् ॥१६॥ यदाद्यमैश्वरं तेजस्तल्लिं
गं पंचसंज्ञकं कल्पांते तस्य देवस्य लीयंते सर्वदेवताः ॥ दक्षिणे लीयते ब्रह्मा वामभागे जनार्दनः ॥
॥१७॥ हृदये चैव गायत्री सर्वे वेदोत्तमोत्तमा ॥ लीयंते मूर्ध्नि वै वेदाः सषडंगपदक्रमाः ॥१८॥ ज
ठरे लीयते सर्वं जगत्स्थावरजंगमं ॥ उत्पद्यते पुनस्तस्माद्ब्रह्माद्यं सचराचरं ॥१९॥ आकाशं
लिंगमित्याहुः पृथ्वी तस्याधिपीठिका ॥ आलयः सर्वभूतानां लयनाल्लिंगमुच्यते ॥२०॥ तस्माल्लिंगं प्र
तिष्ठाप्य सर्वं विश्वोद्भवं ॥ स्थापितं तेन सर्वं स्यात्पूजितं च न संशयः ॥ २१ ॥ अथवा तु लतंत्रे
तत्त्वपटले ॥ लिंगपीठ प्रकारेण कर्मसादारव्य लक्षणं ॥ नादो लिंगमिति ज्ञेयो बिंदुः पीठमुदाहृतं
॥२२॥ नादबिंदुयुतं रूपं कर्मसादारव्यमुच्यते ॥ चत्वारि कर्तुरूपाणि केवलं नादमुच्यते ॥२३॥ लिं

गंशंभुरितिज्ञेयं पीठंशक्तिमुदाहृतं॥ योनिलिंगप्रकारेण जगत्सृष्ट्यर्थकारणं॥२४॥कलासं
योगभावत्वात्कर्मरूपमुदाहृतं॥बिंदुमध्यगतो नादो नादमध्येतुमूर्तयः॥२५॥मूर्त्तिमध्यगतंतत
त्वंतत्वमध्यगतःशिवः॥एतच्छिवमयं लिंगंसर्वतत्वालयंस्थितं॥२६॥लिंगेनजायतेतत्वं
ये जगत्स्थावरजंगमं॥तस्मात्लिंगविशेषेण कर्मरूपमुदाहृतं॥२७॥कर्मोदयाच्चसृष्टिस्यात्कर्मांते
संहृतिर्भवेत्॥एतत्कर्मेशरूपंतुसृष्टिस्थितिलयावहं॥२८॥पंचसादारव्यसंयोगंकर्मसादा
रव्यमुच्यते॥कर्षणादिक्रियायातुसाकर्मेतिनिगद्यते॥२९॥तस्माद्देस्थापनादीनिकर्ममूर्तौ
तुकारयेत्॥अथक्रियासारे॥शिवस्यपूजास्थानानिप्रवक्ष्यामिततःशृणु॥सपीठंशिवलिं
गंयत्तद्बिंबमितिकीर्तितं॥३०॥पूजार्थमुदितोदेशोयोसौस्थलमुदाहृतं॥तत्रापिद्विविधं
बिंबंस्थिरंचरमितिस्मृतं॥३१॥स्वयंभुचकृतंबिंबमितिशास्त्रविचक्षणैः॥स्थिरेचरेवा

शै॰र॰
१६

लिंगार्चा कर्त्तव्या ऽहरहः सदा ॥ ३२ ॥ स्वयंभु विकृते वापि यथालब्धे यथाविधि ॥ लिंगं स्वयंभु
मुद्भूत मदृष्टादियथात्मनि ॥ ३३ ॥ लिंगं यत्तत्स्वयंभुः स्यादुत्तमं भुक्तिमुक्तिदं ॥ ऋषिभिः स्था
पितं लिंगमार्षं यत्तदुदाहृतं ॥ ३४ ॥ देवैः प्रतिष्ठितं लिंगं दैविकं समुदाहृतं ॥ एवं स्थिराख्या
बहुधा लिंगं सर्वत्र तिष्ठति ॥ ५ ॥ तद्भक्तैरपि संपूज्यं तेषामिष्टार्थसिद्धिदं ॥ नवाष्टसप्त हस्तोच्चं लिंगं
स्यादुत्तमं त्रिधा ॥ ३६ ॥ षट्पंचचतुर्हस्तोच्च लिंगं तन्मध्यमं त्रिधा ॥ त्रिद्वेकहस्तमानं यल्लिंगं स्याद
धमं त्रिधा ॥ ३७ ॥ एवं नवविधं लिंगमुत्तमादिप्रभेदतः ॥ ब्रह्मविष्णुकपर्दीशैश्चतुरष्टास्त्रवर्तु
लैः ॥ ३८ ॥ सब्रह्मसूत्रसहितं लिंगं यत्तत् स्थिरं स्मृतं ॥ स्थिर लिंगं स्थिरं यत्र सालयं वाप्यनाल
यं ॥ ३९ ॥ तत्रैव पूजकः पूजां कुर्यात्तच्चतुराननः ॥ स्वयंभुं चकृतं लिंगे चरेति द्विविधं स्मृतं ॥ ४० ॥
नर्मदाजनितं श्रेष्ठं शिवनाभ्याह्वयं तथा ॥ महानदिजं श्रीशैले तीर्थे वापि च संभवं ॥ ४१ ॥ स्वयंभु

लिंगमित्युक्तंभुक्तिमुक्तिफलप्रदं।श्वेतंरक्तंसुवर्णाभंकृष्णंचेतिचतुर्विधं॥४२॥लिंगेविप्रा
दिवर्णानांचतुर्णांक्रमशःस्मृतं॥पीठंतस्यतथाज्ञेयंस्वस्वजातिशिलामयं॥४३॥तदलाभे
नुलोमेनवर्णेनैवाश्मनापिवा॥लिंगस्यादिहमानेनपीठमर्धेनगोमुखं॥वृत्तंवाचतुरस्रंवा
पीठंस्वस्ययथारुचि॥वृत्तंऽमरुगाकारंसपद्ममयकुंभकं॥चतुरस्रमिदंब्रह्मन्पीठमेवंद्वि
धास्मृतं॥४५॥एवंनचेत्स्वजात्युक्तंकृष्णंलिंगमथापिवा॥सर्वेषामेववर्णानांभुक्तिमुक्ति
प्रदंस्मृतं॥४६॥लिंगस्यशिवनाभेतुनहिपीठप्रकल्पनं॥तद्धाधारःशिवेवास्यतत्तुपीठमि
तिस्मृतं॥४७॥स्थिरासनंमध्यनाभिहेमरेखाविराजितं॥स्निग्धंनेत्रप्रियंयत्रशिवनाभि
षुसत्तमं॥४८॥उत्तमंमध्यमंनीचमितिलिंगंत्रिधोच्यते॥त्रिकोणंफलकाकारंश्लक्ष्णांगज
र्जरंमतं॥४९॥कपिलंचापियल्लिंगंतद्गृहस्थोनपूजयेत्॥सुवर्णरौप्यताम्रैश्चरत्नैश्चन

शै०र०
१७

वभिभ्रशं ॥५०॥ स्फाटिकाभ्यां कृतं सम्यग्यत्त लिंगं च रं स्मृतं ॥ अथशिवधर्मशास्त्रे ॥ इंद्र
नीलमयं लिंगं विष्णुः पूजयते सदा ॥ विष्णुत्वं प्राप्यते तेन साङ्गुते कं सनातनं ॥५१॥ ब्रह्मा
पूजयते नित्यं लिंगं शैलमयं शुभं ॥ तस्य संपूजनात्तेन प्राप्तं ब्रह्मत्वमुत्तमं ॥५२॥ मुक्ता
फलमयं लिंगं सोमः पूजायते सदा ॥ तेन सोमासनं प्राप्तं सोमत्वं च ततोज्वलं ॥५३॥ श
क्रोपि देवराजेंद्रो लिंगं मणिमयं शुभं ॥ भक्त्या पूजयते नित्यं तेन शक्रत्वमाप्तवान् ॥५४॥
लिंगं रत्नमयं चारु वरुणोर्चयते सदा ॥ तेन तद्वरुणत्वं हि प्राप्तं वध्यासमन्वितं ॥५५॥ लिंगं
हेममयं कांतं धनदोर्चयते सदा ॥ तेनासौ धनदो देवो धनदत्वमवाप्तवान् ॥५६॥ वसवः कांस्य
कं पुज्यं सर्वान्कामानवाप्नुयुः ॥ नागाः प्रवालजं लिंगं पूज्य राज्यानि लेभिरे ॥५७॥ एवं दे
वाः सगंधर्वाः सयक्षोरगराक्षसाः ॥ पूजयंति सदा कालमीशानं सुरनायकं ॥५८॥ सर्वलिं

३

गमयंलोके सर्वलिंगे प्रतिष्ठितं ॥५८॥ तस्मात्संपूजयेन्नित्यंयदींच्छेत्सिद्धिमात्मनः ॥ तद्यथा

ब्रह्मविष्णुवादिपुरंदरपुरःसराः ॥ सर्वदेवाः सुराः स्वकीयांपदवीमपेक्ष्यलिंगाकारंपरमे

श्वरमेवसदायजंति ॥ तथैश्रीनंद्यादिप्रमथगणाः श्रीरुद्रगणाः पुरातनभक्तगणाश्चमृ

त्युंजयार्थमनश्वरपदप्राप्त्यर्थेत्र्यंबकंयजामहे इतिवचनप्रामाण्यान्मृत्योर्मृत्युरूप

परमेश्वरमेवसदाकालंयजंति ॥ शुकवामदेवसनकासनंदनवसिष्ठागस्त्यादि

मुनीद्राश्चापवर्गापेक्ष्यया ब्रह्मलोकपदान्वेषीरुद्राराधनतत्पराइतिवचनप्रमा

णात्परमेश्वरमेवसदायजंति ॥ गर्भरक्षाश्चसर्वजन्मजरामरणदुःखोपशमना

र्थेपुनःसंसारनिवृत्त्यर्थेयदियोन्याःप्रमुच्यामितंप्रपद्येपरमेश्वरमितिवचनप्रा

माण्याद्योन्याश्चदितिनिष्क्रम्यपरमेश्वरंयजामहे इतिगर्भगताएवंस्मरंतीति ॥ ॐ ॥

शै०र० १८ श्री ब्रह्माविष्णुस्तथाशक्रो लोकपालाश्च देवताः॥ लिंगार्चनरतास्त्वेते मानुषेषु च का कथा॥ हन्यात्क्रु
द्धोपि चाकाशं शंभुः पार्थिवस्यादये त्रिषु॥ स रुद्रो लिंगार्चनं मूढो मुक्त्यर्थैस्त्रितयं वृथा॥५१॥ ॥इति श्री
शैवरत्नाकरे चतुर्थोध्यायः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
क्रियासारे॥ अथ भव्यानि पूज्यानि यानि द्रव्याणि चार्चये॥ तानि तेषां प्रवक्ष्यामि लक्षणानि शृणु क्र
मात्॥१॥ वार्गंधाक्षतपुष्पाणि पात्रपीतांबराणि च॥ यज्ञोपवीततांबूलधूपदीपकसाधनं॥२॥
घंटापंचमहाशब्दा नैवेद्याभरणानि च॥ एतानि पूजाद्रव्याणि प्रोक्तानि चतुराननि च॥३॥ उत्तमं
स्यान्नदीतोयं तटाकांभस्तु मध्यमं॥ कनिष्ठं कूपसलिलं स्थानादिषु यथाक्रमं॥४॥ तत्र स्वादुप
यः श्रेष्ठं लवणांभः कनीयसं॥ मध्यमं मिश्रसलिलमिति वारि त्रिधा स्मृतं॥५॥ सुस्वादुर्वीर्यलाभे
तु मिश्रैरपि च कारयेत्॥ सरक्तं सपंकसाक्षिसविष्णुमुक्तं सजांगलं॥६॥ सोच्छिष्टं सासवं वारि

सशवाभःपरित्यजेत्॥यानिकार्याणिकर्माणिवस्त्रपूतेनवारिणा॥७॥तानिसर्वाणिकुर्वीतदेवता
राधनेसदा॥सिद्धार्थकुसुमंदूर्वाकोष्ठलामज्जकंशशि॥अमूनिचात्रद्रव्याणिपाद्यस्यकथयं
तिषट्॥८॥कुशाग्रतिलसिद्धार्थयवंव्रीहिपयांसिच॥द्रव्याण्यमूनिषट्प्राहुरर्घ्यस्यमुनिपुंग
वाः॥९॥फलंकचोरकर्पूरकोष्ठकाश्मीरकानिच॥अमुन्याचमनीयस्यमेद्रव्याणिप्रवदंतिषट्॥
स्नापनेचरलिंगस्यपंचाढकमितंजलं॥गंधप्रसवकेरत्नमंत्रतोयान्यमूनिच॥११॥एतानि
ताम्रकुंभेषुपंचप्रस्थमितेषुच॥वस्त्रपूतानितोयानिसमापूर्याविनिक्षिपेत्॥१२॥नंदासुभ
द्रासुरभिःसुशीलासुमनास्तथा॥गावःशिवपुरास्त्वंचक्षितिंप्राप्ताःशिवाज्ञया॥१३॥गोमयंरो
चनंमूत्रंदधिक्षीरंघृतंगवां॥षडंगाणिपवित्राणिसर्वसिद्धिकराणिच॥१४॥पयोदध्याज्य
मध्विक्षुरसैर्मूलेनपंचभिः॥ततोगोधुमचुर्णेनधृष्ट्वाकोष्टेनवारिणा॥१५॥स्नापयेत्तं

शै०र० १९

दत्ति सिद्धेर्वा मुद्गचूर्णैरलाभतः॥स्नापयेदथगंधाद्भिः पुष्पाद्भिः स्नापयेदथ॥१६॥स्नापये
थहमाद्भिररत्नाद्भिः स्नापयेदथ॥स्नापयेदथमंत्राद्भिः क्रमेणैवसमाचरेत्॥१७॥शिवधर्मशास्त्रे
घृताभ्यंगेनलिंगस्यदहेत्सर्वंनसंशयः॥कल्पकोटिसहस्रेस्तुयत्पापंसमुपार्जितं॥१८॥
कृष्णाष्टम्यां घृतस्नानंकृत्वालिंगेसकृन्नरः॥कुलैकविंशमुधृत्य शिवलोकेमहीयते॥१९
दशापराधंतोयेनक्षीरेणशतंक्षमेत्॥सहस्रंक्षमतेदध्ना घृतेनाप्ययुतंक्षमेत्॥२०॥
लिंगाभिषेकंयःकुर्याद्वस्त्रपूतेनवारिणा॥समुनिःसमहासाधुःसयोगीचशिवंव्रजेत्॥
२१॥मंत्राष्टशतजप्तेन विमलेनांभसा शिवं॥स्नापयित्वासकृद्भक्त्या शिवलोकेमहीय
ते॥२२॥पारलौसरूपद्मानिकरवीराणिसर्वदा॥स्नानतोयेषुयोज्यानि शिवलोकेमहीय
ते॥२३॥कर्पूरागरुतोयेनयोलिंगंस्नापयेत्सकृत्॥सर्वपापविनिर्मुक्तः शिवलोकेमहीयते॥
॥२४

सितेन भस्मना स्नाप्य भक्त्या लिंगं प्रमोदते ॥ चंद्रांशुनिर्मलः श्रीमान् शिवलोके महीयते ॥
२५ ॥ पट्टुरे वांगचीनादि विचित्राण्यंतराणि वा ॥ सितानि सूक्ष्मवासांसि रक्तानि मित्तिकृ
सले ॥ २६ ॥ कृतशास्त्रोक्तविधिना प्रशस्तानि पितामह ॥ न्यायागतानि नुतानि दकिमयाणि द
दानि च ॥ २७ ॥ अंशुकानि विशुद्धानि प्रशस्तान्युच्छ्रितान्यपि जीर्णं दग्धं धृतं स्थूलं मारवुद
ष्टं सरंध्रकं ॥ २८ ॥ देवस्वं दुःक्रियायुक्तं वस्त्रेष्वेवं विवर्जयेत् ॥ वासांसि सुविचित्राणि सारवंतिमृ
दूनि च ॥ २९ ॥ धूपितानि शिवे दद्यादिकेशानि नवानि च ॥ यावत्तद्वस्त्रतंतूनां प्रतिसंख्यासम
न्वितः ॥ ३० ॥ तावद्वर्षसहस्राणि शिवलोके महीयते ॥ कृतं शास्त्रोक्तविधिना सौवर्णं देवमा
नतः ॥ ३१ ॥ सकालधौतं वै कश्चमुपवीतमिति स्मृतं ॥ अथवा ॥ मृदुशुक्लं सपीतं च पट्टसूत्रा
दिनिर्मितं ॥ दत्वोपवीतं रुद्राय भवेद्देदातिकः सुखी ॥ ३२ ॥ चंदनागरुकर्पूरकुंकुमाद्यनुलेप

शि॰र॰ २०

ने ॥ सत्यान्यमूनि द्रव्याणि नयोग्यानीतराण्यपि ॥ ३३ ॥ गंधानुलेपनात्पुण्यं द्विगुणं चंदनस्य

च ॥ चंदनादगरोर्ज्ञेयं पुण्यमष्टगुणाधिकं ॥ ३४ ॥ कृष्णागरो र्विशेषेण द्विगुणं फलमिष्यते त

स्मा च्छतगुणं पुण्यं कुंकुमस्य विधीयते ॥ ३५ ॥ चंदनागरुकर्पूरैः सूक्ष्मपिष्टैः सकुंकुमैः ॥

लिंगपर्यार्चनं नित्यं शिवलोके महीयते ॥ ३६ ॥ सौवर्णनारकारौप्यं पीठापर्यं धरेत्तु पि॰ शो

भार्थं पंडितरूपेणन्यसेदितरतोपि वा ॥ ३७ ॥ स्वर्णे नवार्थरौप्यैण शुद्धसौराष्ट्रकेन वा ॥ क

लाबुद्बुदवत्सूक्ष्मचषकान् द्वारसंमितान् ॥ ३८ ॥ तानूर्ध्वं द्वितयं कुर्यात् प्रत्येकं सकलान

पि ॥ सूत्रेण प्रोत्समालां वा द्वारस्योपरि बंधयेत् ॥ ३९ ॥ ये षा नक्षत्रमालाख्या करणीया

धनैश्वरैः ॥ अभिन्नाशारवक्लृप्ताः सुस्निग्धा वीहितं डुलाः ॥ ४० ॥ ॥ देव्युवाच ॥ ॥ स्मृ

ताः सुरार्चने योग्याने तराश्चतुराननः ॥ पुष्पैः कति विधैः पूजा कर्त्तव्या कथ्यस्व मे ॥ ४१ ॥ पु

ष्पैरारामसंभूतैः पत्रैर्वा गिरिसंभवैः ॥ अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जंतुवर्जितैः ॥ ४२ ॥
आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेच्छिवं ॥ अर्कारग्वदनीरिजनंद्यवर्तकजातयः ॥ ४३ ॥ क
रवीरबकद्रोणबृहतीनवमालिकामल्लिकोत्पलपुंनागकदंबाशोकचंपकाः ॥ ४४ ॥ सेव
तीकर्णिकाराख्यत्रिसंध्यारक्तकेसराः ॥ सितकांचनदुत्तरं तथा लोहितकांचनः ॥ ४५ ॥ पलाशः पा
टलीत्येषां प्रशस्ताः प्रसवाः स्मृताः ॥ बिल्वापमार्गकश्चूतोरमनोमरवोर्जकः ॥ ४६ ॥ दूर्वातुलशी
कांकोलगौरीसुरभिकाशमी ॥ भृंगीडीकोतारदमनोभृंगारः पारिभद्रकः ॥ ४७ ॥ जंबकुशाग्र
इत्येते प्रशस्ताः पत्रसंग्रहे ॥ पूर्वोक्तकुसुमालाभे पत्रैरेतैः शिवं यजेत् ॥ ४८ ॥ पत्राणामप्य
लाभे तु पुष्पजातिदलैर्यजेत् ॥ विनादुत्तुरनीरेजपलाशोत्पलकांचनात् ॥ ४९ ॥ सनालैः
सदलैः पक्वैः प्रसग्रैर्नयनप्रियैः ॥ पुष्पैर्यथोचितैरेवं विधैराराधयेच्छिवं ॥ ५० ॥ यान्यबद्धा

र॰
१

निपुष्पाणिपत्राण्यपितथैवच॥ता।निदेयाणिमंत्रेणबध्वाशोभार्थं मर्पयेत्॥५१॥पट्टदेवांगचीना
नांसूत्रंचतदलाभतः॥कार्पासंपुष्पसंदर्भ्ये स्यानेचोद्दस्कलंतुवा॥५२॥पुष्पजातिविशेषेण
भवेत्पुण्यंततोधिकं॥अर्कस्यपुष्पमेकंतुशिवाय विनिवेदयेत्॥५३॥तपःशीलगुणोपेताय
त्रैवेदस्यपारगे॥दशदत्वासुवर्णानियत्फलंतदवाप्नुयात्॥५४॥अर्कपुष्पसहस्रेभ्योकरवी
रं विशिष्यते॥करवीरसहस्रेभ्यो बिल्वपत्रंविशिष्यते॥५५॥बिल्वपत्रसहस्रेभ्योपद्ममेकंवि
शिष्यते॥अथपद्मसहस्रेभ्योबकपुष्पंविशिष्यते॥५६॥बकपुष्पसहस्रेभ्यएकंदुत्तुरकंपरं॥
दुत्तुरकसहस्रेभ्योबृहत्पुष्पंविशिष्यते॥५७॥बृहत्पुष्पसहस्रेभ्योद्रोणपुष्पंविशिष्यते।द्रोण
पुष्पसहस्रेभ्योह्यपामार्गंविशिष्यते॥५८॥द्रोणपुष्पसहस्रेभ्योह्यपामार्गंविशिष्यते॥॥
अपामार्गसहस्रेभ्योकुशपुष्पंविशिष्यते॥कुशपुष्पसहस्रेभ्यःशमीपुष्पंविशिष्यते॥५९॥श

मीपुष्पसहस्रेभ्यः श्रीमन्नीलोत्सलं परं ॥ नीलोत्सलसहस्रेभ्योमल्लिकैकाविशिष्यते ६०॥
नीलोत्सलसहस्रेण योमालां संप्रयच्छति शिवाय विधिवद्भक्त्या तस्यपुण्यफलं शृणु ॥ ६१॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ विशेच्छिवपुरे श्रीमान् शिवतुल्यपराक्रमः ॥ ६२॥
करवीरसमाज्ञेयाजाति विजयपाटला ॥ नागचंपकपुन्नागद्रुत्तुरकुसुमाःस्मृताः ॥ ६३॥ श्वेतमं
दारकुसुमं सितपद्मसमंभवेत् ॥ कनकानि कदंबानि रात्रौदेयानि शंकरे ॥ ६४॥ दिवाशेषाणि
पुष्पाणि दिवारात्रौतुमल्लिका ॥ प्रहरं तिष्ठते जाती करवीरमहर्निशं ॥ ६५॥ बिल्वपत्रैरखंडैश्चस
कृल्लिंगं प्रपूजयेत् ॥ सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥ ६६॥ पुष्पाणामप्यलाभे तु पत्राण्य
पि निवेदयेत् ॥ पत्राणामप्यलाभे तु फलान्यपि निवेदयेत् ॥ ६७॥ फलानामप्यलाभे तु तृण
गुल्मौषधैरपि ॥ औषधीनामलाभे तु भक्त्याभवति पूजितः ॥ ६८॥ केतकीजातिमुक्तंच

कुंदायुधिकदंबकाः॥शिरीषसर्जबंधूककुसुमानि विवर्जयेत्॥अंकोलपत्रकुसुमकरंजेंद्र
तरूद्भवं॥६९॥वैभीतकानिपत्राणिकुसुमानि विवर्जयेत्॥गंधहीनमपिग्राह्यंपवित्रंयत्कु
शादिवत्॥७०॥गंधवत्सपवित्राणियानितानि विवर्जयेत्॥सदुग्धकंटकैःपत्रैर्जलजैरपि
नार्चयेत्॥७१॥अत्रोक्तपत्रपुष्पाणि छित्वातैर्नशिवंयजेत्॥कीटकैरपि विद्धानिजी
र्णपर्युषितानिच॥७२॥स्वयंपतितपुष्पाणित्यजेदुपहतानिच॥मुकुलैर्नार्चयेद्देवमपक्वंन
निवेदयेत्॥७३॥फलंकुसितविद्धंचयत्तस्यकमपित्यजेत्॥अज्ञानज्ञानतोवापि वि
रुद्धकुसुमार्चनं॥७४॥आत्मार्थेवापरार्थेवातत्सर्वंनाशमाप्नुयात्॥मल्लिकोत्पलप
द्मैश्चजातिपुंनागचंपकैः॥७५॥अशोकश्वेतमंदारकर्णिकारबकैरपि॥करवीरा
र्कमंदारशमीनागरकेसरैः॥७६॥कुशापमार्गकुसुमैःकदंबद्रोणकैरपि॥पुष्पैरन्यै

र्यथालाभंयोनरःपूजयेच्छिवं॥७७॥सयत्फलमवाप्नोतितद्देकाग्रमनाशृणु॥सूर्य
कोटिप्रतीकाशेर्विमानैःसर्वकामिकैः॥७८॥पुष्पमालापरिक्षिप्तैर्गीतवादित्रनादि
त्रनादितैः॥तंत्रीमधुरवाद्यैश्चस्वछंदगमनालसैः॥७९॥रुद्रकन्यासमाकीर्णैर्देवदा
नवदुर्लभैः॥दोधूयमानैरमरैस्तूयमानःसुरासुरैः॥८०॥गच्छेच्छिवपुरंदिव्यंमत्र
वारुचिरंभवेत्॥लैंगे॥गवांकोटिप्रदानेनविधियत्तेनयत्फलं॥लिंगेन्यस्तैककस्यपुष्प
स्यसाहस्रांशंनपूरयेत्॥८१॥योदद्यात्कांचनंमेरुंसस्यपूर्णवसुंदरां॥लिंगेनास्तैकपु
ष्पस्यसहस्रांशंनपूरयेत्॥८२॥मातापितृसतिविप्रभ्रातृगोसंचितोवधः॥सर्वपातक
संहारमेकपुष्पंशिवार्चनं॥८३॥जलंवापुष्पमेकंवालिंगस्योपरिनिक्षिपेत्॥अमंत्रो
1·1 वासमंत्रोवाकुलकोटिंसमुद्धरेत्॥८४॥किंचिद्दलंवाचुलकोदकंवादेवेंद्रलक्ष्मीर

शै शैरन-
२३

दासि॥आदानदानेजगदेकबंधोमुग्धोभवान्सर्वविदेवदेवा॥८५॥तत्रादिमात्रंतुयोरद्या
देवलिंगस्यमूर्धनि॥इंद्रस्यार्धासनंतावद्यावदिंद्राश्चतुर्दश॥८६॥यःकुर्याच्चशिवाराम
माशुबिल्वादिशोभितं॥यावत्तसत्रदेवार्थकुसुमबीजपूर्णफलानिच॥८७॥तावद्वर्षस
हस्राणिशिवलोकेमहीयते॥ॐ॥देवार्थमेकपात्रंतुपुष्पादिद्रव्यसंचयं॥८८॥सौवर्णरज
तंताम्रमितिपात्रंत्रिधास्मृतं॥सार्धमस्छभितंपात्रमर्घ्याद्याखिलकर्मसु॥अर्घ्यादीनांत्रि
पात्राणांसामान्यक्षालनात्रयत्॥८९॥शंखस्वर्णादिपात्राणांस्पृष्टिदोषानविद्यते॥दारुम्
सात्वयोरस्तिस्पृष्टिदोषोसजातिभिः॥९०॥देवालत्रयेकोछिपुंजनात्शौचादिगर्हतात्॥
अस्पृस्याद्दारुमृत्स्पृशेमीभिर्यदिसंत्यजेत्॥९१॥कांस्यपात्रमपिद्रोममलाभेमृण्मयंतु
वा॥अर्घ्यादीनांनयोग्यानिभिन्नापात्राणिजातुचित्॥९२॥अभिन्नानिविशुद्धानिपात्रा

ण्यैवभवेत्तिहि ॥ ताम्रस्फाटिकशंखेषुसुवर्णकलधौतयोः॥९३॥नविद्यतेभिन्नदोषोद्र
व्येषन्नेषुविद्यतेशंखः शुद्धोभवेत्तत्र तृषेभ्यो घर्षणेनच ॥ आम्लेनताम्रकंभूसाकांस्यं
चूर्णेनपित्तलं॥९४॥पलालमप्यान्नीहीणांपात्रेपित्तललोहके ।।संघर्षयेद्विशुध्यार्थंकांति
मसरणायच॥९५॥चत्वार्येतानिपात्राणिवारिणाजलयेत्ततः॥ रेरूप्यशैलाःशुद्धास्युःके
वलंक्षालनाज्जलैः॥९६॥पात्रंगोकर्णवत्कुर्यात्तद्धनंतिलमात्रकं॥येषामलाभेपात्राणांनारि
केलकपालकं॥९७॥सुवर्णरजतंताम्रंकांस्यंलोहंचपित्तलं॥चरार्चनार्थंकुर्वीतपीटमेतेश्च
तुर्मुखं॥९८॥खदिरोमधुकोश्वत्थः पूक्षःसुरमहीरुहः॥उदुंबरःपीतसारोन्यग्रोधोथविकं
कतः॥९९॥जंबूकदंबवकुलबिल्वपुंनागचंपकाः॥पालाशःपाटलीचूतःकर्णिकारश्चकांच
नः॥१००॥येतेद्रुमाप्रशस्तास्युःपीठकर्माणिवाविधे॥सर्वेषामेवरक्षाणांप्रशस्तोरक्तचंदनः॥

शै०र०
२४

तेनपीठंकृतंश्रेष्ठंचरलिंगसमर्चने॥चतुरश्रंचचतुःपादंपूर्ववच्चोक्तविस्तरं॥२॥पुपर्यधः
समाकारंयत्तद्भद्रासनंस्मृतं॥विशिष्टेपीठंचयंच्छ्रेष्ठंकारंयित्वेक्षणंप्रियं॥३॥पूर्वोक्तविस्तरा
यामंवृत्तंडमरुगाकृतिः॥३॥परितःपद्मवत्कस्यंयत्तत्पद्मासनंस्मृतं॥विशिष्टेषुपीठंयच्छ्रेष्ठंका
रयित्वेक्षणप्रियं॥चरलिंगस्यपूजार्थंतद्गृण्हीयात्पितामह॥ ॐ॥धूपः॥कालागरुगं
धसारोगुग्गुलुश्चसितागरुः॥लाक्षाविल्वफलंसर्पिर्मधुसर्जरसःशशी॥साधनानिद
शैतानिधूपस्यचतुरानन॥४॥चंदनोभयकोष्ठंचनरवसर्जःकचोरकः॥एतद्गुडसमानेनधू
पंभवतिचोत्तमं॥५॥शर्कराननरवगंधंचजटामांसिलघुःसमं॥क्षौद्रेणसहसंमिश्रंधूपंभवति
चोत्तमं॥६॥वृ॥अगरुतगरुकुष्ठंशैलजंशर्करास्यादुभयघनपुरस्तात्त्चंदनेलाश्चसाक्षात्॥
लचनरवरमुसिरंमांसिकर्पूरताालि॥सरुदजलकचोरंजातियुग्धूपराजः॥७॥कृष्णागरु

सकर्पूरं धूपं दद्यान्महेश्वरे ॥ नैरंतर्येण यो मासं तस्य पुण्यफलं शृणु ॥ ८ ॥ कल्पकोटि सहस्राणि

कल्पकोटिशतानि च ॥ भुंक्ते शिवपुरे भोगानंते स महीपतिः ॥ ९ ॥ गुग्गुलं घृतसंयुक्तं सा

क्षाद्गुण्हातिशंकरः मासार्धमात्रदानेन शिवलोके महीयते ॥ १० ॥ कृष्णपक्षचतुर्दश्यां यः साक्षा

द्गुग्गुलं दहेत ॥ अपराधसहस्रेकमिहापुत्रकृतं क्षमेत् ॥ ११ ॥ प्रियश्च गुग्गुलुर्नित्यं समाज्ययुक्तो

विशेषतः ॥ दशसहस्रफलानां तु महिषाक्षश्च गुग्गुलः ॥ १२ ॥ ध गध्वागवाज्यमिश्रं तु शिवसा

म्यः प्रजायते ॥ देवदारुनमेकं च सर्जश्रीवासकुंदुरुं ॥ १३ ॥ श्रीफलं चाज्यसंमिश्रं दग्धाद्रोति

परं प्रियं ॥ येभ्यः सौगंधिकं ५ धूपं षट्सहस्रगुणोत्तरं ॥ १४ ॥ अगुरं दशसाहस्रं द्विगुणं चा

सितागरुं ॥ हेमरौप्येन तांम्रेण रीसो लोहेन वापि च ॥ १५ ॥ धूपपरीपपात्रे द्विकारये सहलक्षणे ॥ धूप

पात्रोन्नतं सर्वं ससाष्टांगुलकं स्मृतं ॥ १६ ॥ पात्रे डमरुगाकारं सपिधानं सनालकं पादपात्रं मुरवंघ्या

समानंचतुरंगुलं ॥ द्व्यंगुलं तयोस्तुंगं तन्मध्यग्रीवमंगुलं ॥ एवंडमरुगाकारं ग्रीवनालं प्रकल्पये
त् ॥ १८ ॥ नालायतं नालमात्रं मणिशिखरभूषितं ॥ ऋजुं वा कुटिलं वापि यथाशोभं तु कारयेत् ॥ १९ ॥
व्यासोन्नतं पिधानस्य पात्रवत्परिकल्पयेत् ॥ पादांगुलं तदूर्ध्वे तु शेषं च शिखरं घनं ॥ २० ॥ पात्र
पादं पिधानं च सर्वं चषकवत् स्मृतं ॥ घनं तस्य समस्तस्य यवमात्रं प्रकीर्तितं ॥ २१ ॥ पिधाने धूपनि
र्गत्यै रंध्राणि विदधीत षट् ॥ लक्षणं धूपपात्रस्य समाख्यातं चतुर्मुख ॥ २२ ॥ सार्धं तु त्र्यंगुलं व्या
सं पात्रस्यार्धांगुलोन्नतं ॥ तस्यांघ्रिविस्तरो सेधं तदूर्ध्वे कांगुलांगुलं ॥ पिधानशिखरं नालं च
नं रंध्राणि पूर्ववत् ॥ एवं च कारयेद्बुध्या धूपपात्रं तदुत्तमं ॥ २४ ॥ पात्रस्यैवं विधस्यास्य खलाभेम्र
ण्मयं तु वा ॥ कर्पूरो घृतवर्तिश्च द्वितयं दीपसाधने ॥ २५ ॥ २५ ॥ ॐ ॥ दीपः ॥ उत्तमं कपिलास
र्पिर्मध्यमं शुभ्रगोघृतं ॥ अन्यागोसर्पिरधममिति त्रिविधमीरितं ॥ २६ ॥ घृतदीपप्रदानेनाशि

वायशतयोजनं ॥ भूम्यंतं लभते मर्त्यो विमानं सूर्यसप्रभं ॥ २७ ॥ यः कुर्यात्कार्त्तिके मासे शोभनं दी

पमालिकां ॥ कृष्णपक्षे चतुर्दश्यां ममावास्या दिने पिवा ॥ २८ ॥ सूर्यायुत प्रतीकाशस्तेजसाभास

यन्दिशः ॥ तेजोराशि विमानस्थः कुलमुध्दृत्य सर्वदा ॥ २९ ॥ यावत्प्रदीप प्रस्थानं धृतेना पूर्य

बोधितं ॥ तावद्युग सहस्रेण रुद्रलोके महीपते ॥ ३० ॥ दीपवृक्षं समुत्थाप्य शर्वस्यायतने शुभं ॥

पूर्वस्माद्द्विगुणं पुण्यं लभ्यते नात्र संशयः ॥ ३१ ॥ कार्पासवर्तिं कृत्वा च गवाज्येन प्रदीपयेत्

उन्नतं दीपपात्रस्य समस्तं सषडंगुलं ॥ ३२ ॥ सार्धांगुलोन्नतं पीठं नालं सार्धांगुलद्वयं ॥ शि

खरद्व्यंगुलं चैव वक्रमादुच्च षडंगुलं ॥ ३३ ॥ तत्सात्र पीठ विस्तारमुदितं चतुरंगुलं ॥ पात्रं पंचांगुलं व्यासं तद्धनं य

वमात्रकं ॥ ३४ ॥ पात्रांतः परितो दीपस्थानान्यष्टौ प्रकल्पयेत् ॥ दीपसंच पात्रं स्यादिमन्यदिहोदितं ॥ ३५ ॥

चतुरंगुलमुत्सेध नालं साष्टांगुलं स्मृतं ॥ दंडस्यार्धे गले पात्रं पादव्यासमंगुलं ॥ ३६ ॥ स्वर्णादिषु य

शै०र०
२६

थालब्धेपात्रेमेषामलाभतः ॥ व्रीहिपिष्टस्थितान्दीपानपिवासंप्रदर्शयेत् ॥ ३७ ॥ एवंयथा
वत्कथितंदीपपात्रस्यलक्षणं ॥ ॐ ॥ घंटालक्षणं ॥ दंडाग्रस्वत्रिशूलाचदुत्तूरकुसुमोपमा ॥
यासासोराष्ट्रिकमयीघंटाततःकोणसंमुता ॥ ३८ ॥ आयतंघंटिकायास्तुप्रोक्तमंगुलपं
चकं ॥ तद्वन्मुष्टिप्रमाणंस्यात्कटकद्वयसंयुतं ॥ ३९ ॥ तदूर्ध्वेत्र्यंगुलमितंविदधीत
त्रिशूलकं ॥ तस्यायतनविस्तारंषडंगुलमितिस्मृतं ॥ ४० ॥ घंटायाःसकलंदैर्घ्य
मंगुलानांत्रयोदश ॥ एवंनेत्रप्रियांघंटांमांधुमानेतुकारयेत् ॥ ४१ ॥ अकेथेहू नैव
कहू ॥ ककहूःपरहूःशंखोभेरीचजयघंटिका ॥ ४२ ॥ एतेपंचमहाशब्दामंगल
ध्वनयःस्मृताः ॥ सुवर्णरौप्यताम्रेषुपथालध्वेनसंयुताः ॥ ४३ ॥ स्तोकमानंदुंसेत्तूरपुष्पव
त्कहलाकृयः ॥ सधंगुलंचतुस्तालमायतंकाहूलस्यतु ॥ चतुरंगुलविस्तारंस्यादस्यानन

वर्त्तुलं ॥४४॥ मस्तंगुलं तदानाहमनुरुच्छुलं तदाहितः ॥ तथैव विस्तरं तस्य यथा शोभं तु कारयेत् ॥४५॥ पंचांगुलद्विकारं तु दीर्घं चिन्नाहि यस्य तत् ॥ सार्धत्र्यंगुल विस्तारस्तस्य स्यादास्य वर्तुलं ॥४६॥ अन्यत्सर्वं यथापूर्वं वितलं कहलालकं ॥ एवं लक्षणमाख्यातं सम्यक्काहलचिन्हये ॥ ४७॥ ॐ॥ पटहः ॥ आसनं खदिरः श्रेष्ठ वपि वारक्तचंदनं ॥ त्रयोमी पटहस्योक्तास्तनखो वाद्यवेदिभिः ॥४८॥ पंचताल समाख्यातमायतं पटहस्य तु ॥ द्विताल मध्यम स्थूलं ताल मात्र मुखद्वयं ॥४९॥ सचर्मणा समाच्छाद्य मुखयुग्मं यथा दृढं ॥ कर्णो सटहके हेतु स्तत्तत्काले शु ताडयेत् ॥५०॥ शंखः ॥ गोक्षीरधवल स्निग्धो दीर्घनालो बृहत्तनुः ॥ वृत्तोयो दक्षिणावर्त्तः सोऽब्धिजः शंखसंज्ञकः ॥५१॥ पूर्वोक्तलक्षणोपेतो मो वावर्त्तो यथोऽब्धिजः ॥ शंखो यं सो पि शुलभा पूर्वोक्तो

शै०र०
२७

तीवदुर्लभः॥५२॥शंखश्चरयस्य लतानाहं यावत्तावत्तत्राय तं स्मृतं॥तस्यार्धे नालके यस्य
सशंखः श्रेष्ठ उच्यते॥तदर्धमावर्तो यस्याः शंखो भवति मध्यमः॥शंखोयमितरोलब्धः स
कनिष्टः प्रकीर्तितः॥५४॥भिन्नः क्लिन्नः किमिहतोरक्तः सरंध्रः कश्मलश्छविः॥ह्रस्वना
लः सशंखोयोनयोग्यो नादकर्मणि॥५५॥ ॐ॥अथ दुंदुभिः॥दुंदुभिर्हि विधा
प्रोक्ता स्थावरा जंगमेति च॥नाहार्या स्थावरे केनयाहार्या जंगमा स्मृता॥खदिरः पी
तसारश्च शिरीषो रक्तचंदनः॥५६॥मधुकोरिष्टकश्चेति षड्वृक्षा दुंदुभेः स्मृताः॥
आयामं सप्ततालस्या संचतालं तु विस्तरं॥मुखत्रितालवि स्तारं मुखस्य घन
मंगुलं॥शेषं तद्व्यंगुलं घनमन्यत्सर्वं बिलं॥ बहिः॥५७॥सरक्तं लोहपट्टेन मु
खमध्यानि वेष्टयेत्॥मुखस्य परितः सप्त न्यसेत्कीलानयोमयान्॥५८॥मुखं

स्वर्मणा छाद्य तत्वस्तूत्रेण वेष्टयेत् ॥ यथा कथं समाख्यातं लक्षणं स्थिरदुंदुभे ॥ ६०॥ ई
दृग्दंडविनिर्घोषशंभोः प्रीतिकरं सदा ॥ षट्तालमथवा तालं तालाष्टांशत्रियंशकैः ॥
चतुस्तालं तु विस्तारं मुखसार्धद्वितालकं ॥ बिलं घनं यथापूर्वं वृत्तं वाच तुरानन ॥ ६१॥
एतदेवं विधप्रोक्तं लक्षणं स्थिरदुंदुभेः ॥ आसने निर्मिते स्थाप्य गोपुरे सारदारुभिः
॥६२॥ विमानस्याथवा स्थाने दक्षिणे वा सुरोत्तम ॥ चतुःपादं चतुःशृंगं मध्ये ष्टप्रोक्त
त मासनं ॥६३॥ भूमिश्चैवं सदं स्थानं शृंगमध्ये तु दुंदुभेः ॥ चतुस्तालप्रमाणेन चैतन्मध्ये
तालपंचकं ॥ ६४॥ वदनद्वयविस्तारसमानं द्वादशांगुलं ॥ सुवृत्तुलं समंताच्च घनम
र्धांगुलं स्मृतं ॥ ६५॥ एवं यथावत्कथितं लक्षणं चरदुंदुभेः ॥ स्थूलेन ताभ्यां सदृशा म
हावृक्षविनिर्मिता ॥ ६६॥ खबंधोभयपार्श्वासो भेरीस्याद् नुदध्वनिः ॥ चारुसौराष्ट्रक

कृतोचंद्रमंडलवद्दृढा ॥ द्वितालविस्तरायामा जयघंटा स्मृताह्वया ॥ ६७ ॥ द्वौ शंखौ काहलौ
च च द्वौ तस्तो जयघंटिकाः ॥ ये केकः पटहो भेरीसंख्येषामेवमीरिताः ॥ ६८ ॥ केचिदेतान्महा
शब्दान्ब्रुवते पंचसूरयः ॥ नीनतोद्याकांस्यतालशंखकाहलनिस्वनान् ॥ ६९ ॥ अत्रोक्त
संख्याधिकतावाद्यानामुत्तमोत्तमा स्यादालभे यथालब्धाशंखानां विभवप्रमा ॥ ७० ॥
स्वगृहार्चने श्वरस्थाने सामान्येस्थावरेपि च ॥ स्नाने धूपे प्रदीपे च नैवेद्ये च प्रबोधयोः ॥
॥ ७१ ॥ घंटा पंचमहाशब्दान्प्रयुंजीत सर्वेषु च ॥ स्नानकाले त्रिसंध्या च यः कुर्या
द्भेरिवादनं ॥ ७२ ॥ नाट्यं वा मुखवाद्यं वा तस्य पुण्यफलं शृणु ॥ यावत्सन्ध्यानि कुरुते
येनन्दसादिवादनं ॥ ७३ ॥ तावद्युगसहस्राणि रुद्रलोके महीयते ॥ नैवेद्यं ॥ ॐ ॥ निवा
रतंडुलाश्रेष्ठास्तथैवाव्रीहितंडुलाः ॥ होमोक्तधान्यजातीयातंडुलामध्यमास्मृ

ताः ॥ ७४ ॥ म्लानान् भिन्नान् कणान् रक्तान् दुर्गंधान्कटिनाशकान्प्राचीनव्रीहिकांश्चे
तान् तंडुलान्सप्तवर्जयेत् ॥ ७५ ॥ अभिन्नाधवलास्निग्धाविशुद्धान्नूतनाःशुभाः ॥ तं
डुलास्स्युरमी श्रेष्ठा निवेद्यपरिकल्पने ॥ ७६ ॥ व्रीहीणां द्विशतंपंचविंशेत्याशक्तिरिष्यते
तत्कंप्रकुंचः प्रस्थतिकुडुबश्चततोंजलिः ॥ ७७ ॥ प्रस्थः पात्रस्त्वाढकश्च शिवो द्रोणश्चखा
रिका ॥ आख्याभवेयुरेतेषां द्विगुणेन पृथक् पृथक् ॥ ७८ ॥ श्रेष्ठाः खारिद्वय मितामध्यमाः
खारिसंयुताः ॥ शिवप्रमाणस्त्वधमा निवेद्यपरिकल्पने ॥ निवेद्यकरणेचोक्ताः श्रेष्ठा
श्चाढकतंडुलाः ॥ ७९ ॥ केनन्निष्पीडयनिष्पद्यषोडशान्क्षालयेद्बुधः ॥ सार्धाढकसमा श्रीशिव
तोयं तंडुलानां प्रकीर्तितं ॥ ८० ॥ विस्फुलिंगकृताकाष्टाः सकेशाः प्राणिसंयुताः ॥
एतान्विनेतरैः काष्टैः पचनेदीपयेच्छुचिः ॥ ८१ ॥ केवलान्न मितिप्रोक्त मिदमंनंसुपाचितं ॥

शो॰र॰
२९

परमान्नंहरिद्रान्नं धं दध्यन्नंकृशरोदनंगुडोदनंचमुद्गान्नमित्यन्नंषड्विधंस्मृतं॥तंडुल
त्रिगुणंभागेदुग्दार्धं जीवनयकं॥८३॥तदर्धंमुद्गभिन्नंतुपरमान्नमितिस्मृतं॥तंडुलार्धे
मुद्गभिन्नंवारिणासहसंपचेत॥८४॥ईषद्धरिद्रयायुक्तंमरीचीजाडिसंयुतं॥तदुक्तंहरि
द्रान्नंपक्कंपाचितंतथा॥८५॥मधुरामुनगोधघ्राम्यसगान्नंविमिश्रितं॥लवणाईक
संमिश्रमेतद्दध्योदनंस्मृतं॥८६॥तंडुलार्धंमुद्गभिन्नंवारिणासहसंपचेत्॥पक्केमरी
चचूर्णेन।तिलचूर्णंविनिक्षिपेत्॥८७॥इदंकृसनामान्न।मित्यारव्यातंसुरेश्वरः॥पूर्वो
क्तपायसेयुंज्याद्दुग्दार्धंगुडखंडकं॥८८॥तदर्धमाज्यमेल्वायाफलमेतद्गुडोदनं॥तंडु
लस्यत्रिभागेचमुद्गखंडंचमिश्रितं॥८९॥पक्कंपदेन्नमुद्गान्नमारव्यातंचतुर्मुख॥विना
सुधान्नमन्येषांप्रदद्याल्लवणंबुधः॥९०॥किंन्नाहारंतुषाहारंतंडुलाहारभिःसटापुराण

हारभांडंचप्रयत्नेनविवर्जयेत्॥११॥विशुद्धंभांडसंसिद्धंप्रयत्नेशुद्धमुज्वलं॥अस
नंयतडुत्कृष्टंनिवेद्यपरिकल्पने॥१२॥चत्वारिशिल्यबधान्यानिगृण्हीयात्सुपकर्मणि॥
मुद्गाडकरवल्वारव्यामाषाचान्यानिवर्जयेत्॥१३॥तत्रापिनिस्त्वचश्रेष्ठाःसत्वचोमध्यमा
स्मृतः॥प्राक्तनान्क्रिमिसंयुक्तान्म्लानान्हीनान्परित्यजेत्॥१४॥पनसःकदलीचू
तोनिकुचोनारिकेलकः॥नारंगोमातुलुंगुश्चफलान्येषावराणिच॥१५॥सुरणःसूक्ष्मकं
दश्चपिंडालुःशृंगिबेरकः॥चत्वारोमीप्रशस्ताश्चकंदास्युःपक्वकर्मणि॥१६॥कूश्मांडःकार
वल्लिश्चपटोलीबृहतीबला॥अलाबुःसूक्ष्मबृहतीचर्मकोशातकीद्वयं॥१७॥उर्वारुःक
थ्यतेतेषांफलानिप्रवराणिच॥स्वादून्यपथ्यविरुद्धानिफलान्यन्यानिनित्यशः॥१८॥म
रीचीजीरकासर्पिर्लवणामुकसर्षपैः॥उपदंशान्यथायोग्यंपचेदपिचहिंगुना॥१९॥प

रो० यतो
श्रौ०र० त्रौपदंशायेसर्वेतान्निवेद्यविसर्जयेत्॥ अत्रमोक्तान्नपानानांव्यंजनानामभावतः॥ दरि
३० द्रश्चेत्स्वभोज्यंयत्तद्गृहीत्वानिवेदयेत्॥ ॥२०॥ गुत्तमंकपिलासर्पिर्मध्यमंशुद्धगोघृतं॥ अ
न्यागोसर्पिरधममितित्रिविधमीरितं॥१॥ सद्यःपक्कंसुगंधाढ्यंविशुद्धंनयनप्रियं॥ शु
द्धभांडाहितास्पृष्टंशुद्धसर्पिःशुभंस्मृतं॥२॥ सकेशाकल्कपुलकंसदुर्गंधंपुरातनं॥ अस्पृ
श्यैःप्राणिभिस्स्पृष्टंदुर्भांडस्थंघृतंत्यजेत्॥३॥ रावंशालादधिक्षीरंगृहीतिस्नानकर्मणि॥
निवेद्यचपयोक्तव्योःशस्तेचाभिसंभवेत्॥४॥ श्रेष्ठंस्याद्दक्षकाष्ठांशंघृतंमध्यंतदार्धकं॥
कनीयसंतदर्धंस्याद्यथालब्धमलाभतः॥५॥ चंडालःपतितोरोगीपापीयान्देवलांसजः॥
गणिसुतिकोदक्येव्रतभ्रष्टश्वकुक्कुरः॥६॥ विट्सूकरः खरःकाकःषंडाभक्ष्यभक्ष
कः॥ स्वाध्यायविक्रयीस्येतेस्पृस्याश्चान्यत्रनिंदिताः॥७॥ श्रीशालितंडुलप्रस्थंकुर्याद्दन्नं

सुसंस्मृतं ॥ शिवायचचरुं दद्याच्चतुर्दश्यां विशेषतः ॥ ८ ॥ हरिद्रं कृसरं चापूपं पायसं पाव
नं तथा ॥ गुडखंडैश्च संमिश्रं गवामाज्यं सुकल्पितं ॥ ९ ॥ यावंतस्तंडुलास्तस्मिन् नैवेद्ये
परिसंख्यया ॥ तावद्वर्षसहस्राणि शिवलोके महीयते ॥ १० ॥ गुडखंडकृतान्नां च भ
क्षाणां च समर्पणात् ॥ घृतेन पाचितान्नां स्याद् दत्वा कोटिगुणं फलं ॥ ११ ॥ तांबूलिका
याः पत्राणि क्रमुकस्य फलानि च ॥ मुक्ताक्षारसकर्पूरं तांबूलमिति कीर्तितं ॥ १२ ॥ पंच
सौगंधिकोपेतं यस्तांबूलं निवेदयेत् ॥ शिवाय गुरवे चैव तस्य पुण्यफलं शृणु ॥ १३ ॥
सुगंधदेहस्तेजस्वी सर्वावयवसुंदरः ॥ युगकोटिसहभोगैः शिवलोके महीयते ॥ १४ ॥
॥ ॥ पट्टदेवांगचीनानि वितानान्युत्तमानि वै ॥ कार्पासं धवलं वस्त्रं मध्ये कमलभू
षितं ॥ एतन्मौक्तिकमालाढ्यं वितानमपि वा भवेत् ॥ १५ ॥ ॥ मयूरपक्षदंडेनावल्क

ले रतिपांडुरैः॥सौवर्णराजते दंडे रत्नजालविभूषिते॥१६॥हस्तमात्रप्रमाणेतु निर्मित
लेनशोभितं॥चामरंचैतदाख्यातंयुग्ममेकंप्रपूजयेत्॥१७॥चमरीबालकेश्चैव त
थाकुर्वीत पांडुरैः॥चामरंद्वितयंस्वर्णरत्नदंडसमायुतं॥१८॥वृत्तं द्वितालविस्तारं
पूर्वोक्तांशुकनिर्मितं॥पूर्वोक्तदंडेसंप्रोतंचतुस्तालायतंशुभे॥१९॥तालवृंतमितिख्या
तं चित्रैरत्नैर्विभूषितं॥एतद्व्यजनयुग्मंसद्भक्त्याथविचक्षणः॥२०॥द्रव्याण्येवंस
मालोक्यसदोषाणिपरित्यजेत्॥निर्दोषाणिचसौम्यानिसंग्रहीयाद्यथाविधि॥२१॥
दारुमृत्ताम्रपालाशरौप्यकांचनपात्रकैः॥एवंस्नानादिनैवेद्यबलिधूपादिभिःक्र
मात्॥२२॥पात्रांतरविशेषेण पुण्यंस्यादुत्तरोत्तरं॥हेमपात्रप्रदानेनयत्पुण्यंवेदपा
रगे॥२३॥रौप्यपात्रप्रदानेनतस्माच्छतगुणंतुवै॥एवंदेवार्चिमामानियेदं मे च्चकुसु

मादिभिः॥२४॥नार्चयेदितरं देवं यदि सार्चा कृता वृथा॥सर्वदेवार्थमिसेत तत्पुष्पादिद्र
व्यसंचयं॥२५॥यः कुर्वीत महाद्रव्यैरल्पदलाभे यजेच्छिवं॥शिवार्चनविशिष्टानि योग्या
न्यन्यामरार्चने॥२६॥अन्यामरार्चाशेषाणि न द्रव्याणि शिवार्चने॥देवद्वारात्समुद्भवं पुष्पम
न्यद्वार्चनसाधनं॥बलादादाय चौर्याद्वा नमयुंज्यातिवाबुधः॥२७॥यत्र नैवेद्यनिर्माल्य
संकीर्णकलुशादिभिः॥स्नानं तु क्रियते भक्त्या न तद्गृह्णाति शंकरः॥२८॥देकार्ये गुरोः
कार्ये गणकार्ये तु योगिनां॥स्वनोसाटनं खंडं कृत्वा पापैर्न लिप्यते॥२९॥वृक्षाः पुष्पो
गपत्राद्यैरुपयुक्ताः शिवार्चने॥शैवश्चैव गच्छंति रुद्रलोकं न संशयः॥३०॥पूजितं पूज्य
मानं वा यः पश्येद्भक्तितः शिवं॥श्रुत्वा तु मोदते भक्त्या स च यागफलं लभेत्॥३१॥कुश
लाः सर्वभृत्याश्च देवकार्ये वियोजिताः॥प्रयांति स्वामिना सार्धं श्रीमच्छिवपुरं महत्॥
॥३२॥

शै०र०
३२

भुक्त्वातुविपुलान्भोगान्मर्त्यवर्गसमन्वितः॥कालात्पुनरिहायातः पृथिव्यामेकराड्भ
वेत्॥३३॥ब्राह्मणः क्षत्रियोवैश्यःशूद्रोवा विभवान्वितः॥विभावानुमतद्रव्यैःपूजयेदन्य
थावृथा॥३४॥अस्मिन्नर्थेवासवीयसेहीतायां॥आढ्योवाथदरिद्रोवास्वकांशक्तिमवं
चयन्॥द्रव्यैर्न्यायार्जितैरेवभक्त्यादेवंसमर्चयेत्॥३५॥भक्त्यावित्तानुसारेण शिव
मुद्दिश्ययत्कृतं॥अल्पेमहतिवासाम्यंफलमाढ्यदरिद्रयोः॥३६॥भक्त्यासम्प्रचोदितःकु
र्याद्ल्पवित्तोपिमानवः॥महाविभवसारोपिनकुर्याद्भक्तिवर्जितः॥३७॥सर्वस्वमपियो
दद्याच्छिवेभक्तिविवर्जितः॥सतेनफलभाग्नस्याद्भक्तिरेवात्रकारणं॥३८॥यद्य
दिष्टिं समुत्कृष्टं न्यायप्राप्तंसंचयद्भवेत्॥शिवायतननिवेद्यंस्याद्भक्त्यानंतफलार्थि
भिः॥३९॥अथन्यायार्जितैश्चापिविभक्त्याचेच्छिवमर्चयेत्॥नतस्यमत्सवायोस्तिभा

श्री

ववज्ञेयो यतः प्रभुः ॥ ४० ॥ न्यायार्जितैरपि द्रव्यैर्भक्त्या पूजयेद्यदि । न तत्फलमवा
प्नोति भक्तिरेवात्र कारणं ॥ ४१ ॥ शिवमुद्दिश्य यद्दानं सर्वकारणकारणं ॥ तदनंतफलं दा
तुर्भवत्यतीति किमद्भुतं ॥ ४२ ॥ सर्वेषामपि पात्राणामतिपात्रो महेश्वरः ॥ शिवे दत्तं कृतं ज
प्तं भक्त्या चावि निवेदितं ॥ ४३ ॥ सर्वं तदक्षयं प्राहुरागमार्थविशारदाः ॥ एकमत्संतफल
दं तद्भवेन्नात्र संशयः ॥ ४४ ॥ ॥ इति शैवरत्नाकरे पंचमोऽध्यायः ॥ ५ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ श्री
उपचाराः ॥ उपचारान्नथो वक्ष्ये पुराणश्रुतिसंमतान् ॥ स्कांदे ॥ उपचारास्त्रयः प्रोक्ताः पंचाष्टौ
दश षोडश ॥ चतुर्विंशच्च द्वात्रिंशदुपचारा गुहोदिताः ॥ १ ॥ स्नानं पूजा च नैवेद्यमुपचारास्त्रयः क्रमा
त् ॥ प्रदक्षिणनमस्कारः पंचैते संप्रकीर्तिताः ॥ २ ॥ पार्थिवाद्येश्च सद्यादिपंचमंत्रैः समर्चनं पंचोपचा
रमित्युक्तं ब्रह्मणा परमर्षिणा ॥ ३ ॥ संगीतनृत्यवाद्यैस्तैरुपचाराष्टकं मुने ॥ अर्घ्यं पाद्यमाचमनमधु

शै॰र
३३

पर्काचमानकं॥४॥गंधाद्यो निवेद्यांत उपचारा दशक्रमात्॥आवाहनासनेपाद्यमर्घ्यमाचमनीय
कं॥५॥स्नानमाचमनंवस्त्रं तथाचामोपवीतकं॥आचामोगंधपुष्पेच धूपदीपानिवेदनं॥६॥प्रदक्षिण
नमस्कारावात्मन्यारोपणंततः॥उपचारःषोडशोक्तास्स्कांदे नचमहात्मन॥७॥आवाहनासने
पाद्यमर्घ्यमाचमनीयकं॥स्नानंवस्त्रंचोपवीतमक्षतंगंधपुष्पकं॥८॥धूपंदीपंचनैवेद्यंफलंतां
बुलकंस्तुतिः॥प्रदक्षिणनमस्कार शय्यासंगीतवाद्यकं॥९॥नृत्यंचात्मारोपणंचचतुर्विंशोपचारकाः॥
आवाहनासनेपाद्यमर्घ्यमाचमनीयकं॥१०॥स्नानंवस्त्रंचोपवीतंभूषणंचानुलेपनं॥तिलाक्षतापु
ष्पधूपदीपनैवेद्यकानिच॥११॥मुखवासननीराजदर्पणंचफलानिच॥तांबुलम्प्रदक्षिणोच नमस्का
रस्तुतिस्ततः॥१२॥पुराणपठणं छत्रं व्यजनंचामरं तथा॥शय्यासंगीतनृत्यंच वाद्यानिचतथैवच॥
आत्मन्यारोपणंचेति द्वात्रिंशदुपचारकः॥आवाहनंतुयोदद्यात्सचक्रतुफलंलभेत्॥१४॥आ

सनंरुचिरं दत्वाशक्रत्वं च समाप्नुयात् ॥ पाद्येन पातकं हन्याद र्घ्येणाप्नोत्यनर्घ्यतां ॥ १५ ॥ ततश्चा
चमनं दत्वा सुचित्तस्सुखतां व्रजेत् ॥ स्नानं व्याधिभयं हन्याद्वस्त्रेणायुष्यवर्धनं ॥ १६ ॥ उपवी
तं तु यो दद्याद्ब्रह्मवेत्तृत्वमेव च ॥ भूषणानि च यो दद्याद्भूणापत्यमवाप्नुयात् ॥ १७ ॥ नानापुष्प
प्रदानेन स्वर्गराज्यमवाप्नुयात् ॥ धूपो दहति पापानि दीपो मृत्युविनाशनः ॥ १८ ॥ सर्वमानस्तु
नैवेद्यं दत्वा तृप्तिरतो भवेत् ॥ मुखवासनदानेन कीर्तिमान्भवति ध्रुवं ॥ १९ ॥ नीराजनेन शु
द्धात्मा दर्पणेन प्रकाशयेत् ॥ फलदः पुत्रवान्मर्त्यः स्तांबुलात्स्वर्गमाप्नुयात् ॥ २० ॥ प्रदक्षिणं
तु यः कुर्यात्स पापं हंति पदे पदे ॥ दंडप्रणामं यः कुर्याद्देवमुद्दिश्य सन्निधौ ॥ २१ ॥ वर्षाणि वस
ते स्वर्गे देहते रेणुसंख्यया ॥ स्तोत्रेण दिव्यदेहोपि वाग्मी भवति कीर्त्तनात् ॥ २२ ॥ पुराणपठ
नेनैव सर्वपापक्षयो भवेत् ॥ छत्रं दत्वा महेशाय नंदीश्वरसमो भवेत् ॥ २३ ॥ ततः क्रमात्स्त्री

शै॰र॰
३४

तिमाप्यसार्वभौमोन्नृपोभवेत्॥तालवृंतेनसंवीज्यवायुलोकेमहीयते॥२४॥मायूरचाम
रंदत्वामायूरगणराड्भवेत्॥दत्वावैचामरंदेवंविज्यलेयःशिवेपुरे॥२५॥युगकोटिशतंभु
क्त्वांतेराज्यमवाप्नुयात्॥संगीतनृत्यंयःकुर्यात्सर्वयफलंलभेत्॥२६॥मदुशय्याप्र
दानेनचाक्षतंपदमाप्नुयात्॥सुरवश्रवणतांगच्छेद्वाद्येनशिवसन्निधौ॥२७॥हृत्पंकजेशि
वंरक्षाप्य शिवत्वमाप्नुयाध्रुवं॥एवंसंक्षिप्यकथितमुपचारमनुत्तमं॥२८॥अन्यानप्यु
श्री पचारांश्चमूलेनैवतुदापयेत्॥ ॥इतिश्रीशिवरत्नाकरेषष्ठोध्यायः॥६॥ ॥ ॥ ॥ श्री
पिंडोत्पत्तिः॥अथपिंडोत्पत्तिक्रमंवक्ष्यामि॥संसारदीपिकेशास्त्रे॥शांतंशुद्धस्वभा
वंचसर्वदानंदविग्रहं॥भैरवंविश्वभरणंभगवंतमुमापतिं॥१॥देवदेवंजगन्नाथंयोगि
नीचक्रनायकं॥प्रणम्यशिरसादेवीपृच्छतीशंविमुक्तये॥२॥ ॥देव्युवाच॥ ॥दुस्त

रंदेवदेवेशसंसारांभोनिधिमभो॥सुखोपायेनपशवस्तरंतिचयथावद॥३॥ ॥ईश्वरः॥
साधुसाधुमहाभागेशोभनंकथितंत्वया॥अधुनासंप्रवक्ष्यामि देहस्थंकुलक्षयेच्छया॥४॥
कुलज्ञानंसुरश्रेष्ठे निश्चितंकथयामिते॥गुह्यात्गुह्यतरंगुह्यंकुलरत्नंयथाप्रिये॥५॥
नध्यानेलक्ष्ययोगेनचहृदिकमलेधारणेनेकहंसेनाकाशेवायुतत्वेक्षितिरनलजले
द्वादशांतेनघोषे॥श्रुसंतेबिंदुनादेनचकरणलयेनादिमध्यावसानेएभिस्थानेविमुक्तं
सकलतनुमयंसर्वगंतन्नमामि॥६॥कुलस्यज्ञानमात्रेणसर्वज्ञत्वंप्रजायते॥चैतन्यं
बीजरूपंचशुक्लंरक्तंतथाजलं॥७॥येकीभूतंयदाकालेतदाकालेप्ररोहति॥कललंत्वे
करात्रेणपंचरात्रेणबुद्बुदं॥८॥शोणितंदशरात्रेणमांसपेशित्रिपंचके॥पुनर्मांसं
चविंशाहेगर्भस्थोवर्द्धतेक्रमात्॥९॥पंचविंशतिसंपूर्णफलरूपंचांकुरायते॥मासेनैके

शै॰र॰
३५
दो

नसंपूर्णपंचतत्वानि धारयेत् ॥११॥ मासद्वयेन संपूर्णमांसमेदः प्रजायते ॥ मज्जास्थीनि
त्रिभिर्मासैः केशगुच्छं चतुर्थके ॥ कर्णाविनासिकास्यादिरंध्रादिर्मासपंचके ॥ कंदरा । चोदरष
ष्टंगुदपादं च सप्तमे सर्वांगसंधिसंपूर्णो मासैः स्यादष्टभिः प्रिये ॥१२॥ मासे तु नवमे प्राप्ते गर्भस्थ
स्मरति स्वयं ॥ मृतश्चाहं पुनर्जातो जातश्चाहं मृतः पुनः ॥१३॥ नानायोनिसहस्रेषु मया दृष्टमने
कशः ॥ चिकित्सा जायते तस्य गर्भवासं परित्यजेत् ॥१४॥ रक्ताधिक्ये भवेन्नारी नरः शुक्रा
धिके स्मृतः ॥ नपुंसके समे द्वन्द्वे त्रिविधं पिंडसंभवः ॥१५॥ शक्तित्रयविशालांगं षट्कौशि
कसमाश्रितं ॥ बृहद्भूतमयोपेतं श्रोत्रेंद्रियसमन्वितं ॥१६॥ पंचकर्मेंद्रियैर्युक्तं दशनाडि
भिरूर्जितं ॥ दशानिलगुणोपेतं यो जानाति स योगवित् ॥१७॥ मज्जास्थिशुक्रधातुश्च रक्त
मांसत्वचस्तथा षट्कौशिकमिदं पिंडं तस्यांते पांचभौतिकं ॥१८॥ पंचभूतमयोपेतं बुद्धींद्रि

यसमन्वितं॥ क्षितिवार्यग्निरनिलस्तथाकाश इतिक्रमात्॥१९॥ स्थूलभूताइमे पंचसबा
ह्याभ्यंतरस्थिताः॥ अस्थिमांसस्त्वचोनाडीरोमाणिइतिपंचकं॥२०॥ क्षितेःपंचगुणायेतेस
मासात्परिकीर्तिताः॥ लालामूत्रंतथास्वेदः शुक्रंशोणितमेवच॥२१॥ अपांपंचगुणायेतेसमासा
त्कथितामया॥ क्षुधातृष्णातथानिद्राप्यालस्यंकांतिरेवच॥२२॥ तेजःपंचगुणाःप्रोक्ताज्ञात
व्याहिविशेषतः॥ धावनंवलनंचैवसमाकुंचप्रसारणं॥२३॥ निरोधःपंचमःप्रोक्तोवायोःपंच
गुणाःस्मृताः॥ रागद्वेषौतथालज्जाभयंमोहस्तथैवच॥२४॥ व्योम्नःपंचगुणाह्येतेसमासा
त्परिकीर्तिताः॥ श्रोत्रंत्वक्चक्षुषीजिह्वाघ्राणंबुधीन्द्रियाणिच॥२५॥ वाक्पाणिपादपा
यूचगुह्यंकर्मेंद्रियाणिच॥ इडाचपिंगलाचैवसुषुम्नाचतृतीयका॥२६॥ गांधारीहस्ति
जिह्वाचपुष्याचैवपयस्विनी॥ अलंबुकाकुहूश्चैवशंकिनीदशमीस्मृताः॥२७॥ पिंडमध्ये

शै०र॰
३६

तथाह्येताःप्रदानादशनाडयः॥कुलपिंडंसमाख्यातंविम्बंकथयामिते॥२८॥ब्रह्मांडेयेगुणाः
संतितेशरीरेव्यवस्थिताः॥पातालभूधरालोकातथान्येद्वीपसागराः॥२९॥आदित्यादिग्रहाः
सर्वेपिंडमध्येव्यवस्थिताः॥पादाधस्त्वतलंविद्यात्पादोर्द्ध्वेवितलंतथा॥३०॥जानुभ्यांसुतलं
ज्ञेयंनितलंसंधिबंधने॥तलातलमथोर्वोस्तुगुह्यस्थानेरसातलं॥३१॥पातालंकटिबंधेतु
पादादौलक्षयेद्बुधः॥भूर्लोकेनाभिमध्येतुभुवर्लोकेहृदिस्थितः॥३२॥स्वर्लोकःकंठदेशे
तुमहर्लोकस्तुतालुके॥जनर्लोकस्तद्भ्रूर्ध्वेतुतपोलोकोललाटके॥३३॥सत्यलोकःशिरस्था
नेभुवनानिचतुर्दश॥त्रिकोणेसंस्थितोमेरुरधःकोणेतुमंदरः॥३४॥केलासोदक्षिणे
कोणेवामकोणेहिमालयः॥निषदस्त्वोर्ध्वभागेचदक्षिणेगंधमादनः॥३५॥विंध्यस्तुरोम
रेखायांसप्तैतेकुलपर्वताः॥अस्तिस्थानस्थिताजांबुर्मज्जस्थःप्लक्षसंज्ञकः॥३६॥कु

घ्राद्वीपस्थितोमांसे क्रौंचद्वीपः शिरासु च॥ त्वचायांशाल्मलीद्वीपो गोमेधो रोमसंचये ३७ नखस्थं पुष्करं विंद्यात्सागरास्तदनंतरं॥ क्षारोधश्चतथामूत्रे क्षीरक्षीरोदसागरः॥३८॥ दध्यार्णवस्तथाश्लेष्मे मज्जायां सर्पिरर्णवः॥ रसोदधिर्वसांतेच शोणितेचसुरोदधिः॥३९॥ स्वादुदोलंबिकास्थाने गर्भोदः सप्तसागराः॥ नादचक्रे स्थितंसूर्यो विंदुचक्रेच चंद्रमाः॥४०॥ लोचनाभ्यां कुजोज्ञेयो हृदयेच बुधस्स्मृतः॥ गुरुस्थाने गुरुं विंद्याच्चक्रे शुक्रस्समाश्रितः॥४१॥ नाभिस्थाने स्थितो मंदो मुखांते राहुराश्रितः॥ नादस्थाने स्थितो केतु रश्मिन्यादास्त्रयस्त्रयः॥४२॥ विभवश्चससारस्मात मायादनलमस्तकं॥ हृदिस्थाने स्थितो ब्रह्मा कंठे विष्णुः समाश्रितः॥ ४३॥ भ्रूमध्ये संस्थितो रुद्रस्सोर्ध्वे ईश्वरः स्मृतः॥ सदाशिवो ललाटांते पंचैते भूतनायकाः॥ ४४॥ इति संसारिदीपिके पिंडोत्पत्तिनिर्णयः॥ शैलादिः॥ ब्रह्माद्यास्थावरांतास्चदेवदेवस्य धीमतः॥ पशवः परिकीर्त्यंते संसारपरिवर्जिनः॥ १॥ तेषांपतित्वाद्देवेशो रुद्रः पशुपतिः स्मृतः अनादिनिधनोदाता

शे॰ र॰ भगवान्नविभुरव्ययः॥ २॥ मायापाशेनवध्नातियश्चुस्तान्परमेश्वरः सएवमोचकस्तेषांज्ञान
३७ योगेनसेवितः ॥३॥ अविद्यापाशवद्धानांनान्योमोचकइष्यते तंमृतेपरमात्मानंशंकरंपर
मेश्वरं॥४॥ ब्रह्मादिस्तंवपर्यंतंपशुन्बध्वामहेश्वरः॥ त्रिभिर्गुणमयैःपाशैः कार्यंकारयतिस्व
कं॥५॥ ध्रुवेणभक्तियोगेनपशुभिः समुपासितः मोचयित्वेवतान्सद्यः शंकरःपरमेश्वरः॥ ६॥ ध
र्माधर्ममयैः पाशैवद्धानांदेहिनामयं॥ मोचकःशिवएवेकोभगवान्परमेश्वरः॥७॥ चतुर्विंशतितत्वा
नीस्युपकर्मगुणाइति॥ विषयाइतिकथ्यंतेयाशानीवस्यवंधनाः ॥८॥ नेभक्ताशिवभक्त्यैव
मुच्यंतेसर्वदेहिनः पंचक्लेशमयैःपाशैः पशूनबध्नातिशंकरः ॥९॥ सएवमोचकस्तेषांभक्त्यासम्यगु रामः॰
पासितः॥क्षुधातृषाभयंद्वेषोरागमोहान्यचिंतनं॥१०॥जरारुजाचमृत्युश्चखेदशोकमदोरतिः विस्म ३७
यंजननंनिद्रालस्यमष्टादशाध्रुवं॥११॥ ॥विभूतिमाहात्म्यं॥शुभानामशुभानांचकर्मणा

वापिसंचयं॥ करोतिभस्मसाद्भक्तिर्दहत्यग्निरिवेंधनं॥१॥ संचितंजन्मलक्षेणपापंनृणांनि
रंतरं॥ करोतिभस्मसाद्भक्तिस्तस्यशंभोरनुग्रहात्॥२॥ भक्तिःशिवेयदिभवेन्नकस्माद्भक्ति
चेत्त्वयं॥भवार्णवंतरत्येवप्रसादाच्छूलिनोमुने॥ ३॥ तीर्थयात्रावहुविधायज्ञाश्चविविधाःकृ
ताः॥येस्तुजन्मसहस्रेषुतेषांभक्तिर्भवेच्छिवे॥४ ॥लैंगे॥चांद्रायणसहस्रंचप्राजापत्यंशतंत
या॥ मासोपवासाश्चान्येभवभक्त्यामुनीश्वरः ॥ ५॥ भक्तिस्थलं॥भक्तिरष्टविधाह्येषा
सर्वशास्त्रेषुदृश्यते॥ तामहंकथयिष्यामिभवपाशविनाशिनी॥ ६॥ मद्भक्तजनवात्सल्यंपूजा
यांश्चानुमोदनं॥ स्वयमभ्यर्चनंभक्त्याममार्थेचागचेष्टनं॥ मत्कथाश्रवणेभक्तिःस्वरनेत्रांगविक्रि
या॥ ममानुस्मरणंनित्यंयश्चमामुपजीवति॥७॥ प्रसादादेवसाभक्तिःप्रसादोभक्तिसंभवः॥ यथै
वांकुरतोवीजंवीजतोवायथांकुरं॥८॥ वीरभद्रीये॥ कामंभक्तिरतोकुर्यात्क्रोधंचाधर्मकर्मणि॥लोभं

शै·र· शिवार्चनेकुर्यान्मोहंभक्तजनेषुच॥ मात्सर्यंकरणेष्वेवमदंमायापराभवे॥ व्यसनंशिवतत्त्वे
३८ चलिंगस्यैवनिरीक्षणं ॥११॥ इत्येतत्सात्त्विकंप्रोक्तंभक्तिरूपंप्रदर्शिनं॥ सकलंनिष्क-
लंचैवद्विविधंसंज्जनंस्मृतं॥१२॥ कालकूटसमंदेविसज्जनंमुद्धशैवकं ॥ ॐ ॥न
मःशिवायसोमायषट्त्रिंशतत्त्वरूपिणे ॥ अग्निष्टोमात्मनेभस्मज्योतिषेशांतनेजसे॥
१३॥ सर्वाण्यपिचशास्त्राणिपुराणानिविशेषतः ॥ श्रुतिस्मृतीतिहासादिनन्याना
लोच्यकृत्स्नशः ॥१४॥भस्मतत्त्वस्यविस्तारंविधानंचसुविस्तरं माहात्म्यविस्तरंस्मी रम·
त्तत्तच्छास्त्रोक्तमार्गतः ॥ १५॥ तत्तच्छ्लोकोत्तैरत्यैश्चसारमादायसंग्रहात ॥ विभूतिम ३८
हिमाकल्परत्नसारसमुच्चयं ॥ १६॥ काश्यामलब्धपंचत्वमतम्रतपनंनथा अपवर्गपदंने
तुंक्रियतेभूतिपद्धतिः ॥१७॥जाबालोपनिषदि॥ सद्योजातात्पृथिवीतस्यानिवृत्तिः॥ तस्याः

कपिलवर्णा नंदा तस्या गोमयेन विभूतिर्जाता ॥ १८ ॥ वामदेवादुदकं तस्मात्प्रतिष्ठा तस्याः
कृष्णवर्णा भद्रा तस्या गोमयेन भसितं जातं ॥ १९ ॥ अघोराद्वह्निस्तस्माद्विद्या तस्या रक्तवर्णा सु
रभिस्तस्या गोमयेन भस्म जातं ॥ २० ॥ तत्पुरुषाद्वायुस्तस्माच्छांतिस्तस्याः श्वेतवर्णा सुशीला
तस्या गोमयेन क्षारं जातं ॥ २१ ॥ ईशानादाकाशस्तस्माच्छ्रसनीता तस्याश्चित्रवर्णा सुमना
तस्य गोमयेन रक्षा जाता ॥ २२ ॥ ऐश्वर्यकारणाद्भूतिः भासनाद्भसितं सर्वाघभर्त्सनाद्भ
स्मत्वापदां क्षारणात्क्षारं ॥ भूतप्रेतपिशाचाच ब्रह्मराक्षसापस्मारभवभीतिभ्योऽभिरक्षणाद्र
क्षेति ॥ २३ ॥ अस्मिन्नर्थेग्निसारे ॥ विभूतिर्भसितं भस्म क्षारं रक्षेति भस्मनः ॥ भवंति पंच नामानि
हेतुभिः पंचभिर्भृशं ॥ २४ ॥ ऐश्वर्यकारणाद्भूतिर्भस्म सर्वाघभर्त्सनात् ॥ भासनाद्भसितं भस्म क्षा
रणात्क्षारमापदां ॥ २५ ॥ भूतप्रेतपिशाचेभ्यः संग्रहेभ्योऽभिरक्षणात् ॥ रक्षास्यात्क्रूरसर्पेभ्यो

शै-र० व्याघ्रादिभ्यस्त्वसर्वेदा॥ २६॥ अथाविरजाहोमंवक्ष्ये॥ अथस्वगृह्यशिवार्चनेकुर्या
३९ न्मोहंभक्तजनेषुच॥ मात्सर्यैकरणोप्येवमदंमायापराभवे॥ व्यसनंशिवत्वेचलिंगस्यैव
निरीक्षणं॥ ११ ॥ इत्येनत्सात्विकंप्रोक्तंभक्तिरुपंप्रदर्शितं॥ सकलंनिष्कलंचैवद्विवि
धंसज्जनंस्मृतं ॥ १२ ॥ कालकूटसमंदेविसज्जनंमुद्दशेवकं॥ ॐ॥ नमः शिवायसोमा
यषट्त्रिंशतत्वरूपिणे ॥ अग्निष्टोमात्मनेभस्मज्योतिषेशांततेजसे॥ १३॥ सर्वाण्यपिच
शास्त्राणिपुराणानिविशेषतः ॥ श्रुतिस्मृ॥ तीतिहासादिनन्यानानोच्यकृत्स्नशः ॥१४॥
भस्मतत्वस्यविस्तारंविधानंचसुविस्तरं ॥ माहात्म्यविस्तरंत्स्न्यौतत्तच्छास्त्रोक्तमार्गतः॥ राम०
१५॥ तत्तच्छ्लोकोत्तैरन्यैश्वसारमादायसंग्रहात ॥ विभूतिमहिमाकल्परत्नसारसमुच्चयं॥१६ ३८
काश्यामत्रध्यपंचत्वमततनतयनंतथा॥ अपवर्गपदंनेतुंक्रियतेभूतिपद्धति ॥ १७॥ जा

वालोपनिषदि ॥ सद्योजातात्पृथिवीतस्यानिवृत्तिः तस्याः कपिलवर्णोनंदानस्यागोमयेनविभूतिर्जाता ॥ १८ ॥ वामदेवादुदकं तस्मात्प्रतिष्ठा तस्याः कृ( ) प्रकारेणाग्निप्रतिष्ठापनं कृत्वा ॥ तन्मध्ये अग्नेर्ज्वालाष्टत्तंरुद्रं वन्हिमंडलमध्यगं ॥ ध्यायेत्कलादशयुतं शक्तिस्वस्तिकधारिणं ॥ इतिरुद्राग्निसंचिंत्यरुद्राग्नेर्विभूतिं संपदयामीति संकल्प्य ॥ दक्षिणं प्राचंमृज्जुसंनतमापूर्य निरुच्याद्वितीयमेंद्रमितरपरिदर्शांधिमन्वपरस्त्पमागुदंचमाज्यभागौजुहोति ॥ अग्नयेस्वाहेत्युत्तरपूर्वेदेशेसोमायस्वाहेति ॥ दक्षिणापूर्वदेशे ॥ समंपूर्वेणायथोपदेशंप्रधानाहुतिंहुत्वा ॥ समिधमिध्मसंनहंचअग्नेप्रत्सपाप्यांतानांत्पमृतंप्राजापत्यांव्याहृतिविर्हत्वास्विष्टकृतमिष्यजुहोति ॥ यथास्यकर्मणाइतिततः परिविच्यप्रणितास्वप्नीयप्रदेशंव्याप्तिस्याशिरसिमार्जइत्वाप्रस्यंजस्तोशेषंविनीयेरुद्रं विसर्जेत् अथानंतरमग्निमादायविधिवत्स्वगृह्योक्तप्रकारतः ॥ नित्यनैमित्तकेत्वादौकाम्य

श्री०र. व्रतविशेषतः ॥ शैवानांवैदिकानांचासर्वेशाखाविदांसमं ॥ सर्वेषामाश्रमाणांचविरजाहोमउ
४० च्यते ॥ २८ ॥ आगमेषुपुराणेषुयत्रयत्रचकुत्रचित् ॥ विरजोहोमस्यविधेमंत्रोद्धारणकंतुयः
॥२९॥ तद्यथा ॥ ॐ ॥ प्राणापानव्यानोदानसमानामेशुध्यंतांज्योतिरहं ॥ विरजाविपाप्माभू
पासंस्वाहा ॥ सर्वत्रअग्नयइदंनमम वाङ्मनश्चक्षुश्रोत्रजिह्वाघ्राणरेतोबुध्याकूतिसंकल्पामे
ध्यंतांज्योतिरहं ॥ शिरः पाणिपादपार्श्वपृष्ठोरूदरजंघनशिश्नोपस्थपायवामेशुध्यंतांज्योतिः
॥ उत्तिष्ठपुरुषहरितलोहितपिंगलाक्षदेहिदेहिददापयितामेशुध्यंतांज्योतिः ॥ पृथिव्यापस्तेजोवा रामः
युराकाशामेशुध्यंतांज्योतिः ॥ शब्दस्पर्शरूपरसगंधामेशुध्यंतांज्योतिः ॥ मनोबुद्धिरहंकारचित्तंवि ४०
ज्ञानंमेशुध्यंतांज्योतिः ॥ अन्नमयप्राणमयमनोमयविज्ञानमयमानंदमयमात्मामेशुध्यंतांज्योतिः
विध्येस्वाहा ॥ कपोतायस्वाहा ॥ इत्येतद्द्वादशमंत्राविरजाहेतवः ॥ हुत्वाज्येनसमिभिश्चचरु.

णांचयथाक्रमं ॥ श्रौतपाशुपतादीनां सांख्यवेदांतवादिनां ॥ ३१ ॥ पंचविंशतितत्त्वौघशुद्धी
स्फुतामयं मतः ॥ दीक्षितानां च शैवानां षट्त्रिंशत्तत्त्ववेदिनां ॥ अथैवमेव किं त्वत्र मंत्रैः खलु
विशिष्यते ॥ ३२ ॥ तद्यथा ॥ त्रैगुण्यः प्रकृतिः पुरुषरागविद्याकलानियतिकालामायाशुद्धविद्या
महेश्वरसदाशिवशक्तिशिवापरशिवेच्छया मे शुध्यंतां ज्योतिः ॥ नमः शिवाय स्वाहा ॥ पश्चादेषां स्वा
हेति वा सर्वमंत्राः प्रणवाद्यांतैर्होमावसाने ष्ठतत्सगणावादिवौषडंतमुलेन पूर्णाहुतिर्देया ॥ पू
र्णाहुतिमुक्तमां जुहोति सर्वे वै पूर्णाहुतिः ॥ सर्वमेवाप्नोति ॥ अथोऽयं पूर्णाहुतिः ॥ अस्यमेव प्रतिष्ठ
ति ॥ विरंगामुन्मत्तां महाशनां एवत्तामलनामशिचिन्हांकितां ॥ पुनर्धेनुं कृशांगां वत्सहीनां वंध्या
मंगहीनां शांनमदुग्धदोहिनीं निरिंद्रिया मज्जगाधतृणां केशचेलास्थिभक्षिणीं संधिनिनवसतां
रोगान्वितां विहाय अप्रशस्तभस्मादपतितल्किन्नदुर्गंधपरिप्राषितेत्यादि गोमयं विहाय ॥ प्रशस्तगो

शै०र० मयमादाय॥ आहरेत्॥ ३३॥ अस्मिन्नर्थे स्कांदे॥ सवत्सापालयेरोगायानि र्वोषायास्तनथैवच॥
४१ अनिर्देशापामुद्वायागो शुगोमयमाहरेत्॥ ३४॥ स्वसंस्थं गोमयंग्राह्यं स्थानेवापतितंशुभे॥ अ
य ऊर्ध्वपरित्यज्य पंचगव्येनमर्दयेत्॥ ३५॥ क्रियासारे॥ गोमयग्रहणेश्रेष्ठा कपिला धवलाथवा
॥ अलाभेस्यात्तदन्या गौर्योग्या चेद्दोषवर्जिता॥ ३६॥ उत्तमं कपिलाभस्मंलब्धगोभस्मवाभ
वेत्॥ अस्यजीवधनक्षारं यत्र क्वापि स्थितं चयत्॥ ३७॥ संस्कार रहितंयत्तन्नहिधार्यं कदाचन
॥ सघेनगोमयंग्राह्यं तद्धामेनाभिमंत्रयेत्॥ ३८॥ शुचिभूमावघोरेणदहेत्तद्वशिवाग्निना॥ ताम्र
कुंभेक्षयेच्छुद्धभस्मतत्पुरुषेणतु॥ ३९॥ सिकतांगारपाषाणानीशानेनविशोधयेत्॥ अथकालो रा०भ०
त्तरे॥ ओंकारमूलमापाद्यशिवाग्नेर्भूतिमुत्तमं॥ ॐ कारः प्रणवः सूक्ष्मोविद्यानांबीजमुत्तमं॥ ४०॥ ४१
तस्मादशेषतत्वानि प्रणवेनविशोधयेत्॥ यथाषडक्षरोमंत्रः सर्वसाधारणस्मृतः तस्मात्तेनैवस

यात्वं भस्मनिर्वाणमुच्यते ॥४१॥ स्कांदे॥ अथसंक्षेपतस्कंद आरण्यंगोमयंपुनः ॥ पंचगव्यंसमायुक्तं
विधिनैवविनिर्दहेत्॥ संस्कृत्यहृदिमंत्रेणनवभांडेनिधापयेत्॥ अनमंत्रंजपेन्मंत्री सर्वविघ्नविनाशनं॥
४२ जाबालोपनिषदिचैव वर्णिकानामग्निहोत्राग्निजं॥ गृहस्थानांविरहानलजं विवाहाग्निजमौपासनाग्निजं
वा॥ ब्रह्मचारिणांसमिदग्निजं शूद्रानांश्रोत्रियागारस्थपचनाग्निजं॥ अन्येषांदावानलसमुद्भवं॥ यतीनांसर्वत्रस्थितं
॥ अतिवर्णाश्रमाणांस्मशानगतं॥ सर्वेषांदेवालयेस्थितमिति॥ श्रीमहालिंगे॥ शिवाग्निहोत्रजाभूतिः शिवा
लयमतल्लिका॥ मंत्रसंस्कारदग्धावादत्तावाशिवयोगिभिः ॥४३॥ क्रियासारे॥ भद्रहस्तस्थितंभस्मद्विजातिनै
वधारयेत्॥ तथैवांत्यजहस्तस्थंभस्मदेहेधार्यंनजातुचित्॥ ४४॥ चंदनंकुंकुमंचैवमृगनाभिमुखान्परान्
॥ गंधानन्यस्तस्फलान् हित्वाभस्मस्नानपरोभवेत्॥ ४५॥ स्कंदागस्त्यसंवादे॥ रक्षार्थंमंगलार्थंचपवित्रार्थं
चसत्तम॥ लिंगार्थंचापिभक्तानामुत्तमंभस्मदत्तवान्॥ ४६॥ तस्माद्भस्मसमंश्रेयोनभूतोनभविष्यति॥

शै०र० धनवम्भस्मसंग्रह्यभस्मस्नानंसमाचरेत्॥४७॥ अथविभूतिस्नानविधिः॥ प्रक्षाल्यपादौहस्तौचाचम्यत्रिःप्राणा
४२ मंकृत्वा॥ आग्नेयस्नानविधिस्नानमहंकरिष्ये॥ इतिसंकल्प्यविभूतिंगृहीत्वा॥ अग्निरितिभस्मावायुरितिभ
स्म॥ जलमितिभस्म॥ व्योमेतिभस्म॥ सर्वंहवाइदंभस्म॥ मनयेतानिचक्षुः ॐ सिभस्म॥४८॥ अग्नि
रस्मिजन्मनाजातवेदास्मतंमेचक्षुरमृतंममासन्॥ अर्कस्त्रिताभूतरजेसाविचिमानोजस्तोघर्मोहविरस्मनाम
इत्यनेनमंत्रेणसमस्तांगानिसंस्पृशेत्॥४९॥ पुनराचम्यपुनर्विभूतिंगृहीत्वावामहस्तवस्त्रेनिधायाग्निष्टोमात्मकं
कृत्वामत्तमंत्रेणैकादशवाराभिमंत्र्यसिरसि॥ॐ पंईशानायनमः॥ललाटे॥ॐ वामतत्पुरुषायनमः॥ हृदि॥ ओं
शिं अघोरायनमः॥ नाभ्यां॥ॐ मंवामदेवायनमः॥ पादयोः॥ॐ नंसद्योजातायनमः॥ सविभूतिन्यासंकृत्वा राम
पश्चात्॥ त्रियायुषंजमदग्नेः कश्यपस्यत्रियायुषं॥ अगस्त्यस्यत्रियायुषं॥ यद्देवानांत्रियायुषं॥ तन्मेअस्तुत्रियायु ४२
षं॥ ईशानादिपंचमंत्रेणपि॥ त्रियंबकंयजामहेसुगंधिंपुष्टिवर्धनं॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥ अ

थकालोत्तरे ।। भस्ममुष्टिं समादाय संहितामंत्रमंत्रितं ।। मस्तकाद्यादपर्यंतं भस्मस्नानं पुराहितं ।। ५० ।। तन्मं
त्रेणतु कर्त्तव्यं विधिस्नानं समाचरेत् ।। ईशानेपंचधा भस्म विकिरेन्मूर्ध्निपल्लतः ।। ५१ ।। मुखे च चतुर्धा चक्रेणाघोरे
णोवाष्टधा हृदि ।। वामेन गुह्यदेशे तु त्रिदश स्थानभेदतः ।। ५२ ।। अष्टावंते न सद्येन पादादुद्धूलयत्ततः ।। स
र्वांगोद्धूलनं कार्यं सद्योजातेन तत्त्वतः ।। ५३ ।। द्विजस्योद्धूलनं कार्यं राजन्यस्य यथाहितं ।। मुखं विना च तत्स्यु वैश्य उद्धू
लनं क्रमयोगतः ।। ५४ ।। ललाटमात्रमुद्धूलं वैश्यैः शूद्रे स्त्रिपुंड्रकं ।। अथवा तिलकं कार्यं स्नानं चैव तथोत्त
मे ।। ५५ ।। प्रक्षाल्य पादौ हस्तौ च समाचम्य पूर्ववत् ।। अदीक्षितस्तु वेदी शिवसंस्कारकर्मणि ।। ५६ ।। भूतिस्नान
विधिं कृत्वा शिवाग्ने हं प्रवेशयेत् ।। संध्यात्रये निशीथे च चर्यापर्वावसानयोः ।। ५७ ।। सुप्त्वा भुक्त्वा पयः पीत्वा
कृत्वा धावश्यकादिकं ।। स्त्रियं नपुंसकं गृध्रं विडालं बकमूषकं ।। ५८ ।। एष्वातथा विधानस्पाद्भस्मस्नानं समा
चरेत् ।। देवाग्निगुरुविघानां समीपे स्याज्जरदर्शने ।। ५९ ।। अशुद्धमनले मार्गे कुर्यान्नोद्धूलनं व्रती ।। ब्रह्मा च देवा ऋषयो गंध

शै०र० र्वोयस्सकिन्नराः ॥६०॥ मरुद्गणाः पितृगणास्सर्वे भूतगणा अपि ॥ नित्यं सर्वेषु यत्नेन भस्मस्नानं प्रकुर्वते ॥६१॥
४३ भस्मस्नानं जलस्नानादसंख्येयगुणाधिकं ॥ तस्माद्वारुणमुत्सृज्य स्नानमाग्नेयमाचरेत् ॥ ६२ ॥ दिव्यं वा
रुणं वायव्यं ब्राह्ममाग्नेयं चानुत्तमं ॥ इति मत्वा शिवो भस्मस्नानमादौ च कारयेत् ॥ ६३॥ वारुणं वारिणा स्नानं मा
ग्नेयं भस्मना भवेत् ॥ वृष्ट्यासात्तपया दिव्यं वायव्यं रजसा गवां ॥ मानसं ब्रह्मतादात्म्यं स्नानान्येतानि षड्विदुः ॥
६४॥ क्रियासारे ॥ भस्मस्नानं यतेरेव नियमेन सदोदितं ॥ त्रिपुंड्रधारणं स्नानं चारणं गृहमेधिनां ॥ ६५॥ भ
स्मस्नानविशुद्धात्मा जितक्रोधो जितेंद्रियः ॥ मत्समीपमुपागम्य न भूयः पुरुषो भवेत् ॥ ६६॥ अहं पशुपतिर्न्नाम
मद्भक्ता ये च मानवाः ॥ सर्वे पाशुपता ज्ञेया भस्मदिग्धतनूरुहाः ॥ ६७ ॥ भिमागमे ॥ सर्वतीर्थेषु यत्स्नानं सर्वयज्ञेषु यत् राम०
फलं तत्फलं कोटिगुणितं भस्मस्नानं न संशयः ॥ ६८॥ गारुडपुराणे ॥ पंचाक्षरजपं भस्मस्नानं लिंगार्चनं तपं ॥ ४३
कदाचिदपि न त्याज्यं यथाशक्त्या यथाविधि ॥ ६९ ॥ भस्मसर्वांगदिग्धांगो भस्मदीप्तत्रिपुंड्रका ॥ भस्मशायी च पुरुषो भस्म

निष्टाइतिस्मृतः ॥७०॥ भूतप्रेतपिशाचाश्चरोगाश्चातीवदुःसहाः ॥ भस्मनिष्ठस्यसान्निध्याद्विद्रावंतिनसं
शयः ॥७१॥ शातातपस्मृतौ ॥ सुरांपीत्वागुरुदारांश्चगत्वास्तेयंकृत्वाब्रह्महत्यांचकृत्वा ॥ भस्मच्छन्नोभस्मश
य्याशयानोरुद्राध्यायीमुच्यतेसर्वपापैः ॥७२॥ यद्वाकदायत्रचकुत्रसंभवेभस्मादृतस्यादिहरानकेनचा ॥
नतेनतुल्योभगवानजोपिश्रीभूतिधारीसशिवस्तथापि ॥७३॥ अथत्रिपुंड्रविधिः ॥ अथकालाग्निरुद्रंभगवं
तंसनत्कुमारःपप्रच्छ अधीहिभगवन्त्रिपुंड्रविधिंसतत्वं ॥ किंद्रव्यं ॥ किंस्थानं ॥ कतिरेखाः ॥ किंदैवतं ॥ काश
क्तिः ॥ किंफलमितिच ॥ तंहोवाच ॥ भगवन् ॥ यद्द्रव्यंतदाग्नेयं ॥ भस्मसद्यादिमंत्रैः परिगृह्याग्निरितिभस्मेत्यनेनचा
भिमंत्र्य ॥ मानस्तोकेतिसंमृज्यत्र्यायुषंजमदग्नेरितिशिरोललाटवक्षस्स्कंदेषुत्रियायुषैस्त्र्यंबकैस्तिस्रोरेखाः
प्रमाणमस्याललाटादाचक्षुषोर्भ्रूमध्यतोयाचास्यप्रथमारेखाः आहवनीयः ॥ अकारोरजोभूर्लोकःस्वात्माक्रिया
शक्तिः ॥ ऋग्वेदः ॥ प्रातःसवनंरुद्रोदेवता ॥ याचास्यद्वितीयरेखाः सागार्हपत्यउकारः ॥ सत्वमंतरिक्षमंतरात्माइ

शै॰ र॰ च्छाशक्तिर्यजुर्वेदो माध्यान्हिकसवनं महेश्वरो देवता ॥ याचास्य तृतीया रेखा सा दक्षिणाग्निर्मकारस्तमो द्यौः परमा
५५ त्माज्ञानशक्तिः सामवेदः सायंसवनं ॥ सदाशिवो देवेति त्रिपुंड्रं भस्मना करोति ॥ यो विद्वान्ब्रह्मचारी गृहस्थो वान
प्रस्थो यतिर्वा स समस्तपातकोपपातकेभ्यः पूतो भवति ॥ तेनेतिहासपुराणानां रुद्राणां शतसहस्राणि जप्तानि भ
वंति ॥ प्रणवानामयुतं जप्तं भवंति ॥ रुपे रुपे दशपूर्वान्पुनाति ॥ दशोत्तराणां च पङ्क्तिं पुनाति स समस्तमहातीर्थेषु
स्नातो भवति ॥ स सर्वकर्मसु योग्यो भवति ॥ देहं त्यक्त्वा शिवसायुज्यमेति ॥ न स पुनरावर्तते न स पुनरावर्तत इत्याह भग
वान्कालाग्निरुद्रः ॥ स्कांदे ॥ नृपाणामीश्वराणां च भस्ममिश्रेण चंदनं ॥ त्रिपुंड्रं विधिवत्कुर्यात्सुगंधेनापि वा गुह ॥ ७४ ॥ रा॰ म॰
शिवाग्निवीर्यं भसितं शक्त्यामृतसमावृतं ॥ अग्निहोत्रात्मकं योगात्त्रिपुंड्रादिकृतोऽधिकः ॥ ७५ ॥ शिवाग्निना तनुर्दग्धा ५५
शक्तिसोमामृते न यः ॥ प्लावये व्योममार्गेण सोऽमृतत्वाय कल्पते ॥ ७६ ॥ भस्मना चेत्त्रिसंध्यां च गृहस्थो जलसंयुतः
सर्वकाले भवेत्स्त्रीणां पतीनां जलवर्जितं ॥ ७७ ॥ वानप्रस्थेषु कन्यानां दीक्षाहीननृणां तथा ॥ मध्याह्नात्प्राग्जलैर्युक्तं च

रतोजलवर्जितं ॥७८॥ शुद्धशीतजलेनैव भस्मना च त्रिपुंड्रकं॥ योधारयेत्सरंब्रह्मसंप्राप्नोतिनसंशयः ॥७९॥ तस्मात्स
वैमयत्नेनस्नांतुसभस्मनापुनः॥ स्नांगेत्रिपुंड्रंसंधार्यसर्वदाशिवमर्चयेत्॥ ८०॥ मध्यमानामिकांगुष्ठैरनुलोमविलो
मतः॥ धारयेद्यस्त्रिपुंड्रांकं सरुद्रोनात्रसंशयः॥ ८१॥ क्रियासारे॥ मध्यांगुलित्रयेणैववस्वदक्षिणकरस्यतुषडं
गुलायतंमानमपिवालीकमानकं॥८२॥ षडंगुलप्रमाणेनब्राह्मणानांत्रिपुंड्रकं॥ नृपाणांचतुरंगुल्येवैश्यानांतु
द्व्यंगुलं॥ ८३॥ शूद्राणामथसर्वेषामेकांगुल्यंत्रिपुंड्रकं॥ भीमसंहितायां॥ मूर्धोललाटकंठेचस्कंधौत्रेबाहुतये
नच॥ हृदयंनाभिपृष्ठेचद्वयस्त्रोवैसंधयःक्रमात्॥ ८४॥ मूर्ध्निस्याद्ब्रह्मणःप्रीतिर्ललाटेचसरस्वती॥ कंठेलक्ष्मीर्भवे
त्प्रीतिः कर्णोश्रीरानिपार्वती ॥८५॥ रुद्रप्रीतिकरौबाहूहृदयंचेश्वरप्रियं॥ अनेनविधिनाचैवविभूतिंधारयेत्सुधीः॥८
६॥ क्रियासारे॥ एकादशत्रिपुंड्रस्यस्थानान्याहुःशरीरके॥ नान्यहेत्रिदशप्येष्ठकधामिस्तुणक्रमात्॥८७॥ शिरोल
लाटश्रवणद्वयंग्रीवाभुजद्वयं॥ वक्षोनाभिःपृष्ठभागंककुद्दिसेकतोदश॥ ८८॥ स्थानानिचत्रिपुंड्रस्यविज्ञेयानिम

शै॰र॰ नोषिभिः॥ त्रिपुंड्रमुक्तस्थानेषु दद्यात्सजलभस्मना ॥८९॥ मूर्ध्नि स्रवणयोस्थाने जलं संस्पर्शमात्रतः॥ एवं त्रिपुंड्रं सं
४५ धार्यतेषु रुद्रान्स्मरेद्विभून् ॥९०॥ शिवो महेश्वरो रुद्रः श्रीकंठः शंभुरीश्वरः॥ महादेवः पशुपतिः शंकरश्च वृषध्वजः॥
९१॥ परमात्मेसमी रुद्रा भालादिषु यथाक्रमं॥ शुद्धस्फटिकसंकाश एकवक्त्रस्त्रिलोचनः॥ ९२॥ स चंद्रार्धजटाज
टो नागाभरणभूषितः॥ शितक्षौमांबरधरः कंठेकाश्चतुर्भुजः॥ ९३॥ दिव्यगंधानुलिप्तांगो दिव्यपुष्पैरलंकृतः॥ सर्वलक्ष
णसंपन्नः सर्वावयवसुंदरः॥ सितपद्मासनासीनः पूर्णचंद्रनिभाननः॥ ९४॥ मृगटंकधरः शांतो वरदाभयपाणयः॥ येते
ध्येयास्त्रिपुंड्रेषु परमात्मानमर्जयः॥ ९५॥ ऋजुमेन मनआनंस्त्रिगंधगांऽप्रमाणवत्॥ एवं हि लक्षणोपेतानंतं त्रिपुंड्रं सर्वसिद्धि
दं॥ ९६॥ मलिनं पुरुषं वक्रं छिन्नं च विरलं युतं॥ एवं बहुदोषसंयुक्तं त्रिपुंड्रमशुभावहं॥ ९७॥ एषां वपुर्मनुष्याणां त्रि राम॰
पुंड्रेण विनास्थितं॥ श्मशानसदृशं यत्तन्नप्रेक्ष्यं पुण्यकृज्जनैः॥ ९८॥ भीमसंहितायां॥ त्रिपुंड्रं बिंदुदीपं च त्रिमूलं चार्ध ४५
चंद्रकं॥ सर्वांगोद्धूलनं चैव षडेते शैववांछिताः॥ ९९॥ यथेष्टं कारयेद्धीमान्त्रियापुषमितिश्रुतेः यावंतः पतिताभस्मो भ

स्मनः परमाणवः ॥ तावद्वर्षसहस्राणि नरो भवति किल्बिषी ॥ १०० ॥ दधिक्षीरंघृतंचैवतैलंमधुगुडंतथा ॥ नारिकेलंतस्यस
लिलमुपदंशोपदेशकं ॥ १ ॥ कीटेनचान्नदुष्टंवान्नभोज्यंगर्हितंत्वयत् ॥ ततावन्मात्रमुच्यस्यभस्मक्षेपणमुच्यते ॥ २ ॥
स्स्तपः सर्वेवेदाश्चपुराणान्यखिलानिच ॥ वदंतिभूतिमाहात्म्यंतत्तत्संधारयेद्बुधः ॥ ३ ॥ ब्रह्मांडपुराणे ॥ विप्राणां
वेदविदुषांवेदांतज्ञानवेदिनां ॥ सितेनभस्मनाकार्यंत्रिपुंड्रमितिपद्मभूः ॥ ४ ॥ कूर्मपुराणे ॥ सर्वेतपस्विनः प्रोक्ताः सर्वे
यज्ञेषुभागिनः ॥ रुद्रभक्ताः स्मृताः सर्वेत्रिपुंड्रांकितमस्तकाः ॥ ५ ॥ संवर्त्तस्मृतौ ॥ श्राद्धेयज्ञेजपेहोमेवैश्वदेवेसुरार्चने
॥ धृतत्रिपुंड्रपूतात्मामृत्युंजयतिमानवः ६ त्रिपुंड्रधृक्विप्रवरोयोरुद्राक्षधरः शुचिः सपङ्क्तिः पावनः श्राद्धेपूज्योविप्रैः
सुरैरपि ॥ ७ ॥ स्कांदे ॥ तेनाधितंश्रुतंतेनतेनसर्वमनुष्ठितं ॥ येनविप्रेणसिरसित्रिपुंड्रंभस्मनाधृतं ॥ ८ ॥ त्यक्तवर्णाश्रमा
चारोलुप्तवर्णक्रियोपियः ॥ सकृत्तिर्यक्त्रिपुंड्रांकधारणात्सोपिपूज्यते ॥ ९ ॥ ७ ॥ कूर्मपुराणे ॥ त्रिपुंड्रंब्राह्मणोविद्वान्म
नसापिनलंघयेत् ॥ श्रुत्वाविधिंयतेयस्नानत्यागीपतितोभवेत् ॥ १० ॥ वेदस्याध्ययनेशूद्रोनाधिकारीयथाभवेत् ॥ त्रिपुं

शै·र· ड्रेणविनाविप्रोनाधिकारीशिवार्चने ॥११॥ त्रिपुंड्रधारणंमुक्त्वामुक्तिमिछतियःपुमान्॥ विषपानेननिसत्वंकुरुतेस्वा
४६ त्मनोहिंसः॥१२॥ यथाकृशानुरहितस्त्वध्वरोनविराजते॥ अशेषसाधनोपेतंभस्महीनंशिवार्चनं॥१३॥ ननस्नानं
ननतज्ज्ञानंननतत्तपः॥ विनातिर्यक्त्रिपुंड्रांकंविप्रेणयदनुष्टितं॥१४॥ धिक्भस्मरहितंफालंधिक्ग्राममशिवालयं
॥ धिग्विनेशार्चनंजन्मधिक्विद्यामशिवाश्रयां १५ स्त्रम्हास्टिष्टिछलेवाहत्रिपुंड्रस्यप्रशस्ततां॥ ससर्जेचललाटंहि
तिर्यग्रेखंनवर्तुलं॥ १६॥ दुःशीलःशीलयुक्तोवापापीवाकोवाप्यलक्षणः॥ भूतिशासनसंयुक्तःसपूज्योराजपुत्रवत्॥
१७॥ त्रिपुंड्रंयेविनिंदंतिनिंदंतिशिवमेवते॥ धारयंतिचयेभक्त्याधारयंतितमेवते॥१८॥ श्रीभूतिमात्रमाहात्म्यंवक्तुंत्र रा·म·
ह्मानशक्नुयात्॥ किंपुनःसंस्कृतंभस्मंमानवोवक्तुमुत्सहे ॥ १९ ॥ तिर्यक्त्रिपुंड्रमाहात्म्यंयःपठेत्सततंनरः॥ इहेष्टा ४६
न्सकलान्प्राप्ययात्यंतेपरमंपदं ॥ २० ॥ इतिश्रीशैवरत्नाकरेसप्तमोध्यायः ॥७॥ रुद्राक्षमाहात्म्यं॥ रुद्रा
क्षमाहात्म्यंकात्यायनशाखायां ॥ अथाहेनंभगवंतंरुद्रंकुमारः॥ ॥पप्रछभगवन्कथंरुद्राक्षोत्पत्तिस्तद्धारण

फलंकिमिति॥ तंहोवाचभगवान्रुद्रः॥पुरात्रिपुरवधायोन्मीलितनाक्षोहंतेभ्योजलबिंदवोभूमौपतितास्तेरुद्राक्षाजा
ताः॥सर्वानुग्रहार्थायतेषांनामोच्चारणेनदशशतगोदानफलंभवति॥ दर्शनस्पर्शनाभ्यांद्विगुणंत्रिगुणंफलंभवति
॥ अतऊर्ध्वंवक्तुंनशक्नोमिति॥ कुमारततोजपसमंत्रकधारणविधिंकथयामि॥ स्नानविधिनास्नातःशुचिराग्नेय
स्नानंत्रिपुंड्रधारणंचकृत्वा॥ एकास्यादिचतुर्दशांतानांरुद्राक्षक्रमेणमंत्रास्तु॥ ॐ॥ हुं॥ सुं॥ क्रुं॥ रुं॥ जुं॥ भ्रांरूं
मपि॥ स्त्वमपिसांस्त्वमपिक्षांस्त्वमपिक्षांह्रींनमोनमोमिति॥ पूर्वोक्तमंत्रानंतरोक्तान्जपेद्धीमान्॥ स्ना
णानायस्यसमस्तपापक्षयार्थंशिवज्ञानप्राप्त्यर्थंसमस्तमंत्रैःरुद्रधारणंकरिष्यामि॥ इतिसंकल्प्यशिखायामे
काश्यंश्रीसदाशिवायनमइति॥ द्विमिहद्वादशवक्त्राणिशिरसि॥ वह्निसूर्यासोमाधिपायशिवायनमइति॥ एकादश
वक्त्रंषट्त्रिंशन्मूर्ध्नि॥ षट्त्रिंशत्तत्वात्मकायपरशिवायनमइति॥ पंचदशसप्तवक्त्राणिकर्णयोरेकमेकंसोमायनमइति॥
षडष्टवक्त्राणिकंठेद्वात्रिंशत्त्रिवक्त्रकलात्मने श्रीकंठायनमइति॥ चतुर्वक्त्रंपंचाशन्मातृकाउरसि॥ श्रीकंठादिमूर्त्यात्मका

शो.र. यपरशिवायनमइति ॥ पंचदशमनववक्त्राणि कर्णयोरेकमेकं सोमायनमइति । षड्भ्रवक्त्राणि कंठे द्वात्रिंशत्त्रिवकक्
४७ त्रात्मने श्रीकंठायनमइति ॥ चतुर्वक्त्रं पंचाशन्मालिकामुरसि ॥ श्रीकंठादिमूर्त्यात्मकाय श्रीसर्वज्ञायनमइति ॥ बाह्वो^
स्त्रयोदशवक्त्राणि षोडशषोडश ॥ सुखासनादिषोडशमूर्त्यात्मकाय श्रीकंठायनमइतिदक्षिणे ॥ श्रीसोमकलात्म
काय श्रीसोमनाथायनमइति वामे ॥ मणिबंधयोर्नववक्त्राणि द्वादशद्वादशगणादिस्याधिपाय श्रीमहादेवायनमइति द
क्षिणे ॥ केशवादिमूर्त्याधिपाय श्रीउमापतयेनमइति ॥ वामे ॥ अष्टोत्तरशतं चोपवीतं चतुर्दशवक्त्राणि शतरुद्र
विधेश्वरात्मकाय श्रीविश्वेश्वरायनमइति बोधायनशाखानां ॥ नानिहाबाये भानि रुद्राक्षाणि यन्नवेदाधारयंति ॥ तस्मा राम.
द्दाधारयेति ॥ यस्मात्धारयन ॥ गछन्तिष्ठन्स्वपन्रवादन्नश्निपन्तुन्निषन्नपि ॥ सर्वो एष नोक्षितरतिरुद्रो भूत्वा रुद्रो^ ५७
भवति ॥ यएवंविद्वान्ब्रह्मचारी गृहस्थो वानप्रस्थो यतिर्वा धारयेत् ॥ पदेपदेश्वमेधशतफलं प्राप्नोति ॥ लैंगे ॥ रुद्राक्षा
न्धारयेद्भिक्षः संध्यादिषु च कर्मसु नत्सर्वं समवाप्नोति कोटिकोटिगुणं सदा ॥१॥ स्नाने दाने जपे होमे वैश्वदेवे सुरार्चने ॥

मायश्चिनेतथाश्राद्धेदेशेकालेविशेषतः॥ अरुद्राक्षधरोभक्त्यायत्किंचित्कर्मवैदिकं॥ कुर्वन्विप्रस्तुयोमोहान्ना
सावाप्नोतितत्फलं॥२॥ खादन्मांसेपिवन्मद्यंसंगछन्नंत्यजामपि॥ सद्योभवंतिपूतात्मारुद्राक्षेशिरसिस्थितो॥३॥
मानवपुराणे॥ रुद्राक्षंधारयन्पापंकुर्वन्नपिसमानवः॥ सर्वेनरतिपाप्मानंजावालश्रुतिराहिता॥४॥ अस्मिन्नर्थे
स्कांदे॥ स्कंदउवाच॥ भगवन्देवदेवेशसर्वज्ञपरमेश्वर॥ पृच्छामित्वांमहाभक्त्याकथयस्वमसादरतः॥ वामदक्षिण
सिद्धांतेकथितंहिमहापुराणं॥ पुराणानांपरमंपुण्यंसर्वविघ्नपापनाशनं॥६॥ रुद्राक्षधारणंपुण्यमिहलोकेपरत्रच॥
कस्माज्जातंतुकिंनामकथंवाधार्यतेनरैः॥७॥ कतिभेदमुखान्मंत्रकैर्मंत्रैः कथयस्वमे॥ ईश्वरउवाच॥ शृणुषण्मुखतत्त्वे
नकथयामितत्समासतः॥८॥ त्रिपुरोनामदैत्यस्तुपुरासीत्सर्वदुर्जयः॥ जितास्तेनसुराःसर्वेब्रह्मविष्ण्विंद्रदेवताः
९॥ चिंतितंचमयापुत्रघोरास्त्रमनुत्तमं॥ सर्वदेवमयंदिव्यंज्वलितंघोररूपकं॥१०॥ त्रिपुरस्यवधार्थायदेवा
नांत्राणनायच॥ सर्वविघ्नप्रशमनमघोरास्त्रंतुचिंतितं॥११॥ दिव्यवर्षसहस्राणिचक्षुरुन्मीलितंमया॥पुरा

शै॰र॰ भ्यां चारुनासिभ्यां पतिता जलबिंदवः ॥१२॥ तत्रास्तु बिंदवो जाता महारुद्राक्षवृक्षकाः ॥ स्थावरत्वमनुप्राप्य भ
४८ क्तानुग्रहकारिणात् ॥ १३ ॥ रुद्राक्षाणां फलं वत्स त्रिषु लोकेषु विश्रुतं ॥ लिंगस्य दर्शने पुण्यं भवेद्रुद्राक्षदर्शना
त् ॥१४॥ भक्त्या रात्रौ दिवा पापं दिवा रात्रिकृतं भवेत् ॥ लक्षं तु दर्शनात्पुण्यं कोटिसंस्पर्शनाद्भवेत् ॥ १५ ॥ न तत्कोटि
समं पुण्यं लभते धारणान्नरः ॥ लक्षकोटिसहस्राणि लक्षकोटिशतानि च तज्जपाल्लभते पुण्यं नात्र कार्या विचार
णा ॥ १६ ॥ हस्ते चोरसि कंठे च कर्णयोर्वापि मस्तके ॥ मुच्यते सर्वपापेभ्यो नरो रुद्राक्षधारणात् ॥ १७ ॥ शिरोमा
ला च षट्त्रिंशद्द्वात्रिंशत्कंठमालिका ॥ कूर्परे षोडश प्रोक्ता द्वादशं मणिबंधयोः ॥ १८ ॥ उरोमाला च पंचाशदष्टोत्त राम॰
रशतं तथा शिरसा धार्यते कोटिः कर्णाभ्यां दशकोटयः ॥ १९ ॥ गले वध्वा शतं कोटिर्मूर्ध्नि कोटिसहस्रकः ॥ अयुतं ४८
चोपवीतं च लक्षकोटि भुजद्वये ॥ २० ॥ अप्रमेयफलं हस्ते रुद्राक्षं मोक्षसाधनं ॥ अवध्यः सर्वभूतानां रुद्रवद्विच
रेद्भुवि ॥ २१ ॥ सुराणामसुराणां च वंदनीयो यथा शिवः रुद्राक्षधारणान्नित्यं वंदनीयो नरैरिह ॥ २२ ॥ उच्छि

षोवा विकर्मस्थो युक्तो वा सर्वपातकैः ॥ मुच्यते सर्वपापेभ्यो नरो रुद्राक्षधारणात् ॥ २३ ॥ रुद्राक्षमालि
कां कंठे धारयेद्भक्तिवर्जितः ॥ पापकर्मापि पापोपि स रुद्रलोके महीयते २४ रुद्राक्षं कंठमाश्रित्य श्वापि वा
न्म्रियते यदि ॥ सोपि रुद्रत्वमाप्नोति किंपुनर्मानुषादयः २५ ध्यानधारणहीनोपि रुद्राक्षं यदि धारयेत् ॥ सर्व
पापविनिर्मुक्तः स याति परमां गतिं ॥ २६ ॥ शुचिर्वाप्यशुचिर्वापि अभक्ष्यस्य च भक्षकः ॥ अगम्यागमनश्चैव ब्रह्म
हत्या गुरुतल्पगः ॥ २७ ॥ म्लेछो वाप्यथ चंडालो युक्तो वा सर्वपातकैः ॥ रुद्राक्षधारणादेव स रुद्रो नात्र संश
यः ॥ २८ ॥ स्कंदः ॥ तेषां नानामुखानां तु देवताश्च सुरेश्वरः ॥ गुणाश्च कीदृशास्तेषां कथयस्व यथार्थकः ॥ ईश्वर उ
वाच ॥ शृणु षण्मुख यत्नेन वक्त्रे वक्त्रे यथाफलं ॥ एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति ॥ द्विवक्त्रमी
श्वरेशानो गोवधं नाशयेद्ध्रुवं ॥ ३० ॥ त्रिवक्त्रमनलः साक्षात्स्त्रीहत्यां दहति क्षणात् ॥ चतुर्वक्त्रः स्वयं ब्रह्म पुरु
षहत्यां व्यपोहति ॥ ३१ ॥ पंचवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ॥ अगम्यागमनश्चैव अभक्ष्यस्य च भक्ष

शै॰ र॰ कः ॥३२॥ मुच्यतेसर्वपापेभ्योपंचवक्त्रस्यधारणात् ॥ षड्वक्त्रंकार्तिकेयस्तुधारयेद्दक्षिणेकरे ॥ ब्रह्महत्यादिभिःपा
४९ पैर्मुच्यतेनात्रसंशयः ॥३३॥ सप्तवक्त्रेमहासेनअनंतोनामनामतः ॥ गोवधस्वर्णस्तेयाभ्यांमुच्यतेसर्वदाबुधाः
॥ ३४ ॥ अष्टवक्त्रंमहासेनसाक्षाद्देवोगणाधिपः ॥ घोरकूटंतुलाकूटंसर्वकूटंतथैवच ॥ दुर्विचित्रकरेरौवसंस्पर्शेहा
गुरुस्त्रियं ॥ एवमादीनिपापानिहंतिसर्वाणिसर्वदा ॥ ३६ ॥ विघ्नास्तस्यप्रणश्यंति अंतेयातिपरंपदं ॥ गुणेनेनानल
भेत्सर्वानष्टवक्त्रस्यधारणात् ॥ ३७ ॥ नववक्त्रंभैरवंचधारयेद्वामहस्तके ॥ भुक्तिदंमुक्तिदंप्रोक्तंममसाम्यबलोभवेत् ॥
३८ ॥ लक्षकोटिसहस्राणिपातकानिकरोतियः ॥ तत्सर्वंदह्यतेशीघ्रंनववक्त्रस्यधारणात् ॥ ३९ ॥ दशवक्त्रंभवेद्दस्त ए म
साक्षाद्देवोजनार्दनः ॥ ग्रहाश्चैवपिशाचाश्चवेतालाब्रह्मराक्षसाः ॥ ४० ॥ पन्नगाश्चापियेचान्येसर्वेनश्यंतिधार ४९
णात् ॥ वक्त्रैकादशरुद्राक्षंरुद्राएकादशस्मृताः ॥ ४१ ॥ शिखायांधारयेन्नित्यंतस्यपुण्यफलंशृणु ॥ अश्वमेध
सहस्रस्यवाजपेयशतस्यच ॥ गवांशतसहस्रस्यसम्यग्दत्तस्ययत्फलं ॥ तत्फलंसमवाप्नोतिवक्त्रैकादशधारणात् ४३

रुद्राक्षंद्वादशंवक्त्रंकंठेदेशेतुधारयेत्॥ आदित्यास्तर्पितास्तेनद्वादशात्मव्यवस्थितं॥ गोमेधस्याश्वमेधस्य
वहुस्वर्णस्ययत्फलं॥ ५४॥ तत्फलंलभतेमर्त्योनात्रकार्याविचारणा॥ दंष्ट्रिणांशृंगिणांचैवखड्गवज्रनिवा
रणं॥ ५५॥ नचैवाग्निभयंचैवनचव्याधि प्रवर्त्तते॥ कर्तुस्ताभसुखंचैवमैश्वर्यंनदरिद्रता॥ ५६॥ हस्त्यश्व
मृगमार्जालसर्पमूषकदुर्दुरान्॥ श्वोष्ट्रजांश्वशृगालांश्चहत्वावहुविधानपि॥ पापैःप्रमुच्यतेसर्वैर्वक्त्रद्वादशधा
रणात्॥५६॥ वक्त्रत्रयोदशंवक्त्रैस्तरुद्राक्षंयदिधारयेत्॥ कामदंसिद्धिदंज्ञेयंसर्वसिद्धिप्रदायकं॥ रसंरसा
पनंचैवधातुवादस्तथैवच॥ सिध्यंतितस्यवैसर्वंभाग्यहीनोपियोनरः॥४८॥ मातापितानथावंधुर्भ्रातांचैवनिहन्य
ते॥मुच्यतेसर्वपापैस्तुवक्त्रैस्त्रयोदशं॥ ४९॥ वक्त्रंचतुर्दशंवक्त्रंरुद्राक्षंयदिधारयेत्॥ धारयेत्सततंमूर्ध्निसतुवंधु
शिवस्सतु॥ ५०॥ किंपुनर्वहुनोक्तेनवर्णनेनपुनःपुनः॥पूजितःसततंदेवैःप्राप्यतेपुण्यमुत्तमं॥ ५१॥श्रुणुषण्मु
खयत्नेनवक्त्रैवक्त्रैयथाविधि॥ अमंत्रधारणादेवगुणाप्येतेप्रकीर्तिताः ५२ सर्वांश्चमंत्रसंयुक्तान्धारयेत्सुविमानवः॥

शै·र· गुणास्तस्यचमाहात्म्यंकथितुंनैवशक्यते ॥ ५३ ॥ इदानींमंत्रमुद्दिश्यंनेरकवक्त्रादि ॥ ॐ ॥ हुं ॥ चं ॥ कं ॥ हुं ॥ क्लें
५० ॥ मां ॥ ह्रां ॥ ह्रीं ॥ हं ॥ रुं ॥ क्षों ॥ कीं ॥ उं ॥ उमापति ॐ ॥ त्रिपुंड्रधृग्विप्रवरोयोरुद्राक्षधरः शुचिः ॥ सपङ्क्तिःपा
वनःश्राद्धेपूज्योविप्रैःसुरैरपि ॥ ७ ॥ इतिशैवरत्नाकरेरुद्राक्षमाहात्म्यमष्टमोध्यायः ॥ ८ ॥ ॥ गुरुशिष्यलक्ष
ण ॥ अतःपरंप्रवक्ष्यामिगुरोःशिष्यस्यलक्षणं ॥ शुभ्रपापाः क्रमस्त्रैवश्रुणुष्वचतुरानन ॥ १ ॥ सद्वंशजःसु
पूर्णांगः प्रशांतः प्रियभाषणः ॥ गंभीरः सत्स्ववाग्वाग्मीसंतुष्टः करुणास्परः ॥ स्निग्धस्मितमुखोरागोमत्रगल्भोनि
रहंकृतिः ॥ शुचिः सुशीलोधार्मिष्टोसदाक्षिण्यो दृढध्वनिः ॥ ३ ॥ निर्मत्सरोगुणग्राहीप्रशान्तोविजितेंद्रियः ॥ वेदा
गमकृताभ्यासःपुराणःस्मृतिवित्तमः ॥ ४ ॥ सर्वागमेषुकुशलःकुलीनश्चमहामतिः ॥ मंत्रोद्धारप्रवीणश्चमंत्रार्थप्र राम·
दिपारिकः ॥ ५ ॥ शिवस्यचगुरोर्भक्तिःशिवेकाहितमानसः ॥ शिवार्चनासक्तचित्तःशिवध्यानेकतत्परः ॥ ६ ॥ ए ५०
तल्लक्षणसंयुक्तोगुरुरित्यभिधीयते ॥ निराकारंनिरालंबंनिर्मलंनिर्विकल्पकं ॥ ७ ॥ निर्गुणंनिश्चलंनित्यंपरात्परपदंगु

रुः ॥ आधाराधेयस्याधिष्ठमाद्यंतरहितोगुरुः ॥ ८ ॥ मनसोवाचकस्यैवगुरोर्भावस्यगोचरः ॥ गुरुमूर्तिः शिवः साक्षा
नान्यथाचसुरेश्वरः ॥ ९ ॥ वसंतेपादयुग्मेतुत्रैलोक्यंसचराचरं ॥ अंगुष्ठाग्रेष्वशेषेणतीर्थानिनिवसंतिवै ॥ १० ॥ नक्ष
त्रग्रहवृंदानिगुल्फेतस्यवसंतिवै ॥ सप्ताब्धयस्यपादाधस्तदूर्ध्वेष्टकुलानगाः ११ जंघयोर्वसतेनित्यंषट्
त्रिंशत्तत्त्वरूपधृक् ॥ सर्वतत्त्वः परितत्त्वस्थगुरुः परमकारणं ॥ १२ ॥ गुरुर्देवंमहादेवमेकीभावेनभाविताः ॥
त्रिषुलोकेषुपूज्यंतेतेनरागुरुभक्तितः ॥ १३ ॥ हररूपंसमादायपशुंजांगरक्षामिसर्वदा ॥ गुरुरूपंसमादायभव
याशंनिकृंतति ॥ १४ ॥ पशुनाथंशिवस्तस्मात्सम्यगंपतिरित्यभूत् ॥ पशुपाशविनिर्मुक्तोगुरोराज्ञांनिरीक्षयत् ॥
१४ ॥ त्रिसंध्यंतुगुरोः प्रज्ञाकर्तव्याहितमिच्छता ॥ योगुरुः सशिवः प्रोक्तोयः शिवः सगुरुःस्मृतः ॥ १५ ॥ यथा
शिवस्तथाविद्यायथाविद्यातथागुरुः ॥ शिवविद्यागुरूणांचपूजायाः सदृशंफलं ॥ १६ ॥ एषांचतुर्णांवर्णानां
गृहस्थानांचयोषितां ॥ गुरुर्गृहस्थएवस्यान्नकदाचिद्यतिर्गुरुः ॥ १७ ॥ अयमेवयतीनांस्याद्यतिर्गुरुर्यथापिवा ॥

श्लो०र० यथाहंसर्वलोकानांगुरुरंबिकयासह ॥ १८ ॥ तस्मादयंसमस्तानांगुरुराश्रमिणामज ॥ अनेनयाः प्रतिष्ठायाः क्रि
५१ यास्ताः सफलाः स्मृताः ॥ १९ ॥ एकएवगुरुर्ब्रह्मन्नस्मात्सर्वात्मजन्मनां ॥ इत्थंमेषांवसर्वेषांयथाहंजगतांतथा
॥ २० ॥ हायनैरधिकोवालोगुरुराख्यातलक्षणैः ॥ समस्तैः सहितः सम्यग्यः सएवगुरुर्भवेत् ॥ २१ ॥ वयसेवा
किमाधिक्यमाधिक्यंज्ञानमेवहि ॥ तस्मात्ज्ञानाधिकंशिष्योगुरुमेवसमाश्रयेत् ॥ २२ ॥ शिष्यस्तुशिक्षणीय
त्वाद्गुरुर्गौरवकारणात् ॥ तस्मात्सर्वप्रयत्नेनगुरुर्गौरवमाचरेत् ॥ द्विजातिर्वाचसच्छूद्रः स्वस्वोक्ताचारवान्शुचिः ॥
सस्वाग्गुरुभक्तश्चदंभाहंकारवर्जितः ॥ रागद्वेषविनिर्मुक्तः शांतः सर्वजनप्रियः ॥ गर्वोत्ताचकितः सौम्यः शिष्य राम
इत्यभीधीयते ॥ २५ ॥ उक्तलक्षणसंपन्नोयस्मिन्देशेगुरुस्थितः ॥ तत्रशिष्यः स्वयंगत्वाप्रणमेद्दंडवद्गुरुं ॥ २६ ॥ ५१
ततः कुर्वीतशुश्रूषांसम्यक्स्वहृदहर्गुणैः ॥ अब्दस्त्वयोवैकोद्वौमासषट्कंमथापिवा ॥ अथवात्रिदशप्रेष्ठगुरुरूपीवस्म
सोदति ॥ तावच्छुश्रूषयेच्छिष्योदृढाकर्मक्रियाधनैः ॥ २८ ॥ मनस्यनारतंसम्यग्गुरोराकारचिंतनं शुश्रूषोपायचिं॥

तावत्स्वशुश्रूषोत्परा स्मृता ॥ २९ ॥ देवर्षिं किं कर्म कर्तव्यं तथैवेत्युत्तरं पुनः ॥ एवमादिक्रियोक्तिस्त्वसाकशुश्रू
षिका स्मृता ॥ ३० ॥ समीपे वातिदूरे वा स्वशरीरं निवेदनं ॥ गत्यागत्यादिकार्या सा स्वभार्पानं देवैः स्तथा ॥ ३१ ॥
प्रदक्षिणानमस्कारं सम्यक् कृपाराजसेवनं ॥ पयसाज्येन दध्ना गोमुद्रेनाग्निप्रलेपनं ॥ ३२ ॥ ततः स्वक्षरोर्मेजन्य चूर्णेनो
ष्मनसलिलेनच ॥ प्रक्षालसायवस्त्रेणान्तधाईत्वप्रमार्जनं ॥ ३३ ॥ शेत्र्य संस्तरणं सम्यक् कोशसंमार्जनं नवैः तैलाभ्यं
गक्रियाचायस्नानकर्मयथाशुभं ३४ श्रीखंडघर्षणं पुष्पमालिकाचारुचंदनं शौचार्थं मज्जलानीतिदंतका
ष्ठप्रदेशनं ३५ पुजास्थानानुलेपं च गोमयेन सवारिणा पुजापुष्पजलानीति तत्र योग्यप्रदेशनं ३६ एव
मादीनि चान्यानि गृहकर्माणि यानि वै तेषामहरहः कर्मकार्यशुश्रूषिका स्मृता ३७ धान्यस्वर्णपशु
क्षेत्रदासीदासांवराणि च पर्यंकभूषणान्यत्र त्रिदिपादीच षट्कादयः ३८ चंदनाद्यनुलेपोक्तद्रव्या॰
णि सुरभीणि च केशानुलेपद्रव्याणि कस्तुर्याद्यानि यानि च ३९ तुरंगमं गजांदोलसंदनानि शुभानि च

शै॰र॰ तेषांप्रदानंसम्भक्त्याधनशुश्रूषकास्मृता ४० द्रव्यसामर्थ्यसंपन्नोयःकश्चिच्छिष्यकःसदा सर्वशुश्रूषि
५२ कांकुर्यात्स्वगुरोरेवभक्तितः ४१ शुश्रूषांकायकीमेकांविनानास्तित्रिधाःसदा कुर्यान्नृपोन्याःशु
श्रूषाःसर्वाःकुर्युस्त्रियोभृशं ४२ हीनवंतेपियेजाताभक्ताश्चेदीश्वरेयदि तेपिस्वयोग्यशूश्रूषां
कुर्युरिष्टार्थसिद्धये ४३ आनीयभूपतिर्भक्त्यागुरुंदेशांतरेस्थितं स्वस्थानेस्थाप्यशुश्रूषांत्रिविधांका
रयेत्सदा ४४ गुरोःप्रियाणिद्रव्याणियानिकानितदन्वहं तानिभक्त्याप्रदेयानिशिष्येणाशुलभानि
च ४५ गुरुंदिदृक्षुर्यःशिष्यःसम्भक्त्यानुदिनंसदा रिक्तपाणिर्नसंपश्येद्यथाराजातथागुरुः ४६ राम॰
फलंप्रसूनंतांबूलमन्यत्किमपिवस्तुच गृह्यैकंगुरवेदत्वानमस्कार्यौततोगुरुः ४७ गुरुंस्वगृहमाया ५२
तंदृष्ट्वाभक्तिरतोनृपः गत्वोन्नतासनंदत्वाचासीनतदनुज्ञया ४८ तांबूलमुत्तमंस्मैततःपात्रेणाक्षयये
त् पश्चाद्दिष्टानिवस्तूनिदत्वानत्वाविसर्जयेत् ४९ भोगार्थयांस्त्रियंमोहाद्गुरुर्यद्यभिवांछति भक्त्याते

नगताचेत्सासर्वपापैःप्रमुच्यते ५० संभोजपित्वासगुरुपश्चाद्भुंजीतबुद्धिमान् गुरोःपुरस्ताद्योभुंक्तेगुरुद्रोही
सउच्यते ५१ शिष्येणभोजनात्पूर्वंनभोक्तव्यंकदाचन भोजनानंतरंश्रीयात्सगुरुःयःसपुण्यभाक् ५२
यानिभक्ष्याणिनव्यानिकंदमूलफलानिच अपूर्वाण्युपदेयानिगुरोःपूर्वंनभक्षयेत् ५३ योभक्त्यास्वगुरो
र्भुक्तंशिष्यःपात्रेन्नमुज्झितं भुंक्तेससर्वदुरितैर्मुच्यतेनात्रसंशयः ५४ प्रदत्तंयस्तुगुरुणातांबुलंपरिचर्वि
तं शिष्यतद्भक्षयेद्भक्त्याशुद्धांतःकरणोभवेत् ५५ स्वाचार्यचरणद्वंद्वंप्रक्षालितजलंसदायःपिबेद्धार
येद्भक्त्यासर्वपापैःप्रमुच्यते ५६ शुभकार्येषुसर्वेषुविवाहादिषुभक्तितः गुरुमभ्यर्च्ययेद्विष्णोवस्त्रहेमां
गुलीयकैः ५७ तत्रापिचसभापूजाविधिःपूर्वंगुरुंयजेत् ततःसभांयजेद्योग्यांक्रमेणैवयथाशुभं ५८
सभांतरेगुरुंधीमान्कदाचिदपिनार्चयेत् आसनस्थंविमुख्यांघ्रिंगंधपुष्पाक्षतैर्यजेत् ५९ ततोर्घ्यंयेत्स्वगु

शै॰र॰ गुरवेवस्त्रहेमांगुलीयकान् कार्तिकस्यचतुर्दश्यांविष्णुयुग्मेयनद्दये ६० ग्रहणोचार्चयेच्छिष्योगुरुंवैमौक्तिकां
५३ भुक्तैः ६१ दरिद्रश्चेद्दिएनेषुनिजशक्तिमवंचयन् अवश्यमर्चयेच्छिष्योगुरुंलब्धधनेनवा दरिद्रश्चेत्स्वयं
शिष्यःप्रतिसंवत्सरंयजेत् ६२ वासःप्रावरणेदद्यादवस्यंनेत्रवस्त्रभे चंदनंचाक्षतंपुष्पंस्वर्णंतांबुलमंब
रं ६३ पात्रेनिधायगुरवेशिष्योदद्यात्नपाणिना न्यायार्जितंस्वीतंस्वर्णमुख्यंयव्द्यवहारतः ६४ नदेवदे
यंगुरवेदेयाद्द्रामेयियहरं पन्नुनंव्यवहारेनुतच्चास्वर्णंकदाचन ६५ नदद्याद्गुरवेदानंमनुष्यःफल राम॰
५३

वांच्छकः नुतनंसदृढंस्निग्धंधवलंनेत्रवल्लभं ६६ दद्यादाच्छादनंभक्त्यागुरवेसर्वदाबुधः विशीर्णंत्रुटितं दग्धंम्लानंस्वधृतंपुरा ६७ दृष्टमारवादिभिर्वस्त्रंनदद्याद्गुरवेबुधैः परुषंदुष्क्रियायुक्तंनीलोस्त्रविनिर्मितं ६८ पट्टवस्त्रेतरंवस्त्रंविरलंनप्रदापयेत् पट्टदेवांगचीनानिवासांस्यन्यानियानिच ६९ चित्राणिदद्यान्नृपतिरितरोवाधनाधिपः अपूर्वंपेशलंवोसोवस्त्रंत्वन्यस्तुमनासिच ७० स्वगुरोः पुरतःशिष्योनकदाचित्स्वयंहरेत् यदिरिक्तोगुरुःशिष्यः समृद्धस्यात्सहायतां ७१ यथाशक्तिगुरोःशिष्यः प्रकुर्वीतासनोदिकं गुरुंभक्त्यानमस्कुर्याद्दर्शनेपरमेसदा ७२ सन्निधानंविनाशंभोरन्यात्रांबुरुहासनः मातापित्रोः स्वबंधुनांब्राह्मणानांतपस्विनां ७३ नमस्कारंनकुर्वीतशिष्यः स्वगुरुसंनिधौ गुर्वीश्वराग्रेयोज्ञानात् ज्ञानाद्वाप्रणमेदिमान् ७४ सपापात्मापतत्येवनरकेमौक्तिरन्वितः श्रीमानपितयोवेषीशास्त्रज्ञकुलशो

शै० र० चवान् ७५ कृत्वादंडनमस्कारंनिर्लज्जोगुरुसंनिधौगुरोपत्नीगुरोर्भ्रातागुरोः पुत्रा
५५ गुरोस्समाः ७६ गुरुः पितागुरोर्मातागुरुर्देवः स्वयंशिवः अग्रजावरजापत्यज्ज्ये
ष्ठतदंगना ७७ भार्यागुरोश्चवंद्याः स्युरल्याः संवत्सराअपि ७८ तथोषाश्च
नमस्कार्यासदाल्पावत्सरैरपि आराध्यकुलशास्त्राणिपूज्यानिस्थानकानिच
७९ निकेतेनैनेचत्रिः पूर्वंप्रणाम्यपरिकीर्तयेत् द्रुतापिगुरुंदृष्ट्वाउदासीनोपि
योव्रजेत् ८० श्वानयोनिशतंगत्वाभवेच्चंडालवेश्मनि ज्येष्ठायदिक्षत्रिया
घानवंद्याः स्युर्द्विजोत्तमैः ८१ तथैववैश्यः शूद्राश्चजात्यनुक्रमशः स्मृताः स्व राम०
जातेश्रेष्ठजातौचज्येष्ठस्यानियमोभवेत्प्रियवात् ८२ स्वजातेर्हिनजातौतुज्येष्ठसा ५५
पिकनिष्ठतां उपचारेषुसर्वेषुद्वावेवात्यंतशोभनौ ८३ प्रियवाक्यप्रणीतश्चतौ

विनान्यैवरयास्मृता प्रथमं द्वारमारभ्यद्वारावधिपरिक्रमात् ८४ प्रदक्षिणावि
धौधीमान् नतुदीर्घपदंन्यसेत् नगच्छेत्त्वरितंजल्पमितरैर्मानुषैः सह ८५ छा
यांनलंघयेदंतेशिवधाम्नः सुबुध्धिमान् पदेपदांतरन्यस्तंकरौचलनवर्जितो
स्तुतिर्वाचाहृदिध्यानंचतुरंगंप्रदक्षिणां एवंशिष्यश्चतुर्भक्त्यासहकुर्यात्प
रिक्रमं ८६ गुरुंशिवंप्रतिपदंसोश्वमेधरफलंभवेत् स्वामिभट्टारकाचार्यदे
वश्रीगुरुनामभिः ८७ वाचंसदागुरुःशिष्योजातुचिन्त्वान्यनामभिः त्वंशब्दंन
प्रयुंजीतगुरौशिष्यकदाचन ८८ आज्ञांनलंघयेत्तस्यसमेनोपविशेत्तथा सम
स्तदेवतावासंसर्वमंत्रास्पदंगुरुं ८९ उपेक्षतेसपापात्मायःशिष्योरौरवंव्रजेत्
हृदिनायंममाचार्यइत्युपेक्षांकरोतिचेत् ९० मयिभक्तिर्दृयात्तस्यतथैवचसम

शै०र०
५५

र्चनं स्वगुरोः पुरतः शिष्योनेतरान्कीर्त्तयेन्नरान् ८१ असत्यभावंनवदेन्नव
देतिनरेतरं स्वमातृपितृभार्यासुभ्रातृबंधुसुतेषुच ८२ येगुरुद्वेषिणः शिष्या
प्रणायंतेपरित्यजेत् सन्मानंगुरुभार्यांचगुरोःशिष्योयइच्छति ८३ समहापातकी
ज्ञेयः पतत्येवसदुर्गतौ यस्मात्कस्माद्गुरुः शिष्यंयदिविद्वेषकारकः ८४ शुश्रूषये
त्स्वयंशिष्यः सद्भक्त्यापूर्ववत्सदा योगुरुंसर्वदास्तौतिनदिष्टंतस्ययच्छति ८५
करोतिद्वेषिभिः स्नेहंसचंडालसमः स्मृतः जुगुप्सितामतार्थस्यगुरोः शिष्यो एम.
तियन्नतः ८६ करोतिस्नेहिभिः स्नेहंसदेवमुनिमानसः गुरुंनिंदंतियः शिष्योद्रव्यंह ५५
रतितस्यच ८७ आहेयबुध्यायः कुर्याच्छुश्रूषामात्मभेतसः गच्छन्तिष्ठन्स्वयन्
भुंजन्वघत्कर्मसमारभेत् ८८ समक्षंवापरोक्षंवाकर्त्तव्यंगुर्वज्ञया गुरुगहेसम

संवानयथेष्टासनेभवेत् ९९ गुरुर्देवोयतःसाक्षात्तद्गृहेशिवमंदिरे आसनंवाह
नंवस्त्रंभूषणांशयनंतथा १०० नकुर्याद्गुरुसादृश्यंगतिसिद्धेरपेक्षकः शिष्योगुरु
स्थितग्रामेप्रविशेन्वाहनादिकं १ वर्जयेद्गृहसामीप्येतथावैपादुकानिच नानृतं
नाप्रियंवाक्यंनगुह्यंचापिभाषयेत् २ नापृच्छन्तामुखेब्रूयाद्गुरुरग्येकदाचननो
पतिष्ठेभवेदूर्ध्वंनीचस्थोनविशेद्गुरुः ३ पश्चात्सादेननिर्गच्छन् नमस्कार्यस्ततोगुरोः
दीक्षाव्याख्याप्रमतादिगुरोरग्रेविसर्जयेत् ४ अतिहास्यमवष्टंभंलीलामंघ्रिप्र
सारणं विनोदोजलवेषंचपर्यंकंदंतधावनं ५ पर्वस्फोटविकारंचपादप्रक्षाव
नंतथा नद्वाक्यप्रतिकूलंचनकुर्याद्गुरुसन्निधौ ६ यात्रस्नानजलछायांमाल्योपक
रणानिच भक्तिहीनःस्वपादाभ्यांनस्पर्शेन्नैवलंघयेत् ७ पादुकासनशय्यादिगुरुणाय

शै·र· घधिष्ठितं नमस्कुर्वीततत्सर्वपादाभ्यांनस्पृशेत्क्वचित् ८ देहलिंगेषरणींचस्त्रींनर्ज
५६ नींखंडनीमपि वर्धनीदीपकंशूर्पंखड्गमपिघरट्टकं ९ लेपनींमुसलंचापिनैव।
पादेनसंस्पृशेत् नोल्वणंधारयेद्वेषंनालंकारांश्चकर्हिचित् १० नकुर्यादाश्रमेकुर्या
दुपानपरिसर्पणं ऊढाध्वृताचपीताचमृलेनचसमाहृता ११ सकृत्कामगताचापि
पंचधागुरुपोषिताः वंद्याः पूज्यास्त्वलंघ्याश्चगुरुवच्चद्गुरुशक्तयः १२ नलिंगग्रहणंकु
र्याद्बहिर्लिंगार्चनंनच दुःसंगेनदुरुक्तेनदुःशीलंदुर्गुणंतथा १३ दुर्वाक्यंदुश्चारित्रंच रम·
दूरेणापरिवर्जयेत् स्वदेशेवान्यदेशेवाशिष्योविंशतियोजनात् १४ अभ्यंतरस्तुंस्व ५६
गुरुंसंपश्येत्प्रतिवत्सरं। गुरुयात्रादेवयात्रातीर्थयात्रेतिचत्रिधा १५ आसांत्रिविध
यात्राणांगुरुयात्राफलादिका गुरुसंदर्शनार्थंयोभक्त्यायात्रांकरोतिसः १६ पुण्यंदेही

तिविज्ञेयः समस्तागमवल्लभः यात्रांकर्त्तुमशक्तश्चेत्स्वियंद्रव्यंहितस्ययत् १७ नद्दत्वास्व
जनंतस्मैभक्त्यापहीरायांबुधः आदिष्टोवानवशिष्योदूरेवापिसमीपतः १८ स्थितःस्व
स्वगुरोः प्रीतिस्नेहेनैवसमाचरेतु कार्यविज्ञापनार्थंयद्गुरुणांदूरवासिनां १९ यात्रालेखा
हृतेः संख्याषडत्रभिहिताबुधैः शिष्याणांसप्तसमानांतुमित्राणांचमहीभृतां २० देया
द्वित्रिचतुःपंचष्टतिसंख्यायथाक्रमं तालपत्रंदृढंसौम्यंमृत्तुः मार्यंद्विधाकृतं २१ मृ
दुलंतत्प्रशस्तंयद्यात्रालेखाविलेखने कर्कशंकल्मषंवक्रंहीनायंस्फुरितंयुगं २२ ता
लपत्रमशस्तंस्याद्यात्रालेखाविलेखने मात्राविसर्गानुस्वारैर्वर्णैः स्पष्टंयथाभवेत्
२३ तथैवलेखंविलिखेच्छिंद्याद्वर्णान्नजातुचित् संदिग्धंछिन्नवर्णंचप्रशस्तेतरभाषणं
२४ नकदाचिल्लिखेत्यत्रस्वेनैवाभ्यासगंयदि प्रशस्तभाषासंयुक्तंविनयस्तुतिपूर्वकं

शै०र०
५७

२५ विज्ञापनीयंगुरवेयापयेदंतिकंगुरोः यत्रोपविष्टःस्वगुरुःपरितःपंचयोजनात् २६
अंतर्नकारयेद्दीक्षांप्रतिष्ठाघखिलक्रियाः स्वगुर्वाज्ञांविनाशिष्योयः कुर्याच्छिष्यसंग्र
हं पदहष्टंकृतंपूर्वंतत्सर्वंप्रविनश्यति २७ तथाभवेद्गुरुद्रोहीसपापात्माशिवस्य
च शरीरांतेमहाघोरेनरकेविवशश्चिरं २८ योग्यमाद्यंगुरुंत्यक्त्वाशिष्यःक्षुद्रक्रिया
वहं गुरुंसमाश्रयेदन्यंयः प्रयातिसदुर्गतिं २९ मारणोच्चाटनोद्वेषमोहनेस्तंभनेतथा
द्वेषणाकर्षणेचैवतत्षट्कंक्षुद्रमितिस्मृतं ३० ज्वरादिसर्वरोगाणांमंत्रतंत्रप्रतिक्रियाः भू
तप्रेतपिशाचानांक्षुद्राक्षुद्रेब्रह्मराक्षसां ३१ नाचरेत्क्षुद्रकर्माणिगुरुःश्रेष्ठःकदाचन मिथ्या
गुरुःसशिष्याणांविहीनगुरुलक्षणः ३२ किमर्थपेक्षयादीक्षांकुर्वन्यायातिरौरवं लिंगिनांशि
वविप्राणांकिमपिकर्त्तव्यमुच्यते ३३ गुरौशरीरंसंत्यज्यपरलोकंगतेसति ३४ कार्यापरायोगुरुम्ब्र

राम:
५७

षाशिष्येणास्वाभिवृद्धये गुरोःप्रयाणासमयेशिष्याःपार्श्वेतुसंस्थिताः ३४ तदाकेशान्वयेपुत्तेश्रु
त्वाद्दूरेस्थितस्तदा तथातस्यमुनेःसार्धंप्रकुर्युस्तर्पणादिकं ३५ ततःपृथक्पृथक्पूजांप्रकुर्युः
शंकरस्यच सद्भक्त्यागुरुसंप्रीत्यैसमृद्धोविभवैःसह ३६ समूहीकृत्यकुर्वीरन्नेकस्मिन्दिव
सेधनं ततःप्रतिसमंशिष्यागुरुपर्वविधिंसदा ३७ पृथक्पृथक्प्रकुर्वीरंस्तदर्थेतीर्थसेवनं या
स्मिन्मासेतिथौयस्यांमुमोचस्वतनुंगुरुः ३८ तत्तीर्थंगुरुपर्वेतिनामधेयंभविष्यति भक्तान्भक्त्या
यथाशक्त्याशिष्यस्यगुरुपर्वणि ३९ भोजयेत्परमान्नेनघृतपूपोपदंशकैः भक्ताएकादशाष्ट्रे
षंदशमध्येनवाधमः ४० यथाःशक्त्याथवालाभेसंभोज्यागुरुपर्वणि शान्ताःसच्छीलवंतश्च
श्रोत्रियाःशिवपूजकाः ४१ गुर्वर्थंभोजनेयोग्याणानेवैनेतराःस्मृताः पूर्वरात्रौद्विजानुक्तान्गा
त्वानद्दहकंप्रति ४२ हस्तेषुदत्वातांबूलंभक्त्याशिष्योनिमंत्रयेत् कृतनित्यःक्रियःशिष्यःकृत

शै०र०
५८

नित्याखिलान्नमान् ४३ निमंत्रितांस्तानाहूयस्थापयेदासनेदिने ततः शुद्धप्रदेशेतुगोमयालि
समंडले ४४ गंधपुष्पाक्षतैश्चैवषडंगैरपिपूजयेत् तिष्टतःप्राङ्मुखस्यादावेकस्यचरणाद्व
ये ४५ गंधाद्यंभोजलिंदद्यात्क्रमस्यप्रत्यगाननः ततः प्रक्षालनाद्दन्यान्भक्तान्यथाक्रमात्
४६ ततस्तुभोजनेस्थानेशुभेचातिमनोहरे प्राङ्मुखान्स्थापयेदेतानासनेषुयथाक्रमं ४७
अथवोदङ्मुखान्वातुस्थापयेन्नान्यदिङ्मुखान् वस्त्रोर्मिकाभ्यांगंधाद्यैःसस्रग्भिः पूजयेततः ४८
असमृद्धोयथाशक्तिभक्त्यासहसमर्चयेत् पायसापूपसर्पिर्भिर्दध्यन्नाद्युपदंशकैः ४९ अखंडै
र्भोजयेद्दिव्यान्यथा पूर्वंयथातथा ततस्ताम्बूलकंदत्वायथाशक्तिचदक्षिणां १५० कृत्वाप्रदक्षि
णांदत्वाक्षमस्वमितितान्वदेत् गुर्वर्थमेवंयःशिष्यःप्रकुर्याद्भोजनादिकं ५१ सर्वपापविनिर्मु
क्तः इहामुत्रसुखीभवेत् भक्ताभावेमहादेवंतदर्थंसंप्रपूज्यतु ५२ भक्तार्थंपाकंसकलंतस्मैनि

राम
५८

त्यैनिवेदयेत् देशांतरेस्थितःशिष्योयोजनानगुरुपर्वसः ५३ स्वौकन्यागतेदर्शेगुरुपर्वक्रियां
चरेत् यावच्छिष्योवनौजीवेत्यमृद्धोगुरुपर्वणि ५४ तावत्सङ्कितोभक्तान्भोजयेत्प्रति
वत्सरे गुरोरत्यंनभक्तस्यशिष्यस्येहपरत्रच ५५ नकिंचिद्दुर्लभंब्रह्मन्समस्तंसुलभंस
दा अथकिंवहुनोक्तेनगुरुर्देवोमहेश्वरः ५६ यःकश्चिद्गुरुभक्तश्चेत्सयातिपरमंपदं स्कां
दे गुरु शुश्रूषणांकार्यंगुरोर्वाक्यानुवर्तनं ५७ सदागुरुपरोनित्यंगुरोराज्ञांनलंघयेत् गु
रुपादोदकंपीत्वागुरुच्छिष्टंतुसेवयेत् ५८ गुरुमूर्तिंसदाध्यायेद्गुरुनामसदाजयेत् गुरुपा
दांवुजध्यानंमहामायेमहेश्वरि ५९ तमेवयस्स्मरेन्नित्यंसमुक्तोनात्रसंशयः तस्मात्सर्वप्रय
त्नेनशिष्यसेवेतसद्गुरुं ६० तत्संपर्केशिवाचार्योदैस्वगतैर्मुक्तकिल्बिषः यथैववन्हिसंपर्का
न्मलंत्यजतिकांचनं ६१ तथैवगुरुसंपर्कात्पापंत्यजतिमानवः पापीनांचययासंतः तत्पापफल

शै०र० नाशयेत् ६२ तद्वदाचार्यसंगेनसद्धर्मफलभाग्भवेत् यथाप्रज्वलितोवन्हिस्स्पृष्टंकाष्टंचनिर्दहेत्
५९ ६३ गुरुस्तुष्टोऽहस्त्येवयायंतन्मंत्रंचेतसा इत्यमाचारवान्भक्तोनित्यंजपपरायणः ६४ गुरु
प्रियकरोमंत्रंविनियोगंसदार्हेति ततः शिष्यसमुत्थाप्यकुसुमैः पूरितांजलिः प्रविशेत्पादयु
ग्मेतुप्रणामंकारयेद्गुरोः ६५ चैतन्यंशाश्वतंनित्यंव्योमातीतंनिरंजनं नादविंदुकलातीतंत।
स्मैश्रीगुरवेनमः ६६ ज्ञानशक्तिसमारूढंतत्वमालाविभूषितं भुक्तिमुक्तिप्रदातारंतस्मैश्रीगुर
वेनमः ६७ ब्रह्माविष्णुश्चरुद्रश्चईश्वरश्चसदाशिवः एतेगर्भगताश्चैवतस्मैश्रीगुरवेनमः राम
६८ गुरुर्वेनमः ६७ह्मागुरुर्विष्णुः गुरुर्देवोमहेश्वरः गुरुरेवपरब्रह्मतस्मैश्रीगुरवेनमः ६९ ५९
अज्ञानतिमिरांधस्यज्ञानांजनशलाकया चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेनमः ७० अनेकज
न्मसंप्राप्तंकर्मधनविदाहकं ज्ञानानलप्रभावेनतस्मैश्रीगुरवेनमः ७१ अखंडमंडलाकारंव्या

संयेनचराचरं तत्पदंदर्शितंयेनतस्मैश्रीगुरवेनमः ७२ भवाररायप्रविष्टस्यादिग्मोहभ्रांतचेतः

सः येनमेदर्शितः पंथास्तस्मैश्रीगुरवेनमः ७३ इत्यष्टमंत्राः प्रणम्यदंडवद्भुमावष्टमंत्रेणा

चार्चयेत् गुरोःश्रीपादपद्मंचगंधपुष्पाक्षतादिभिः ७४ गुरुपादपुनःशिष्योमस्तकेरचि

तांजलिः नासापुटंनिरीक्षेतकाष्टमौनंसमाचरेत् ७५ गुरोराज्ञांशिवानत्कंदासवत्सेवयेन्मु

दा अभिमानोनकर्तव्योजातिविद्याधनादिभिः ७६ ततस्तेनैवगुरुणाशिष्यसंतोषितेनच दी

क्षाविधुक्तमार्गेणासम्यग्दीक्षांसमाश्रयेत् ७७ ततोपदिष्टमार्गेणाशिवार्चामनुवासरं त्रिका

लमेककालंवायथाशक्तिसमर्चयेत् ७८ योदीक्षांनेगुरुर्भक्त्यादद्यात्स्वस्यवियहं भोगार्थं

स्वार्जितंद्रव्यंत्यक्त्वाभोगंस्ववांछितं ७९ तेनलब्धंपरब्रह्मश्रुणुतात्पर्यसंग्रहं सर्वपापविनिर्मुक्तः

सर्वैश्वर्यसमन्वितः ८० ब्रह्मलोकादिलोकेषुयथेष्टमनुभूयच ममप्रसादात्मद्भक्तोकेयथेष्टंवि

शै०र०
६०

चरेत्सदा ८१ कर्मणामनसावाचागुरुशंणंभक्तवत्सलः शरीरमर्थंप्राणांचसद्गुरुभ्योनिवेदयेत् ८२
कोपाद्वापरिहासाद्वाशप्तोसद्भिंसमानुषैः तंकृतोवागुरुः स्नात्वामूलमंत्रशतंजपेत् ८३ गुरु
निंदाकरं दृष्ट्वाघातयेदथवाशयेत् स्थानंवातत्परित्यज्यगच्छेद्यद्यक्षमोभवेत् ८४
त्रिपुंड्रंचैवरुद्राक्षंनित्यार्चनजयंतथा होमन्यासादितत्सर्वंदीक्षाहीनेननिष्फलं ८५ अदी
क्षितश्चयोविप्रश्चतुर्वेदधरोपिवा संस्पृशेद्यदिवालिंगंशुनकंपरतोभवेत् ८६ अत्रोक्तम
र्थंसकलंगुरुःशिष्यंप्रबोधयेत् नोचेद्गुरोर्भवेत्पापंतेनाज्ञानेनयत्फलं ८७ इतिश्रीशैवरत्ना
करेगुरुशिष्यलक्षणंनामनवमोध्यायः॥८॥ दीक्षाविधिपार्वत्युवाच कोमंत्रस्सर्वजातीनां
मतः साधारणंप्रभो उपदेशविधानस्यकीदृशीवदसत्क्रिया १ ममपंचाक्षरीमंत्रःपाठमा
त्रेणसिध्यति सर्वलोकवशीकारःसर्वसौभाग्यवर्धनः २ आयुरारोग्यसंपत्तिहेतुरैश्वर्यका

रम
६०

रणं इष्टावाप्तिकरोनित्यापरिहारैककारणं ३ परानंदनिजावासोमुक्तेस्तत्रप्रवर्धनं शवरेश्वर
वेषेणपुरायुरविरोधिना ४ सर्वजातीयमनुनासाधारणनयेश्वरी सर्वानुग्रहिकेचास्मिन्तंत्रे
वातलनामनि ५ उपदिष्टोमहैश्वर्यसिद्धिमंत्रप्रभावनात् उपदेशविधिंतस्यकथयामित
तः शृणु॥६॥एकोभवेदिहाचार्यः शिवभक्तिपरायणः सद्गुरुः प्रभवः ख्यातः शांतः शैवागमा
र्थवित् ७ चत्वारोऋत्विजस्तत्रतस्याचार्यस्यसंमताः अनिंदितचरित्रास्तुः शिवाराधनतत्पराः
८ स्नातापभातसमयेगुरूणामभ्यनुज्ञया अलंकृताश्चगंधाद्यैर्गुरूणामंतिकंव्रजेत् ९
समस्तसंपत्संप्राप्तिहेतुभिर्भसितैः सितैः गुरुदत्तैर्ललाटादिस्थानेकुर्यात्रिपुंड्रकं १० समे
त्याचार्यपादाब्जेप्रणम्यतदनंतरं पूजयेत्स्वर्णपुष्पाद्यैर्भक्त्याविनानुसारतः ११ स्नातानलंकृ
तान् शुद्धवाससाऋत्विजस्ततः पुष्पाक्षतविभूत्याद्यैचतुरस्तान्प्रपूजयेत् १२ विभुतिशिव

शै०र० भक्तेभ्यः सर्वेभ्यस्तदनंतरं॥ रुद्रानुक्रमतोदत्वापुष्पाद्यैस्तान्प्रपूजयेत् १३ अथतेभ्यः समस्तेभ्योदशि
६१ केंद्रपुरःसरं यथापदसिरांभक्त्याताम्बूलानिसमर्पयेत् १४ विधिवत्कृतपूजस्यपरस्तात्परमेष्टि
नः पंचस्वर्णादिकलशानाचार्यस्थापयेन्नवान् १५ एवंमध्यचतुष्कोणेचतुरस्रान्निधापयेत् ए
कैकंनवस्त्रेणावेष्टयेद्देशिकोत्तमः १६ तेषुसर्वेषुरत्नानियथासंभवमर्पयेत् नवभिस्तंतुभिःशु
द्धैः पंचतान्परिवेष्टयेत् १७ आचार्योमध्यमस्थार्चीकुर्यात्पुष्पाक्षतादिभिः ऋत्विजः प्रीतमनसो
विदध्युरितरार्चनं १८ तेषुतीर्थेषुपूर्णेषुविदध्यादाम्रपल्लवान् दूर्वांकुरानुसप्तानिनागवल्लिदला राम॰
न्यपि १९ अथतत्कलशस्थानामंभसामभिमंत्रिणां ममयंचाक्षरीमंत्रेणाचार्यः प्रतिपादयेत् त ६१
तः समस्तभक्तेभ्यः कुर्वंस्त्वाशिषमुत्सुकः २० परितस्तूर्यनिस्वानैर्मंगलार्थैर्विजृंभिते तस्यंचकल
शांभोभिराचार्यः शिष्यमूर्धनि २१ संप्रोक्ष्यपंचकलशान्सदूर्वांकुरपल्लवान् स्वस्वस्थानेषुकलशां

स्नान्निधायप्रयत्नतः २२ उद्धृत्यचयथापूर्वंकुर्यात्तस्योसरांपुनः स्थापयित्वापुनस्तांश्चकल
शान्स्वस्वभूमिषु २३ उद्धृत्यपूर्ववंकुर्यास्त्रोसरांशिष्यमूर्धनि इत्यंत्रिवारंतत्सेकं
कृत्वातस्याद्यमर्षयेत् २४ शिवशांतिकमाचार्यः सहशिष्येणसंस्मरेत् ततस्तुदसरो
भागेशिष्यस्योपदिशेद्गुरुः २५ शिवहस्तंविधायाथशिष्यस्यासिन्यसेत् शिवतेजोमयंया
शिंशिवमंत्रमुदीरयन् २६ ततःशिवासनंध्यात्वाशिष्यमूर्धनिसेवकः तत्रावास्यंयथान्याय
मर्चयेन्मनसाशिवं २७ प्रार्थयेत्प्रांजलिर्देवंनित्यमंत्रस्थितोभव इतिविज्ञाप्यतंशंभोस्तेजसा
भास्वरंस्मरेत् २८ समयंचाक्षरीमंत्रमुपांशुपदिशेद्गुरुः कर्णेशिष्यस्यशनकैः शिवमंत्रमु
दीरयेत् २९ सतुलब्धांजलिःशिष्योमंत्रतद्गतमानसः समस्तंव्याहरेच्छिष्यःशिवाचार्यस्य
शासनात् ३० याशानशेषान्कर्तर्याछित्वालिंगंसमादिशेत् कर्त्तरिज्ञानशक्तिस्याद्ययायाशानच्छि

शै॰र॰ ६२

नत्यसौ ३१ याकलापरमासस्मामंत्राणांबोधनीपरा॥ तामाकृष्ययथान्यायंलिंगेसमुपवेशयेत्
३२ तल्लिंगंस्थापयेच्छिष्यप्राणलिंगमिदंतव । एवमुक्त्वासदालिंगंनकदाचिद्वियोजयेत्
३३ शिष्यस्तुदक्षिणांदद्यादाचार्यायस्वशक्तितः गुरूपदिष्टमार्गेणकुर्यात्तन्मानमृत्विजां
३४ तथाप्रभृतिगुर्वंघ्रिपद्मयोर्दंडवत्पतेत् नलंघयेद्गुरोराज्ञांतस्याग्रेप्रांजलिर्भवेत् ३५
नित्यंभवेद्गुरोः शिष्यःश्रीपादाब्जपरायणः प्रणामेस्तुतिरुद्राक्षधारणेमुदा ३६ स्वशक्त्या
शिवभक्तस्यमित्रोरभ्यागतस्यच संतोषंसततंकुर्याद्भोजनाच्छादनादिभिः ३७ उपभोगाय
पुरतोवस्तुयद्यदुपस्थितं ततत्समर्प्यदेवायविदधीतात्मसात्ततः ३८ असमर्प्ययदीशाय
वस्तुकिंचित्कदाचन कथंचिन्नोपभुंजीतशिवभक्तिपरोनरः ३९ ययाक्रियाविधातव्या
प्रस्तुताजायतेरतिः तांतांकुर्यान्महादेवेसमर्पणधियासुधीः ४० देशकालविपर्यासेसर्वावस्थासुसर्वे

एस॰ ६२

दा ज्ञातव्यंबुद्धियुक्तेनशिवाचारंनलंघयेत् ८१ शिवभक्तंसमालोक्यदूरादेवातिभक्तितः प्रांजलिःप्रणतोभू
त्वाभाषयेन्मृदुभाषणैः ८२ शिवालयेशिवारामेशिवग्रामाभिरक्षणे तात्पर्यमनिशंकुर्यात्तन्मर्शेनपरोभवे
त् ८३ शिवकिंकरभूतोहमितिनित्यंविभावयेत् तात्पर्यमनिशंकुर्याद्दुन्यानदपहारिणे ८४ समस्तभो
गसंपत्तिसम्यक्समुपजायते आयुरारोग्यतांयातियशोयातिविभुद्धतां ८५ विघानवघतांयातिभूति
रेतिप्रभूततां अनेकजन्मसंबंधदूरंयात्यघसंचयं ८६ भूतप्रेतपिशाचाद्याः पलायंतेभयातुराः वीरमाहे
श्वरंकुर्यादैहिकामुष्मिकंचरेत् ८७ भक्त्यायथेष्टंविभ्रेमप्रसादान्मुक्तिमेष्यति मंत्रारंभेतुचैत्रेचेत्तव
हुदुःखफलप्रदं ८८ वैशाखेरत्नलाभस्याज्ज्येष्ठायांमरणंध्रुवं आषाढेबंधुनाशस्यात्पूर्णायुःश्रा
वणेभवेत् ८९ प्रज्ञानाशोभाद्रपदेसर्वत्रःशुभमाश्विजे कार्त्तिकेमंत्रसिद्धिस्यान्मार्गशीर्षेसु
भावहः ९० पुष्येतुमंत्रहानिःस्यान्माघेमेधाविवर्धने फाल्गुन्यांसर्वसिद्धिस्यादितिमंत्रविदोविदुः ९१

शिवरहस्ये इंधनानलसंयोगे रसनाम न विद्यते शिवसंस्कारसंपन्नः स रुद्रो नात्र संशयः ५२ रजतं यै
तलं ताम्रं लोहं चेति चतुष्टयं यद्वदेति सुवर्णत्वं रसभेदप्रभावतः ५३ नगनगरोनिर्ज्जराघं वु गंगांम्रा
प्ययथैक्यं दीक्षायोगात्तथेशस्य शूद्रादिशिवतां व्रजेत् ५४ श्वपचोपि मुनिश्रेष्ठः शिवसंस्का
रसंयुतः शिवसंस्कारहीनस्तु द्विजोपि श्वपचाधमः ५५ जन्मना जायते शूद्रः संस्काराद्द्विज उच्य
ते शिवसंस्कारसंपन्ने जातिभेदं न कारयेत् ५६ शिवसंस्कारसंपन्नो ह्ययं शूद्रो ह्ययं द्विजः लिंग
भेदः कृतो येन रौरवं नरकं व्रजेत् ५७ शिवदीक्षाभिजातस्य पूर्वजातिं न चिंतयेत् सुप्रतिष्ठित
लिंगस्य न यथा पूर्वभावना ५८ यस्य चित्तं शिवे लीनं तस्य जात्यादिकं स्मरेत् शिवलिंगे शिलाबुद्धिं
कुर्वाणः स्त्र्वयातकी ५९ दार्वाश्मलोहमृद्रत्नजातलिंगप्रतिष्ठिते यथा पूज्यं तथैव स्याद्भक्तश्चंडाल
वंशजः ६० लैंगे यथायं केसरोजं स्याद्यथा काष्ठे हुताशनः यथा सुवर्णपाषाणो भक्तश्चंडालवंशजः ६१

प्राग्देशजातिनामानियः पपैठेत्कथयेच्चयः प्रायश्चितक्रियानार्हः पतेत्समयशासने मातागिरिसुतादेवीपि
तादेवोमहेश्वरः बांधवाः शिवभक्ताश्चस्वदेशभुवनंयथा ६२ शिवधर्मशास्त्रे॥ तावद्भ्रमंतिसंसारेदुः
खशोकपरिप्लुताः नभवंतिशिवेभक्तायावत्सर्वेपिदेहिनः ६३ जीवनंशिवभक्तानापरंपंचाक्षरंच
यत् अजकल्पसहस्राणिभक्तिहीनस्यशांकरि ६४ महापातककोटिघ्नंश्वपचोलिंगपूजकः तस्स
भाषणातोमुक्तिर्गणामुख्यः सुखीभवेत् ६५ सुदुर्लभाशिवेभक्तिर्दुर्लभंचशिवार्चनं सुदुर्लभंशिवे
ध्यानंशिवयोगः सुदुर्लभं ६६ नारुद्रः संस्मरेद्रुद्रंनारुद्रोरुद्रमर्चयेत् नारुद्रः कीर्तयेद्रुद्रंनारुद्रोरुद्र
माप्नुयात् ६७ नमस्कारादिसंयुक्तंशिवायेत्यक्षरत्रयं जिह्वाग्रेवर्ततेयस्यसफलंतस्यजीवितं
६८ इतिशैवरत्नाकरेदीक्षाप्रकरणंनामदशमोध्यायः १० श्रीपंचाक्षरी सर्वव्रतेषुसंपूज्यदे
वदेवमुमापतिं जपेत्पंचाक्षरींविद्यांविधिनैवद्विजोत्तमाः १ जयादेवमसंदेहोव्रतानांचैवविशेषतः

समासेनोन्यथानस्माज्जयेत्पंचाक्षरींशुभां २ ऋषयऊचुः कथंपंचाक्षरीविद्याप्रभावोवाकथं
वद क्रमोवायमहाभागश्रोतुंकौतूहलंहिनः ३ पुरादेवेनरुद्रेणदेवदेवेनशंभुना पार्वत्यै
कथितंपुरायंप्रवदामिसमासतः ४ पार्वत्युवाच भगवन्देवदेवेशसर्वज्ञपरमेश्वर पं
चाक्षरस्यमाहात्म्यंश्रोतुमिच्छामितत्वतः ५ श्रीमहादेवः पंचाक्षरस्यमाहात्म्यंवर्षको
टिशतैरपि नशक्यंकथितुंदेवितस्मात्संक्षेपतः श्रृणु ६ अल्पाक्षरंमहार्थंचमहासारंवि
मुक्तिदं आज्ञासिद्धमसंदिग्धंवाक्यमेतच्छिवात्मकं ७ नानासिद्धियुतंदिव्यंलोकचित्तानु
रंजनं सुनिश्चितार्थगंभीरंवाक्यंतत्पारमेश्वरं ८ मंत्रंसुखमुखोच्चार्यमशेषार्थप्रसाधनं तद्बी
जंसर्वविद्यानांमाद्यमंत्रंषडक्षरं ९ अतिसूक्ष्मंमहार्थंचज्ञेयंतद्वटबीजवत् ज्ञेयः सत्रिगुणा
तीतः सर्वज्ञः सर्वतः प्रभुः ॐ मित्येकाक्षरमंत्रेस्थितः सर्वगतःशिवः १० वाच्यवाचकभावेन

स्थितः साक्षात्स्वभावतः वाच्यः शिवः प्रमेयत्वान्मंत्रस्तद्वाचकस्स्मृतः वाच्यवाचकभावोयमना
दिः संस्थितस्तयोः ११ दवेशिवागमेचायमुभयत्रषडक्षरः मंत्रः स्थितः सदामुख्योलोकेपंचा
क्षरः स्मृतः १२ किंतस्यवहुभिर्मंत्रैः शास्त्रैर्वावहुविस्तरैः यस्योन्नमः शिवायेतिमंत्रोयंसंस्थि
तोहृदि १३ शिवज्ञानानियावंतिविद्यास्थानानियानिच षडक्षरस्यसूत्रस्यतानिभाष्यंसमासतः १४
कोविद्वान्वेदवित्सम्यगधिदैवंविजानकः एतावद्धि शिवज्ञानमेतावत्परमंपदं १५ येनोन्नमः शिवायेति
ज्ञातंवाक्यंषडक्षरं विधिवाक्यमिदंशैवंनार्थवादः शिवात्मकं १६ पंचाक्षरंसप्रणवोमंत्रोयंहृ
दयंमम गुह्याद्गुह्यतरंसाक्षान्मोक्षज्ञानमनुत्तमं १७ प्रमाणांवेदवाक्यत्वात्परमार्थप्रकाशितं वे
दानांयजुषांचैवशतरुद्रेव्यवस्थितं १८ अखंडंपठितंयस्माद्वेदवैदिकतांत्रिकं अखंडवेदवा
क्यत्वाद्धहस्मारणपकास्तथा १९ वैदिकानामिदंदेयंजप्यंतैरेवशोभने प्रद्धाराणांवेदवाद्यानांनास्ति

कानामधर्मिणां २० कृतघ्नानामभक्तानांनोपदेश्यंकथंचनं दासस्यशिवभक्तस्यहितप्रियक
रस्यच २१ शूद्रस्यापिप्रदातव्यंनमोतंप्रणवंविना विनाप्रणवकंमंत्रंश्रोभ्युदद्वारणाप्र
साधकं २२ प्रणवेनसमायुक्तयोर्द्वीविधीयमः नकारश्चमकारश्चशिकारोकारएव
च २३ यकारःपंचमोमंत्रःप्रणवेनषडक्षरः श्रीमहादेवः अस्यमंत्रस्यवक्ष्यामिऋ
षिश्छंदोधिदैवतं वीजंशक्तिस्वरंवर्णंस्थानंचैवाक्षरंप्रति २४ वामदेवोनामऋषिःपङ्क्ति
श्छंदउदाहृतं देवताशिवएवायंमंत्रस्यचवरानने २५ नकारादीनिवीजानिपंचभूता
निकानिच आत्मानंप्रणवंविद्धिसर्वव्यापिनमव्ययं २६ नकारःपृथिवीज्ञेयामकारस्ता
यमुच्यते शिकारेग्निरितिप्रोक्तोवाकारोवायुरुच्यते २७ यश्चाकाशमितिप्रोक्तःपंचब्रह्ममि
तिस्मृतं अकारश्चउकारश्चमकारश्चक्रमेणवै त्वदीयंप्रणवंकेचिन्मदीयंप्रणवंतथा

२८ प्रथमंतारकीरूपंद्वितीयंदंडमुच्यते तृतीयंकुंडलाकारंचतुर्थंचार्धचंद्रकं २९ पंचमं
नादविंदुश्चप्रणवेपंचलक्षणं तारकोब्रह्मणोरूपंदंडकोविष्णुरुच्यते ३० कुंडली
रुद्रसंस्थानोर्धचंद्रईश्वरः विंदोसदाशिवः प्रोक्तःप्रणवेपंचलक्षणं ३१ त्वदीयं
देविमंत्राणांशक्तिभूतंनसंशयः अकारोकारमकारमदीपप्रणवैस्थिताः ३२ छंदो
देवीत्वगायत्रीपरमात्माधिदेवता ॐकारस्यस्वरोदात्तोऋषिर्ब्रह्मापित[illegible] ३३ उ
दात्तः प्रथमस्तस्यचतुर्थश्चद्वितीयकः पंचमःस्वरितःशेषमध्यमोनिहितस्मृतः ३४
नकारः पीतवर्णश्चस्थानेपूर्वमुखंस्मृतं इंद्रोधिदेवतंछंदोगायत्रीगौतमोऋषिः ३५
मकारः कृष्णवर्णश्चस्थानेवैदक्षिणामुखं विश्वामित्रोऋषिस्त्रिष्टुपछंदोविष्णुश्चदेव
ता ३६ शकारोहेमवर्णश्चस्थानेचैवोत्तरंमुखं ब्रह्मादिदैवतंछंदोबृहतीचांगिराऋ

षि: ३७ यकारो रक्तवर्णोऽस्य स्थानमूर्ध्वमुखं विराट् छंदोऋषिर्भरद्वाजस्कांदो दैवतमुच्यते
३८ एवं लब्ध्वा परं मंत्रमाज्ञां चैव गुरोस्तथा जपेन्नित्यं च संकल्प्य पुरश्चरणपूर्वकं ३९
यावज्जीवं जपेन्नित्यमष्टोत्तरसहस्रकं अनन्यस्तत्परो भूत्वा नित्यजापोऽयमुच्यते जपे
द्दशलक्षं वै चतुर्गुणादमादमादरात् एतत्सीत्संयमीपः सपौरश्चरणिकः स्मृतः ५१ कृते
लक्षजपं कुर्यात्त्रेतायां द्विगुणं भवेत् द्वापरे त्रिगुणं प्रोक्तं कलस्सचतुष्टयं ५२ शिवज्ञानविद्या
यां स पुरश्चरत्यजापी भवेन्नरः अचिन्त्यं सिद्धिमाकांक्ष्यन्तयोरन्यतरो भवेत् ५३ यः पुरश्चरणं कृ
त्वा नित्यजापी भवेन्नरः तस्य नास्ति समो लोके स सिद्धिः सिद्धिदो वशी ५४ आसने रुचिरे ब
ध्वा मौनी चैकाग्रमानसः प्राङ्मुखो दङ्मुखो वापि जपेन्मंत्रमनुस्मरेत् ५५ आद्यंतयोर्जप
स्यामु कुर्यात्त्रिप्राणसंयमं ततोऽते च जपेद्बीजं शतमष्टोत्तरं शुचिः ५६ चत्वारिंशत्समारभ्य मा

णानायम्यमानसे पंचाक्षरस्यमंत्रस्यप्राणायामउदाहृतं ४७ प्राणायामाद्भवेक्षिप्रंसर्वपापस्य
वैक्षयः इंद्रियाणांवशित्वंचतस्मात्प्राणान्संयमेत् ४८ कौशेयंचर्मवाकुर्याज्जैत्वंचैलमथापि
वादारवंतालपर्णंवाभ्यासनंपरिकल्पयेत् ४९ वंशासनेदरिद्रत्वंपाषाणेव्याधिसंभवः धरण्यां
दुःखसंभूतिर्दौर्भाग्यंदारुकासने ५० तृणासनेयशोहानिः पल्लवेचित्तविभ्रमः यथोचितेष्वा
सनेषुनिषिद्धानिपरित्यजेत् ५१ फलंवैशेषिकंप्रोक्तंवंशादिष्वासनेषुवै मंत्रग्लानिस्तयोहा
निस्तेषुसामान्यतोमताः ५२ कृष्णाजिनेज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि स्वात्येष्टिकादि
कौशेयेशांतिकंवेत्रविष्टरे ५३ वस्त्रासनेव्याधिनाशंकंबलेदुःखमोचनं अभिचारादिकंनी
लेरक्तेवश्यादिकंभवेत् धवलेशांतिकंमोक्षः सर्वार्थश्चित्रकंबले ५४ गृहेजपंसमंविद्याद्गो
ष्ठेशतगुणंभवेत् नद्यांशतसहस्रंचस्यनंतंशिवसन्निधौ ५५ समुद्रतीरेप्रासादेगिरौदेवाल

येषुच पुराणाश्रमेषुसर्वेषुजपंकोरिगुणंभवेत् ५६ शिवस्यसन्निधौचाथसूर्यस्याग्रेगुरोरपिदीपस्या
पिजपस्यापिजपकर्मप्रशस्यते ५७ तत्पूर्वाभिमुखंवश्यंदक्षिणांचाभिचारिकं पश्चिमंधनदंवि
घादुत्तरंशांतिकंभवेत् ५८ माहात्म्यंवाचिकस्यैवजपयज्ञस्यकीर्तितं तस्माच्छतगुणोपांशुः सहस्रो
मानसस्मृतः ५९ यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः मंत्रमुच्चारयेद्वाचाजपयज्ञः सवाचकः ।
६० शनैरुच्चारयेन्मंत्रमीषदोष्ठौप्रचालयन् किंचित्कर्णगतंविद्यादुपांशुः सजपःस्मृतः ६१ धि
यापदक्षरश्रेण्यावर्णाद्वर्णंपदात्पदं शब्दार्थंचिंतयेद्भूयः सउक्तोमानसोजपः ६२ त्रयाणांज
पयज्ञानांश्रेयस्यादुत्तरोत्तरं भवेयन्नविशेषेणावैशेष्यंतत्फलस्यच ६३ मनःसंहरणंशौचंमौ
नंमंत्रार्थचिंतनं अव्यग्रत्वमनिर्वेदोजपसिद्धेस्तुहेतवः ६४ एवंलब्ध्वाशिवज्ञानंज्ञात्वाजपविधिक्रमं
जितेंद्रियोजितक्रोधः शिवज्ञानपरायणः ६५ सदाचारोजपन्नुद्धन्नुध्यायन्भद्रंसमश्नुते धुणाध्वे

सर्वयज्ञेषुजपयज्ञोविशिष्यते ६६ हिंसयान्याप्रवर्त्तंतेजपयज्ञस्त्वहिंसया यावंतः सर्वयज्ञास्तु
श्रुतानिचतपांसिच ६७ सर्वेतेजपयज्ञस्यकालांनार्हंतिषोडशीं ६७ जपेनदेवतानित्यंस्तूयमा
नाप्रसीदति प्रसन्नाविपुलान्भोगान्दद्यान्मुक्तिंचशाश्वतीं ६८ रक्षोयक्षपिशाचाश्चग्रहाः सर्पा
श्चभीषणाः जापिनंनोपसर्पंतिभयभीताः समंततः ६९ जपेनपापंचक्षयेदशेषंयघत्कृतंजन्मप
रंपरासु जपेनरोगान्जयतेचमृत्युंजयेनसिद्धिंलभतेचमोक्षं जपेनपापंचक्षयेदशेषंयघत्कृतंजन्मपरंपरा
सु जपेनरोगान्जयतेचमृत्युंजयेनसिद्धिंलभतेचमोक्षं ७० गायत्र्याःसंहितायां सत्यमेतत्वया
प्रोक्तंतथापिशृणुसुंदरि रहस्यमिति ज्ञात्वैतत्स्थापितंयन्मयापुरा ७१ अमंत्रःकर्मपतितः पूजये
द्यदिमोहितः नारकोस्मान्नसंदेहोममयंत्राक्षरंविना ७२ अभक्ष्योवाप्यभक्षाश्चयेचान्येव्रतकर्षिताः
तेषामेतेष्वेतैर्व्रतैर्नास्तिममलोकसमागमः ७३ भक्त्यापंचाक्षरेणैवयोपिमांसमहर्चयेत् सोपिग

कृन्महास्त्रानंमंत्रस्यैवतुगौरवात् ७४ तस्मात्तंपांसियत्नाश्चव्रतानिनियमास्तथा
पंचाक्षरार्थेनस्यैतेकोटयंशेनापिनोसमाः ७५ अशुद्धोवापिशुद्धोवासकृत्यंचा
क्षरेणायः पूजैयेत्यातितोवापिमूढोवामुच्यतेनरः ७६ षडक्षरेणवादेवितथापंचाक्ष
रेणवा अलब्धल्लब्धरावैषकोटिकोटिगुणाधिकः ७७ तस्माल्लब्ध्वैवमांदेवि
मंत्रेणानेनपूजयत् लब्ध्वासंपूज्यतेयस्तुमैत्र्यादिगुणासंयुतः ७८ ब्रह्मचर्यरतो
भक्त्यामत्सापुज्यमवाप्नुयात् किमंत्रबहुनोक्तेनभक्ताः सर्वेधिकारिण ७९ ममपं
चाक्षरेमंत्रेनमाक्षेष्टतरोहिसः त्रियंबकेनवामूलविद्ययाप्रणवेनवा ८० पूजां

कुर्यात्स्वयत्नेनत्रिकालंनित्यमेववा नियंचकंयजेद्धूपंकेनवामूलविद्ययाप्रमाणेन देवंसुगंधीपुष्टिवर्ध
ने ८१ किंकरिष्यतिमांमृत्युर्मृत्योर्मृत्युरहंतथा ॐ अस्यमृत्युंजयमंत्रस्यवसिष्ठऋषिः मृत्युंजयो
देवता अनुष्टुप्छंदः मृत्युंजयप्रीत्यर्थेजपेविनियोगः क्रियासारे ईश्वरः अथवक्ष्येक्षमालायालक्ष
णंघटनाक्रमं जपफलविशेषश्चस्थापनंकमलासने ८२ घटिकामालिकायासाप्रशस्तासशिखाम
णिःशिखामणिमयंब्रह्मन्सीमाभूतोनसंख्यया ८३ सहजप्योविधिस्तासांस्मृतस्याद्यांतयोर्व
जः रुद्राक्षस्यविशेषोस्तिमणिमालाकृतौमनाक् ८४ तथैवांबुरुहाक्षस्यकुशग्रंथेश्चसु
व्रत ब्राह्मणःक्षत्रियावैश्यःशूद्रश्चेतिचतुर्विधः ८५ श्वेतरक्तसुवर्णाभकृष्णवर्णाक्रमाद्भवे
त् येतेषुब्राह्मणश्रेष्ठोजपमालाकृतौमृशं ८६ अलाभस्तुद्विजातीनामपिवास्वस्यजातपः
अतिस्थूलोतिसूक्ष्मश्चस्फुटितोभंगुरोलघुः ८७ भिन्नःपुराहतोजीर्णोरुद्राक्षोनवरस्मृतः भयो

शै॰ र॰ गुल्माजयः कुर्यात्स्थूलामणयोखिलाः ८८ दृढाहृष्टिप्रियास्निग्धावृताः श्रेष्ठाइतिस्मृताः मणौश्चदु
६० न्वतंस्थानंमुखंपृष्ठंतुनिम्नकं ८९ कमलाक्षस्यसूक्ष्मांशंसविंदुहितयन्मुखं सविंदुकांचस्थूलासंपृ
ष्ठभागमितिस्मृतं ९० एवंज्ञात्वाननंपृष्ठंरुद्राक्षांभोरुहाक्षयोः घटयेदेकदिग्वक्त्रान्मणीन्
सूत्रेतपङ्क्तिवत् ९१ सर्वेषामंतरेग्रंथिःकर्तव्यावर्त्तनद्वया अन्योन्याघर्षसिध्यर्थंघर्षोजपविनाशकृत् ९२
त्रिवृत्कुंडेनसूत्रेणसंप्रोच्यजपमालिकां वद्धानामननसंस्कारंयथाविधिसमाचरेत् ९३ प्रक्षाल्यपंचगव्येन
तथापंचामृतेनच सस्नाप्यतीर्थतोयेनशिकुंभस्थितेनच ९४ सकूर्चमूलमंत्रेणगंधपुष्पाक्षतादि
भिः धूपदीपनिवेद्यादिदत्वाथाष्टशतंस्पृशेत् ९५ मूलमंत्रजयेत्पश्चाद्दृढचसूत्रणावेद्वुधः एवंयासंस्कृतामा राम॰ ६०
लाजपकर्मणिसर्वदा ९६ अभिष्टफलदात्यर्थंसासर्वोघविनाशनी मध्यमानामिकांगुष्ठैरक्षमालामणीन्
स्पृशेत् ९७ एवंजपस्यचैकस्यक्रमोयंचालयेज्जपे अंगुष्ठेनतुमोक्षायतर्जनीशत्रुनाशनी ९८

मध्यमाधनदाशांतिकरोत्स्येष्टाद्यनामिका कनिष्ठारक्षणोशस्ताजयकर्मणिशोभने ९९ अंगुष्ठेनजयेज्ज
प्यंमध्येरंगुलिभिःसह अंगुष्ठेनविनाकर्मकृतंयदफलंचयत् १०० मोक्षार्थेपंचविंशत्स्यात्सप्तविंशतिपौ
ष्टिके त्रिंशच्चधनसंपत्तौपंचदशत्याभिचारिके १ जप्याक्षमालासकलाभ्रामयेदाशिखामणेः प्रदक्षिणं
पुनर्वक्रंप्रारभ्यैवंसमाचरेत् २ स्वयंवामेनहस्तेनजयमालांनसंस्पृशेत् आदिक्षितोद्विजोवापि
स्पृष्ट्वाचेच्छुद्धिमाचरेत् ३ नधारयेत्करेमूर्ध्निकंठेचजयमालिकां जपकालेजपंकृत्वासदागुह्यस्थ
लेक्षिपेत् ४ अलाभेजपमालायाःकरशाखासुपर्वभिः मध्यांगुल्यग्रपर्वादिप्रादक्षिण्यक्रमेण
तु ५ अथवाकरशाखाभिर्नसंख्योजापकैर्जयः अंगुल्याजयसंख्यानमेकमेकमुदाहृतं ६
रेखायाष्टगुणंविद्यात्पुत्रजीवैर्दशाधिकं शतंस्याच्छंखमणिभिःप्रवालैस्तुसहस्रकं ७ स्फ
टिकैर्दशसाहस्रंमौक्तिकैर्लक्षमुच्यते दशलक्षंराजताक्षैःसौवर्णैःकोटिरुच्यते ८ कुश

यंथ्याचरुद्राक्षैस्त्वनंतगुणितंभवेत् प्रदक्षिणानमस्कारौजपश्चैतित्रयोमया ९ संख्याहीनकृतंसर्वंर
क्षभ्यस्तन्मयार्पितं अतश्चसंख्ययाविद्वान्जपेत्सफलसिद्धये १० संख्याफलविशेष॥
अजयस्त्वजजपाद्भवेत् जयमालाविधिस्त्वेतत्प्रोक्तः कमलसंभव एवंसर्वंपरिज्ञायफलार्थीसततंज
श्च
पेत्॥३१॥ ॥इतिश्रीशैवरत्नाकरेपंचाक्षरिमाहात्म्यमेकादशोध्यायः ११ श्रीशिव॥
अंतर्योगः शिवधर्मशास्त्रे सर्वेषामेवयज्ञानांध्यानयज्ञःपरःस्मृतः नित्यं

शुद्धिः प्रसन्नश्च सर्वदोषविवर्जितः ॥१॥ शुक्लः कृष्णः परः सूक्ष्मः सुविशुद्धः स
माधिजः ॥ ध्यानयज्ञः परो यज्ञः स्थूलयुद्धस्तु कर्मिणां ॥२॥ विशुद्धः साधनैः सू
क्ष्मो ध्यानयज्ञः प्रसाध्यते । यस्मात्तस्माद्विशुद्ध्यर्थं अपवर्गफलप्रदः ॥३॥ अ
संयोगोपचारेण यो पूजयति शंकरं ॥ ध्यानयज्ञेन सततं स याति परमां गतिं ॥
॥४॥ वायवीयसंहितायां ॥ कर्मयज्ञस्तपोयज्ञो जपयज्ञस्तदुत्तरः ॥ ध्यानयज्ञो ज्ञा
नयज्ञः पंचयज्ञाः प्रकीर्त्तिताः ॥ ५॥ कर्मयज्ञरताः केचित्तपोयज्ञरताः परे ॥ जप
यज्ञरताश्चान्ये ध्यानयज्ञरतास्तथा ॥ ६॥ ज्ञानयज्ञरताश्चान्ये विशिष्टाद्युत्तरोत्त
रं ॥ कर्मयज्ञस्तपोयज्ञात् विशिष्टो दशभिर्गुणैः ॥ ७॥ जपयज्ञस्तपोयज्ञाद्ध्या
नयज्ञः शताधिकः ॥ कर्मयज्ञो द्विधा प्रोक्तः कामाकामविभेदतः ॥ ८॥ काम।

शै०र
७७

नकामिनपरोभुक्त्वाकामाश्च कःपुनर्भवेत्॥ अकामोरुद्रभवनेभोगान्भु
क्त्वाततश्च्युतः॥९॥ तपोयज्ञरतोभूत्वाजायतेनात्रसंशयः॥ तपस्वीचपुनस्तस्मि
न्भोगान्भुक्त्वापुनश्च्युतः॥१०॥ जपध्यानरतोभूत्वाजायतेभुविमानवः॥ ज
पध्यानरतोमर्त्यस्तद्देशिष्यवशाद्दिह॥११॥ ज्ञानंलब्ध्वाचिरादेवशिवसायु
ज्यमाप्नुयात्॥ तस्मान्मुक्तेश्चिराद्धेतुःधर्मयज्ञोपिदेहिनां॥१२॥ सकामःकाम
संयुक्तोबंधायैवभविष्यति॥ तस्मात्त्वंचसुयज्ञेषुध्यानयज्ञरतोभवेत्॥१३॥ ध्या
नंज्ञानंचयस्यास्तितीर्णस्तेनभवार्णवः॥ हिंसादोषविनिर्मुक्तविशुद्धश्चित्तसा
धनः॥१४॥ ध्यानयज्ञपरस्तस्मादपवर्गफलप्रदः॥ पूजयाविपुलंराज्यंअग्नि
कार्येणसंपदः॥१५॥ जपेनपापसंशुद्धिर्ज्ञानध्यानेनमुच्यते॥ प्रक्षीणाशेष

पापस्यज्ञाने ध्यानेभवे न्मति ॥१६॥ पापोपहतबुद्धीनांतद्वार्त्ता ऽपिसुदुर्लभः॥
बहिः कर्मरतायद्वत्तातीवफलभागिनः ॥१७॥ हृत्स्थानेरं द्रभवनेतद्वद्दत्त्वापि
बहिः कर्मिणा ध्यानिनां हिवपुःसूक्ष्मं भवेत्सत्यसमेश्वरं ॥१८॥ यथेह कर्मिणां
स्थूलंमृत्काष्ठाद्यैः प्रकल्पितं ॥ ध्यानयज्ञपरस्तस्माद्देवान्पाषाणम्
एमयान् ॥१९॥ नात्यंतंतमपद्येतपश्चाद्देवात्मवेदनात् ॥ सर्वात्रावस्थि
तंशांतंयोनपश्यतिशंकरं ॥२०॥ ज्ञानचक्षुर्विहीनत्वादंधः सूर्यं यथोदि
तं ॥ अग्नौ क्रियावतामप्सु व्योम्नि सूर्ये मनीषिणां ॥२१॥ काष्ठादिष्वेवमू
र्वाणांहृदिलिंगंतुयोगिनां ॥ आत्मस्थं यः शिवं त्यक्त्वा बहिरभ्यर्चयेन्न
रः ॥ हस्तस्थं फलमुत्सृज्य लिहेत्कूर्परमात्मनः ॥२२॥ एवं काष्ठानि तपां

शै०न०
७८

सियज्ञानकं शास्त्रकानस्यफलप्रदांश्च॥ संत्यज्यसर्वानिहयोगमेकं ध्यायेत्स
रंमुक्तिकरंविशुद्धं॥२३॥ तस्माद्दुष्टमसम्यक्स्वर्नीयमशुद्धं नित्संबंधसाध
नं॥ यज्ञाद्यंकर्मसंत्यज्ययोगंमुक्त्यर्थमभ्यसेत्॥२४॥ नित्यानियानिक
र्माणि विहितानिशरीरिणां॥ तेषामात्मन्यनुष्ठानंमानसायद्धहिर्वि
ना॥२५॥ गच्छन्तिष्ठन्स्वपन्जाग्रनुन्मिषन्निमिषन्नपि॥ शुचि
र्वाप्यशुचिर्वापि शिवलिंगंसुचिंतयेत्॥ ध्येयेसर्वत्रचिंतायांधातुरे
वहिपठ्यते॥ यात्वेनिश्चलाचिंताशैनध्यानंप्रवर्तते॥२७॥ द्विधाभव
तितद्ध्यानंसगुणंनिर्गुणंतथा॥ सगुणंवर्णभेदेन निर्गुणंकेवलंविदुः॥
॥२८॥ अश्वमेधसहस्राणि वाजपेयशतानिच॥ एतस्यध्यानयोगस्य

कैलानार्हति षोडशीं ॥२९॥ अंतश्चित्तो बहिश्चक्षुरधिष्ठाय सुखासनं ॥ सम
त्वं च शरीरस्य ध्यानमुद्रेति सिद्धिदा ॥३०॥ बद्धासनो नित्यमवक्रकायो योमानसं प्रा
णसमं नियम्य ॥ हृद्धृत्संकजकर्णिकायां ॥ आपन्यजेत्तत्परमं समुक्तः ॥३१॥
तथैव बृहस्पतिस्तोत्रे ॥ प्राणायामनियंत्रितानिलगणादुत्तानितानाहतांभोजेभ्यं
तरनादषट्पदरवे वायांदिहं सावृते ॥ यन्निर्भाति निर्वातदीपसु भगं ज्योतिः षड
गान्वितं ॥ तत्तेजोमयमंडलत्रयपरं तन्मौमि तत्वं शिवं ॥३२॥ योगशास्त्रे ॥ आराधया
मि मणिसन्निभमात्मलिंगं मायापुरे हृदयपंकजसन्निविष्टं ॥ श्रद्धानदी विमलचित्त
जलाभिषेकं नित्यं समाधिकुसुमैरपुनर्भवाय ॥३३॥ ज्ञानाद्ध्यानं भवेद्युः ध्यानात् ज्ञा
नं भूयः प्रवर्त्तते ॥ तदुभाभ्यां भवेन्मुक्तिः स्तामाध्यानरतो भवेत् ॥३४॥ शिवधर्मशास्त्रे ॥

शै॰र॰
७०

चिंतयेत् हृदये पूर्वं क्रमाद्दापि गुणत्रयं ॥ तमः प्रच्छाद्य रजसा सत्वेनाच्छादयेद्रजः ॥
॥३५॥ ध्यायेत्त्रिमंडलं पूर्वं कृष्णं रक्तं सितं क्रमात् ॥ सत्वोपरि गुणातीतं पुरुषं पं
चविंशकं ॥३६॥ ध्यायेत्तत्राशुद्धं च सत्काशुद्धं विचिंतयेत् ॥ ऐश्वर्यपंकजं दिव्यं पु
रुषोपरि संस्थितं ॥३७॥ द्वादशांगुलविस्तीर्णं शुद्धं विकसितं सितं ॥ नालमष्टां
गुलं तस्य नाभिकंदसमुद्भवं ॥३८॥ पद्मपत्राष्टकं ज्ञेयं अणिमादिगुणाष्टकं ॥ क
र्णिकाकेसरं ज्ञानं नालं वैराग्यमुत्तमं ॥३९॥ शिवधर्मस्तु तत्कंदमिति पद्मं विचिं
तयेत् ॥ ज्ञानैश्वर्यं च वैराग्यं शुद्धं धर्ममयं परं ॥४०॥ ज्ञात्वा पद्मासनं सर्वं सर्वदुः
खांतमाप्नुयात् ॥ तत्पद्मकर्णिकामध्ये शुद्धं दीपशिखाकृतिं ॥ अंगुष्ठमात्रमतुलं
ध्यायेदोंकारमीश्वरं ॥ ४१॥ कदंबगोलकाकारं नानारूपसमन्वितं ॥ ध्यायेद्वार

स्मिन्जालेन दीप्यमानं समे ततः॥ ध्यायेद्वा सततं ज्ञा तं वक्ष्यमाणे कसूत्रके॥ जपे
ध्यायेच्च सततमोंकारं शिवरूपिणं॥ ४३॥ ध्यानं निर्मथनाभ्यासा द्देवं पश्येन्निगूढ
वत्॥ तैलधारमिवाछिन्नं दीर्घघंटा निनादवत्॥ ४४॥ अवाच्यं प्रणवस्याग्रं यस्तं
वेद सवेद सवेदवित्॥ वेदः शिवः शिवो वेदो वेदाध्यायी सदाशिवः॥ ४५॥ तस्माद्रु
द्र परं नित्यं वेदाध्यायिनमर्चयेत्॥ अंगुष्ठाद रमात्रस्तु भि शिष्ठः पद्मजोमणिः॥ स
मणिः सुख बाह्यश्च महदर्थस्यासाधकः॥ ४६॥ अहिंसा प्रथमं पुष्पं पुष्पमिंद्रियनि
ग्रहः॥ सर्वभूत दयापुष्पं क्षमापुष्पं चतुर्थकं॥ ४७॥ ध्यानपुष्पं तपः पुष्पं ज्ञानपुष्पं तु
सप्तमं॥ सत्यं चैवाष्टमं पुष्पं येभिस्तुष्यति शंकरः॥ ४८॥ एवमष्टविधं ज्ञात्वा मानसे
शिवमर्चयेत्॥ य इहांतस्थसराज्ञां प्रियाः स्युर्नबहिश्चराः॥ तथांतर्ध्यान निरताः

शै॰र॰
८०

प्रियाशंभोर्नकर्मणः॥यथांतरुपचारेणनरस्त्रीप्रसीदति॥४९॥तथांतर्ध्यान
विधिनाप्रसीदतिमहेश्वरः॥वायवीयसंहितायां॥अंतर्यागरतःपुंसोबहिःकुर्वी
तवानवा॥रतिरभ्यंतरेयस्यनबाह्येपुण्यगौरवात्॥५०॥ज्ञानामृतेनतृप्तस्यभ
क्त्याचविवशात्मनः॥नांतरंनचबहिःकृत्स्नःकृत्यमस्तिकदाचन॥५१॥तस्मा
त्क्रमेणसंत्यज्यबाह्यमभ्यंतरंतथा॥ज्ञानेज्ञेयमालोक्यतानंचापिपरित्यजेत्॥५२॥
नैकाग्र्यंचच्छिवेचित्तेकिंकृतेनापिकर्मणा॥५३॥तस्मात्कर्माणिकृत्वावाकृत्वा
वांतर्बहिःक्रमात्॥येनकेनाप्युपायेनशिवेचित्तंनिवेदयेत्॥५४॥शिवेनि
विष्टचित्तानांप्रतिष्ठितधियांसतां॥परत्रेहचसर्वत्रनिर्वृतिःपरमाभवेत्॥५५॥
अथवा॥बाह्येवाभ्यंतरेवापियत्रस्यान्मनसोरतिः॥भागवासनवशादेवत

त्त्विष्टां समाचरेत् ॥८६॥ बहिर्यागोपचारेण देवं देवीं च पूजयेत् ॥ अथवा
तर्बहिश्चैव पूजयेत्परमेश्वरं ॥८७॥ अशक्तः शिवपूजायां भक्त्या दद्याद्वेवशंकरं ॥
श्री इतः प्रभृति संस्थानं वक्ष्येहं नियमादिति ॥८८॥ ॥ इति शैवरत्नाकरे अं श्री
तर्याग द्वादशोध्यायः ॥१२॥ ॥ ॥ ॥ छ ॥ छ ॥ शिवपूजाक्रम ॥ ॥
बाह्योपासनमनिषायाबुध्याबुद्धिपूर्वकं जिव्हासंसंगृण्हति ॥ बुद्धिपुर्वकं हृ
दयाकाशस्थितमुपासते ॥ अंतराराधनपुर्वकं गत्वाप्युपलक्षणमाह ॥
यद्धि मनसा ध्यायति तद्वाचावदति तत्कर्मणा करोतीति वेदवाक्यप्रमाणे
न अंतराराधनाद्र्ध्वं जपं जपादूर्ध्वं बहिराराधनं करोतीति वीरमाहेश्वर
राचाया निर्णयः ॥ तद्यथा क्रियासारे ॥ ईश्वरः ॥ लिंगार्चनविधिं वक्ष्ये शिवस्य

शैव. ८३

परमात्मनः॥ सर्वपापक्षयकरं सर्वतीर्थफलप्रदं॥१॥ समस्तदानफलदं सर्वय
ज्ञफलप्रदं॥ समस्तभोगफलदं साक्षान्मुक्तिप्रदायकं॥२॥ तस्मात्सर्वप्रयत्नेन शि
वैकाहिकमानसः॥ शिवपूजाविधिः कार्यो यदिच्छेच्छ्रिद्धिमात्मनः॥३॥ स्वगृहं
वा द्विजावासं सरित्तीरं गृहं वनं॥ मठस्तटाकाश्वसरोमंडपो गह्वरो गुहा॥४॥ आ
रामः पर्वताश्चान्य द्रह स्थानं मनोहरं॥ चरार्चनस्य स्थानानि प्रशस्तानि चतुर्दश॥
५॥ गृहस्येशानदिग्भागे पूजस्थानमिति स्मृतं॥ आलये वेदिका तत्र पूजार्थं
कारयेद्बुधः॥६॥ चरलिंगार्चने देवपूर्वाभिवदनं मुखं॥ स्थिरलिंगे यथा कुर्य
मुखमादौ तदर्चयेत्॥७॥ रत्नसौवर्णरजतपीठे वाचंद्रकांतके॥ स्फाटिके स्तारवे
वापि स्थापयेल्लिंगरूपिणं॥८॥ अस्मिन्लिंगे करिष्यामि नियमं श्रुतिचोदितं॥

इत्यागमेतिहासादि सिद्धं नियमाचरन्। ९। उपचारपरत्वाच्च शिवस्यैतान्प्रकल्पये
त्। गुरोपदिष्टमार्गेण यागशाखांगशक्ति संकल्पितासने ॥१०॥ शिवलिंगे विनाभा
वसंमैबं धामर्चनमतं ॥ एकैकानंतरं कुर्यात्कल्पिताचमनीयकान् ॥११॥ विनि
योगोपचारेण संतुष्यति सदा शिवः॥ दीक्षितानां द्विजातीनां स्त्री शूद्राणां तथैव च॥
॥१२॥ लिंगे स्वगुरुणा दत्ते पूजनान्यत्र चोदिता॥ देवलः व्रात्य दुःशील खर्व रुष्टा
नादि दुर्जनैः॥१३॥ स्थानान्युपहतान्यत्र पूजां यत्नेन वर्जयेत्॥ प्रक्षाल्य चरणौ ह
स्तौ सपवित्रकर द्वयः॥१४॥ श्वेतवस्त्रश्चोपवीतः सुसंयत सिखंडकः॥ आच
म्यविधिवत्सम्य क्त्रिपुंड्रमथ धारयेत्॥१५॥ मूर्धाद्यंगेषु रुद्राक्षं दद्यादुक्तेव
नुक्रमात्॥ देवदक्षिण दिग्भागे शासश्चाउ द ङ्मुखः॥१६॥ ततः प्रसरपीठस्थ

शैव॰
८२

प्राणायामं समाचरेत्॥१६॥स्नपने च रलिंगस्य पंचाढकमितं जलं गंधप्रसवकैर
त्तमंत्रयैतोन्यमूनि च॥१७॥एतानि ताम्रकुंभेषु पंचप्रस्थमितेषु च।वस्त्रपूतानि तो
यानि समापूर्य विनिक्षिपेत्॥१८॥गंधपुष्पाक्षतैः सार्कं तत्तद्द्रव्याणि मंत्रतः॥सा
मान्यमंबुसंस्कारं यथैवेषु तथाचरेत्॥१९॥अष्टोत्तरशतं मूलमंत्रेणैवाभिमंत्रयेत्॥
तन्मंत्रसलिलं प्रोक्तं पंचमं स्नपने त्विदं॥२०॥सामान्यपयसा पात्रं व्यवहार्यमपू
र्यं च॥गंधादीनि विक्षिप्य तत्र प्रागवन्निमंत्रणं॥२१॥स्थानद्रव्याणि चास्त्रेण प्रो
क्षयेत्तेन वारिणा॥स्थानद्रव्यविशुद्धिस्या सद्यजातेन कर्मणा॥२२॥अर्घ्याच
मनपाद्यानां पात्राण्यद्भिः प्रपूरयेत्॥ततः सामान्यपात्रं च ततः क्षालनपात्र
कं॥२३॥पूरयित्वेषु पात्रेषु गंधपुष्पाक्षतान्क्षिपेत्।यत्र नैवेद्यनिर्माल्यसंकी

र्णकलशादिभिः॥२४॥स्नानंतुक्रियतेभक्त्यानतद्गृण्हातिशंकरः॥स्थंडि
लेशिवलिंगेचगंधपुष्पाक्षतादिभिः॥२५॥द्रव्यैरभ्यर्चयेद्देवंयथाविभवविस्तरं॥
मध्यमानामिकाभ्यांपुष्पंसंगृह्यपूजकः॥२६॥अंगुष्ठतर्जन्यग्राभ्यांनिर्माल्य
मपनोदयेत्॥अशून्यमस्तकंलिंगंसदाकुर्वीतपूजकः॥२७॥अरणिस्थो
महावह्निर्मथनेनैवदृश्यतेतथैवलिंगमंत्रेणदृश्यतेपरमेश्वरः॥२८॥ज्योतीरूपं
सर्वगतमद्वितीयमनोपमं॥ध्यात्वोंकारेणतल्लिंगेप्रक्षिपेत्कुसुमांजलिं॥२९॥
पाद्यंचाचमनंचार्घ्यंवस्त्रंयज्ञोपवीतकं॥गंधाक्षतप्रसूनानिधूपदीपमनुक्रमात्॥
॥३०॥दत्वाथमूलमंत्रेणयथाशक्तिजपंजपेत्॥सपुष्पशीर्षंतल्लिंगंततःस्नपन
माचरेत्॥३१॥पयोदध्याज्यमध्विक्षुरसैर्मूलेनपंचभिः॥ततोगोधूमचूर्णेनघृ

शैल·
९३

दृष्टां ध्राकोष्णेनवारिणा ॥ ३१ ॥ स्नापयेदनिविद्धैर्वा मुद्गचूर्णैरलाभतः ॥ स्नापये
दथगंधाद्भिः पुष्पाद्भिः स्नापयेदथ ॥ ३३ ॥ स्नापयेदथहेमाद्भिरलाद्भिः स्नाप
येदतः ॥ स्नापयेदथमंत्राद्भिः क्रमेणैव समाचरेत् ॥ ३४ ॥ सर्वाण्यमूनि स्नाना
निमूलेन ब्रह्म भिश्चरेत् ॥ एवं संस्नाप्य विधिवद्दत्वाप्याचमनं ततः ॥ ३५ ॥ तत्सधा
नासनेदेवं कल्पितेसन्निवेशयेत् ॥ युक्तद्रव्येषदशासुयलुब्धं पात्रपावनं ॥ ३६ ॥
विनिक्षिप्याथतद्रूपं सुसंस्कृत्य निवेदयेत् ॥ ३६ ॥ प्रथमाभिहितेपात्रे स्थापि
तं दीपसंचयं ॥ पूर्वोक्तसाधनोक्षिप्तं तच्चप्रोक्ष्य समर्चयेत् ॥ ३७ ॥ पूर्वोक्तविधि
नासिद्धानन्नानाज्येन भक्षणैः ॥ बहुभिर्बहुधा व्यक्षैः सहदध्नागुडेनच ॥ ३८
सौवर्णराजतेताम्रे पात्रेकांस्येथवा शुभे दर्शनीयं यथास्थाप्य तन्निवेद्य निवे

घं निवेदयेत् ॥ ३९॥ मूलमंत्रेजपंकुर्यादष्टाविंशतिसंख्यया ॥ पानीयंचततो द
द्यात्सुगंधमतिशीतलं ॥ ४०॥ ततआचमनंदद्यात्करवासानुलेपनं ॥ दत्वापा
त्रेथतांबूलंसन्निधायसमर्पयेत् ॥ ४१॥ ततोदद्याद्भूषणानि किरीटादखिला
न्यपि ॥ प्रदद्याद्दर्पणछत्रंतालवृंतंचचामरं ॥ ४२॥ ईश्वरस्ययथापूर्वमुप
चारान्कृतान्हितान् ॥ तथादेव्याः प्रकुर्वीत तन्मंत्रेणैवचाखिलान् ॥ ४३॥ ए
वंसंपूज्यदेवेशंकुर्यादावरणार्चनं ॥ पंचब्रह्मषडंगानि गर्भावरणदेवतां ॥ ४४॥
देवश्चपश्चिमेसद्यं वामंसौम्येसमर्चयेत् ॥ दक्षिणेघोरवक्त्रंचप्राच्यांतत्पुरु
षंयजेत् ॥ ४६॥ ईशानमीशदिग्भागेयथाविधिसमर्चयेत् ॥ अथाग्नीशासुर
मरुत्कोणेष्विंद्रेचवारुणे ॥ ४७॥ चतुष्ककुप्सुचांगानि षट्क्रमेणसमर्चयेत् ॥

शैव॰ ८४

गर्भावरणमेवं स्यात्पूजये द्देशिकः सदा ॥ ४८ ॥ ईश्वरस्य पुरस्तात्तु ततो नाद्या

दिकं चरेत् ॥ मूलमंत्रं जपेत्पश्चाद्दशोत्तरसहस्रकं ॥ अष्टोत्तरशतं वापि यथाशक्ति

प्रसन्नधीः ॥ ४९ ॥ सुगंधाक्षतपुष्पार्घ्यं जलमादाय पाणिना ॥ तज्ज्ञानं देव पा

दाब्जे येन दार्पणं स्मृतं ॥ ५० ॥ चुलुकोदकप्रदानेन प्रीयात्तज्ज्ञापितं बुधैः ॥ एवं यः कु

रुते भक्त्या तीर्णस्ते भवार्णवः ॥ ५१ ॥ एवं स्वात्मार्पणं कृत्वा स्तोत्रैः स्तु भक्तितो

जपेत् ॥ प्रदक्षिणनमस्कारं यथाशक्त्या प्रसन्नधीः ॥ ५२ ॥ कृत्वा तु प्रार्थयेद्दे

वं मंत्रेणानेन भक्तितः ॥ अपराधसहस्राणि क्रियंते हर्निशं मया ॥ दासोऽह

मिति मां मत्वा क्षंतव्यं भक्तवत्सल ॥ ५३ ॥ एवं संप्रार्थ्य विधिवद्देवदेवं महे

श्वरं ॥ तत्पादपद्मप्रसवप्रसादं धारयेद्बुधः ॥ ५४ ॥ दद्याच्च चरणांभोजे भ

त्तयापुष्पांजलित्रयं ॥ आदिशैवेनकर्त्तव्यंप्रतिष्ठाद्यर्चनादिकं ॥ ५५ ॥ अन्य
थाकारयेद्यस्तुनिष्फलत्वमवाप्नुयात् ॥ लिंगेमंत्रेणयद्दत्तंरत्नहेमवि
नेतरात्तरात् ॥ ५६ ॥ समर्प्यापगतंद्रव्येनिर्माल्यमितिकीर्त्तितं ॥ संपूज्या
थशिवंभक्त्यागुरुपंक्तिसमर्चयेत् ॥ स्वगुरुंपरमगुरुंपरमाचार्यसंज्ञेतं ॥
॥ ५७ ॥ प्रारंभाद्यवसानांतंप्रतिकर्मपुनःपुनः ॥ जलंक्षालनपात्रस्थं
स्पृष्ट्वास्पृष्ट्वासमाचरेत् ॥ ५८ ॥ प्रारंभाद्यवसानांतंसर्वंमौनेनकारये
त् ॥ भाषणंभाविचेत्तत्रवदेत्संस्कृतयागिरा ॥ ५९ ॥ अर्चनादौयवनिकांद
त्वेशार्चनमाचरेत् ॥ दत्वादेवायतांबूलंदत्वायवनिकांहरेत् ॥ ६० ॥ कदाचिद
पिलिंगस्योपरिभ्रामयत्करं ॥ लिंगेहस्तमवष्टभ्यनासिकारोधकस्तथा ॥

शै०र०
८५

अत्रोक्तपूजाद्रव्याणामलाभे वापि संकटे ॥ पुष्पप्रदानमात्रं वा कुर्याद्भाव
पुरःसरं ॥ ६२ ॥ एककालं द्विकालं वा त्रिकालं सर्वदापि वा ॥ भक्त्या अह
रहः कुर्यान्नियमेनेश्वरार्चनं ॥ ६३ ॥ सर्वपापविनिर्मुक्तः सर्वपुण्यफला
न्वितः ॥ भोगानिहाखिलान्भुक्त्वा प्राप्नोत्यंते सदाशिवं ॥ ६४ ॥ अयमंत्रपरो ध
र्माचारेण सत्कृतो भवेत् ॥ अनभ्यर्च्य न भुंजीत देवमाप्राणसंचरात् ॥ ६५ ॥ अज्ञानाद
थवालस्यान्न करोतीश्वरार्चनं ॥ तिर्यग्योनिशतं गत्वा संसारे वर्त्तते चिरं ॥ ६६ ॥ शि
वरहस्ये ॥ वीरशैवाभिषिक्तानां भक्तानामहर्णास्पदं ॥ गर्भावरणमीशस्यमुच्यते
सूक्ष्मरूपतः ॥ ६७ ॥ अनादिशैवमार्गेण दीक्षितः परमं शिवं ॥ ईशानाद्यस्त्रपर्यंत
मेकावरणमर्च्चयेत् ॥ ६८ ॥ प्रथमं सिंहासनं च पद्मासनं द्वितीयकं ॥ विमला

सनेत्तृतीयस्यादासनत्रयमाचरेत्॥६९॥पंच च ब्रह्म शिवांगेश्च पूजयेत्सूर्वक्त
तः॥एकावरणमेवोक्तं पूजयेद्देशिकस्तथा॥७०॥स्वगुरुं पूजयेत्तत्र गंधपुष्पाक्ष
तादिना॥सवीरतंत्रमार्गोक्तनियमो नियतेंद्रियः॥७१॥अप्रमत्तः शिवाचारे लिंगा
राधनको भवेत्॥एकस्मिञ्जगदाधारे लिंगे विश्वासकेपुनः॥७२॥स्वर्गादि चिन्हे
संसारे बंकुत्तमुपपद्यते॥अविद्यया तथा लिंगं बहुसंस्कारसंयुतं॥७३॥यः पूजयति
वैषम्याद्बहुलिंगार्चकः स्मृतः॥स्कांदे॥उमामहेश्वरसंवादे॥साधुसाधुमहाभा
गे भक्तानां भक्तिवत्सले श्रृणु देवि प्रवक्ष्यामि लिंगार्चनविनिर्णयं॥७४॥शुद्धं
मिश्रं तु संकीर्णं त्रिविधं लिंगपूजनं॥शुद्धं तु लिंगतन्मात्रं मिश्रं चैव सदाशिवं॥
॥७५॥संकीर्णं प्रतिमाकारं लिंगत्रयमिदं श्रृणु॥योर्चायामर्चये द्रुद्रं पूर्णं वर्षशं

शैव०
९६

तंनरः॥७६॥एकंच दिवसं लिंगे समभेतन्न संशयः॥अन्यार्चनेन नतुष्यामि
नथा देविनगात्मजे॥७७॥लिंगे र्चितस्य चास्मर्थं परितुष्यामि पार्वति॥यत्पुण्यं
प्रतिमार्चायां युगकोटिशतैरपि॥७८॥तत्फलं लभते देवि लिंगेतु घटिकार्ध
के॥लिंगं पूजयते नित्यं सर्व देवनमस्कृत॥७९॥पूजिते नतु लिंगेन सर्वे देवाः
प्रपूजिताः॥स्थावरे जंगमेवापि भूयामि चचतुर्विधे॥स्वर्गे मर्त्ये च पाताले त्रै
लोक्ये सचराचरे॥नास्ति लिंगात्परं दैवं मूढा कुर्श्यं तिसंर्वदां चान्यथा॥
॥८१॥ग्रामे वा यदि वारण्ये जले वापि स्थले पि वा॥यत्र वा दृश्यते लिंगं सर्व
तीर्थानि तत्र वै॥८२॥चंडाल श्वपचागारे लिंगं तिष्ठेन्महत्तरं॥तद्ग्रामं शि
वलोकं स्यात्तद्गृहं शिवमंदिरं॥८३॥लिंगमध्ये महादेव साक्षाद्देवव्यवस्थि

तः॥ अनुग्रहायलोकानां तस्माल्लिंगं प्रपूजयेत्॥ ८४॥ देवदानवगंधर्वसिद्ध
किंनरसुरोत्तमकाः॥ लिंगमेकं परं नास्ति तस्माल्लिंगं प्रपूजयेत्॥ ८५॥ ऋषयोयो
गिनो विप्रा ज्ञानिनो ब्रह्मवादिनः॥ पूजयंति सदा कालमीशानं सुरनायकं॥
॥ ८६॥ सदा यजति यज्ञेन सदा दानं प्रयच्छति॥ सदा वै वायुभक्षः स्यात्सकृ
दभ्यर्च्चयेच्छिवं॥ ८७॥ अग्निहोत्रांश्च वेदांश्च यज्ञांश्च बहुदक्षिणाः॥ शिव
लिंगार्च्चनस्यैते कोट्यंशेनापि नो समाः॥ ८८॥ यानि कानि च तीर्थानि आ
समुद्रात्सरांसि च॥ स्नानात्फलमवाप्नोति सकृदभ्यर्च्चयेच्छिवं॥ ८९॥ प्र
याग संगमे चैव गंगासागरसंगमे॥ तपस्तप्तं भवत्येव यस्तु लिंगार्च्चने रतः॥
॥ ९०॥ धन्यो देशपुरग्रामो लोको गोत्रं गृहं च तत्॥ यत्र त्वं देवदेव देवेश पूज्यते

सुकृतात्सभिः॥९१॥न तत्र देशे दुर्भिक्षं न च मारी प्रवर्त्तते॥ न काले म्रियते स जातः पूज्यते यत्र शंकरः॥९२॥ जन्मकोटिसहस्राणि सुकरांतानि यो नियोनि जः॥ सुकृतांता नियो निजः॥९३॥ सकृदभ्यर्चनाल्लिंगे मुक्तः संसारबंधनात्॥ सकृल्लिंगार्चने गर्भजन्म न विद्यते॥९३॥ सततं चार्चयेद्यस्तु स याति परमां गतिं॥ सकृत्पूजयते लिंगं वर्षकोटिशतत्रयं॥९४॥ कैलासशिखरे रम्ये मातृजाः पितृजाः स्थिताः॥ अर्चयंति सदा रुद्रं न ते प्रकृतिमानुषाः॥९५॥ रुद्रलोकात्परिभ्रष्टास्ते रुद्रा नात्र संशयः॥ मेरुमंदरमात्रोपि राशिः पापस्य कर्मणः॥९६॥ ईश्वरं वैद्यमासाद्य नश्यंते कुष्टरोगवत्॥९६॥ ब्रह्मादिस्तंबपर्यंतं शिवयोगमुदाहृतं॥ लिंगार्चनविहीनानां कुतो मोक्षः कुतो दिवं॥९७॥ स्मशानं तद्गृहं घोरं स देशः प्रेतभूमिकाः॥ म्लेच्छाः

न

सर्वे पितेलोकाः शिवेयत्र पूज्यते ॥ ९८ ॥ श्वपचोपिमुनिश्रेष्ठो ब्राह्मणः श्वप

चाधमः ॥ संसारदुःखकांतारे निमग्नस्यान्महातपः ॥ ९९ ॥ चक्रवर्त्त्यमतेदे

वि लिंगार्चनविवर्जितः ॥ किंतेनजातमात्रेणभूभारेणान्नशत्रुणा ॥ १०० ॥

अपूज्ययित्वाचेशानं लयोभुङ्क्ते नराधमः ॥ पापानाममन्नरूपाणांतस्यभो

जनमुच्यते ॥ १ ॥ नास्तिलिंगार्चनंयस्यम्लेंछयोनिषुजायते ॥ लिंगार्च

नमुखयातिरुद्रत्वगणमुख्यता ॥ २ ॥ तस्मात्सर्वंपरित्यज्यशिवेकाहित

मानसः ॥ शिवपूजाविधिःकार्यो यदिचेत्सिद्धिमात्मनः ॥ ३ ॥ दुर्लभंप्राप्य

मानुष्यंयार्चयंतिपिनाकिनं ॥ तेषांवैसफलंजन्मकृतार्थास्तेनरोत्तमाः ॥ ४ ॥ भ

वभक्तिपरायेच भवप्रणवचेतसः ॥ भवसंस्कारिणोद्युक्तानतेदुःखविभा

शै॰र॰ गिनः॥५॥ भवत्तानि मनोज्ञानि विभ्रमाभरणा स्त्रियः॥ धनं चात्र सिप
४९ येते शिवपूजा विधेः फलं॥६॥ ये वांछंति महाभोगान्राज्यं च त्रिदलालये॥
ते र्चयंति सदा कालं शिवस्य चरणांबुजं॥७॥ सौभाग्यं कांतिमद्रूपं सत्संसा
गः प्रभावतः॥ शौर्यं च जगति ख्यातिः शिवमर्चयतो भवेत्॥१०८॥ व्यापा
रं संकलं त्यक्त्वा पूजयश्च सदाशिवं॥ निकव्यराव दृश्यंते कृतांतनराहि
माः॥१०९॥ त्वरितं जीवितं याति त्वरितं याति यौवनं॥ त्वरितं व्याधिरभ्येति त
स्मात्पूज्यं पिनाकधृक्॥१०॥ यावन्नयाति मरणं यावन्नक्रमते जरा॥ यावन्नें
द्रियवैकल्यं तावत्पूजय शंकरं॥११॥ न शिवार्चनसाम्यो स्ति धर्मो न्यो भुव
नत्रये॥ इति विज्ञाय यत्नेन पूजनीयः सदा शिवः॥१२॥ सत्सेव त्वि हितव

चिसारं व चिपुनः पुनः ॥ असारे दग्ध संसारे सारं यच्छंभुपूजनं ॥ १३ ॥ मूं
वृक्षस्य मूलसेकेन शाखाः पुष्यंति वै यथा ॥ शिवस्य पूजया यद्वत्पुष्णाति च
वपुर्जगत ॥ १४ ॥ क्रोधाल्लोभाद्भयान्मोहाद्दंभेन कपटेन वा ॥ एनकेन प्र
कारेण धन्यः पूजयते शिवं ॥ १५ ॥ शिवधर्मशास्त्रे ॥ यथा भुः सर्वभूतानां रक्षा
नं साधारणं स्मृतं ॥ तथा च शिवभक्तानां सामान्यं शिवपुरं स्मृतं ॥ १६ ॥ यथेह
सर्वभूतानां भोगेच्छा तीव्रया स्मृता ॥ नानापुण्य विशेषेण भोगाः शिवपुरे तथा ॥
१७ ॥ तत्रार्चयंति ते रुद्रं सक्त दुच्छिष्टकर्मणा ॥ तेषां पिशाचलोकेषु भोगानिष्टा
न्प्रयच्छति ॥ १८ ॥ ये पूजयंति ये रुद्रं क्रूराः क्रुद्धा विलोचनाः ॥ रक्षोलोके शिव
स्तेषां महाभोगं प्रयच्छति ॥ १९ ॥ त्रिरर्चयंति ये रुद्रं मद्यमांसरता नराः ॥ यक्ष

न्

शै.र.
८९

लोके शिवस्तेषां महाभोगांप्रयच्छति ॥ २० ॥ येगीतनृत्यं कुर्वंति त्रिचतुर्वा यदृच्छ
या ॥ शिवाग्रतस्तु तेयांति गंधर्वभवनंगताः ॥ २१ ॥ लोकेख्याति समुद्दिश्य पं
चार्चयंतियः शिवं ॥ तस्येंद्रभवने रुद्रः कामान् दिव्यान्प्रयच्छति ॥ २२ ॥ कामासं
तेन चित्तेन यः समर्चयते शिवं ॥ सोमरस्थाने शिवस्तस्य दिव्यान्भोगान्प्रयच्छ
ति ॥ २३ ॥ सप्तकृत्वो यजंते ये गंधपुष्पाक्षतादिभिः मौकेन ॥ प्राजापत्ये शिवस्ते
षां लोके भोगान्प्रयच्छति ॥ २४ ॥ अष्टकृत्वो यजंते ये गोगायत्र्या वेदपारगाः ॥ स
द्भावितः शिवस्तेषां ब्रह्मलोकं प्रयच्छति ॥ २५ ॥ नवार्चयंति ये रुद्रमेकत्वं समुपा
श्रिताः ॥ ते यांति विष्णु भुवनं दिव्ये भोगे रमंति च ॥ २६ ॥ ज्ञेयं विष्णुपदादूर्ध्वं
दिव्यं शिवपुरं महत् ॥ तज्ञो गस्थानमतुलं कर्मयामरता त्मनो ॥ २७ ॥ तत्राष्ट

गुणैमैश्वर्यैर्पार्थिवं पिशिताशिनां ॥ तस्मात्सुज्यगतानांच नराणांतत्समंस्मृतं ॥ २८ ॥
स्त्रियोपि लिंगमाराध्य भक्तिभावेन भाविताः ॥ विभवान्ममभोगाद्यै विंशैषैरनु
भुंजते ॥ २९ ॥ प्राप्नुवंति इह कामानि मनसा चिंतितानितु ॥ कामासक्ताश्च ये देवि
लिंगाराधनभाविताः ॥ ३० ॥ ॥ ॥ अथ दर्शनस्पर्शनमाहात्म्यं ॥ उमामहेश्वर
संवादे ॥ दृष्टंपापहरं देवि स्पृष्टं शिवपुरं नयेत् ॥ अर्चितं भक्तिभावेन दद्यान्मो
क्षंनसंशयः ॥ १ ॥ कायस्य शुद्ध्यात्मशुद्धिश्च अंगन्यासकरस्यच ॥ सर्वशुद्धिर्भवे
न्नित्यं लिंगस्पर्शनदर्शनात् ॥ २ ॥ मेरुकांचनदत्तानां गवांकोटिशतैरपि ॥ पंच
कोटितुरंगानां तत्सलं लिंगदर्शने ॥ ३ ॥ ब्रह्मघ्नोवा सुरापोवास्तेयीवागुरुतल्पगः ॥

शै॰र॰
९०

अथनमस्कारविधिः॥ उरसा शिरसा दृष्ट्या मनसा श्रद्धया गिरा॥ पद्भ्यां सुभाभ्यां बाहुभ्यां प्रणामोष्टांग उच्यते॥४॥ मातृहा पितृहा चैव वीरहा भ्रूणहापि वा॥ अमंत्री वा शिवं स्पृष्ट्वा सर्वपापैः प्रमुच्यते॥५॥ उत्संगांगं शरीरस्य सर्वं स्पर्शं यथाविधि॥ दंडवत्सततं यस्या हृंड प्रणतिरुच्यते॥६॥ अवष्टभ्याव निभालं करै जानुपदाग्रकैः॥ प्रणामः क्रियते योसौ प्रक्रा प्रणतिरीरितः॥७॥ अपयकुड्मलवद्धस्तौ कृत्वा हृत्पुरर्ध्वं संज्ञितौ॥ शिरस्यारोपणं यद्वृत्त करः संपुटकाह्वयः॥ एवं त्रिधा नमस्कारः कथितः कमलासन॥८॥ श्रेष्ठा मध्यः कनिष्ठश्चेस यं सम्यग्यथाक्रमात्॥ ईश्वरस्याग्रतः श्रेष्ठो नमस्कार उदाहृतः॥

मात्रादीनां नमस्कारो मध्यमः परिकीर्त्तितः ॥ इतरेषां नमस्कारः कनिष्ठः संप्र
कीर्तितः ॥ १० ॥ एवं नमस्कारविधिः प्रत्येकमुदितः क्रमात् ॥ सर्वेषामीश्वरा
नां कनिष्ठः संकटस्थले ॥ ११ ॥ नमस्कारः प्रकर्त्तव्यस्तदनुग्रहकारकः ॥ स
र्वेषामुपचाराणां प्रणामो संतमुत्तमः ॥ १२ ॥ तं विना न्यापुपचारा ये कृतास्ते नि
ष्फलाय दि ॥ तस्मात्प्रणामं कुर्वीत सततं गुरुदेवयोः ॥ १३ ॥ दंडः प्रणामं यः कु
र्यात्सो पि याति परां गतिं ॥ साधराणां सहस्रस्य फलं बध्वा सुखी भवेत् ॥ १४ ॥
पशवः पशुपत्यग्रे दंडवत्संनिताभुवि ॥ पतंति पातकाः सर्वे नोत्तिष्ठंति पुनः
सह ॥ १५ ॥ सर्वावस्थांगतो वापि युक्तो वा सर्वपातकैः ॥ शिवं दृष्ट्वा नमस्कु
र्यात्सो पि याति परां गतिं ॥ १६ ॥ स्वगुरुं वा महेशं वा प्रणमेदेकपाणिना ॥ ॥

यदिपूर्वार्जितंपुण्यंनस्याशेषंविनश्यति॥१७॥तात्सर्यसंग्रहे॥वज्रिण्यामुद्र
याशंकंपदिन्यादर्शयेद्विधिं॥शंकिन्याकेशवंरुद्रंशिरस्यांजलिमुद्रया॥१८॥
देवत्वदेवविषयाणिनमांसिपुंसांतस्मैनमःश्रुतिबलादवधारयामः॥देवांत
रेषुविहितान्यपितान्यमूनिस्त्रोतांसिसागरइवत्वयिसंपतंति॥पदेपदांत
रन्यस्तंकरोचलनवर्जितौ॥स्तुतिर्वाचाहृदिध्यानंचतुरंगंप्रदक्षिणं॥प
रिक्रमास्त्रिधास्टष्टिस्थितिसंहारभेदतः॥प्रदक्षिणंप्रवामंतदुभयंचवृष
कृप्रवक्॥२०॥प्रकृष्टंदक्षिणंपार्श्वेगमनेपरितोभृशं॥यस्ययस्यत्रयच्छे
ष्टैःप्रदक्षिणमितिस्मृतं॥२१॥परिक्रमेणवामपार्श्वेंप्रकृष्टंयस्यकस्यच॥
प्रवाममभितस्तोक्रमस्यर्थनियतात्मभिः॥२२॥प्रदक्षिणस्रष्टिमार्गःप्रवा

मंसंहतिःक्रमात्॥प्रदक्षिणंप्रवामंत तद्दारव्यातःस्थितिक्रमः॥२३॥प्रद

क्षिणंप्रवामंचप्रवरंत्वाश्रमस्थयोः॥उभयःप्रक्रमःप्रोक्तोगृहस्थस्यैवसर्व

दा॥२४॥पूर्वपदाभ्यांसस्यागप्रणिपत्यततस्ततः॥दंडप्रणत्यापरितःप्रक्र

मस्त्रिविधःस्मृतः॥२५॥पूर्वप्रकारा द्धपुष्पादेवपार्श्वेशिवोयथा॥भूमौलु

ठित्वागमनंतस्यादंगपरिक्रमः॥२६॥स्वस्वाश्रमोक्तमार्गेणप्रकर्त्तव्यः

फलेप्सुभिः॥परिक्रमोयंकर्त्तव्यो नियमेनानुवासरं॥२७॥संख्यासम

न्वितःसोयंनित्यइत्यभिधीयते॥अष्टम्यांचचतुर्दश्यांपक्षयोरुभयो

रपि॥२८॥वैधृतौचव्यतीपाते इषुवायनयोरपि॥चंद्रसूर्यग्रहण्यास्वज

न्मनर्क्षेविशेषतः॥२९॥परिक्रमोयंकर्त्तव्यःसनैमित्तिकउच्यते॥महा

श्रीशिव

शै०र०
९२

रोगभयो साते उल्कादु स्वप्नदर्शने ॥ ३० ॥ परिक्रमो यं कर्त्तव्यः स्वनैमिति
कस्मृतः परिक्रमेषु सर्वेषु सोमसूत्रं न लंघयेत ॥ ३१ ॥ लंघना सोमसूत्रस्य
नरके पतनं ध्रुवं ॥ यावत्प्रासाद विस्तारं ता वदूर्ध्वं प्रमणालिकं ॥ ३२ ॥ उदकू
स्छलं प्रमणाभ्यादि सोमसूत्रमिति स्मृतं ॥ प्रथमं द्वारमारभ्य द्वारावधि परिक्र
मेत् ॥ ३३ ॥ प्रदक्षिणकृतो धीमान्नतु दीर्घपदं न्यसेत् ॥ न गच्छेत्त्वरितं जल्प
नेतरैर्मानुषैः सह ॥ ३४ ॥ छायां न लंघयेदंतः शिवधाम्नः सुबुद्धिमान् ॥ प्रज
पन् शिवसूक्तानि ऋग्यजुः सामजान्यपि च ॥ ३५ ॥ स्तोत्राणि वा पुराणेषु विदधीत
परिक्रमं ॥ प्रदक्षिणत्रयं कृत्वा नमस्कारैश्च पंचभिः ॥ ३६ ॥ पुनः प्रदक्षिणं कृत्वा
शिवलोके महीयते ॥ शैवं पाशुपतं सोमं लाकुलं तु चतुर्विधं ॥ ३७ ॥ शैवभेद

मितिज्ञात्वासंकरं नसमाचरेत्॥ तत्रसंकरदोषेणराजाराष्ट्रंचनश्यति॥३९॥
ममदेवार्चनंद्रष्टुमहोयेहीतिजनंसदा॥ आवाह्यदर्शयेद्येसौपूजाविक्रयिकः
स्मृतः॥४०॥ यानिनांपुरतोभुक्त्यैपूजादिकंसमाचरन्॥ सपापात्माशिवद्रो
हीपतत्येवोग्रदुर्गतौ॥४१॥ योष्टधाभक्तिसंयुक्तःपरिचर्याशिवस्तु॥ आ
चारेद्विजनैःसर्वाशिवभक्ताममानिशं॥४२॥ अभ्यर्चनप्रतिज्ञानंचनमूल
मित्याह॥ तात्पर्यसंग्रहे॥ यच्चोपपन्नमनसातदुपासकानांपुंसाममो
घमशनंभगवन्ब्रुवाण॥ मंत्रोयमंतरितिनःप्रतिभातिमूलंप्राङ्गुक्तमर्च
नविधेरनुवासदंते॥४२॥ शिवधर्मशास्त्रे॥ वरंप्राणपरित्यागं छेदनंशिर
सोपिवा॥ नत्वानभ्यर्चभुंजीतभगवंतंत्रिलोचनं॥४३॥ एवंनिर्वहतेयस्तु

शै०र०
२३

यावज्जीवंमतिज्ञया ॥ मनुष्यचर्मणाबद्धः सरुद्रोनात्रसंशयः ॥ ५४ ॥ अपहा
स्यंतियेमूढानिंदंतिचशिवार्चनं ॥ शतजन्मार्जितंपुण्यंभस्मीभवतितत्क्षणा
त् ॥ ५५ ॥ तेनथासप्तजन्मानि दासीगर्भेषुजायते ॥ कुष्टीत्सप्तजन्मानिस
प्तजन्माक्षयीभवेत् ॥ ५६ ॥ आजन्मसंचितंधर्ममिष्टापूर्तंसदक्षिणं ॥ शिव
स्यनिंदामात्रेणसर्वंभवतिनिष्फलं ॥ ५७ ॥ अपहास्यनदारिद्र्यंजायते
नात्रसंशयः ॥ शिवस्यपुरतोनृत्यंगीतवाद्यंकरोतियः ॥ ५८ ॥ तंनिंदंतिच
येमूढास्तथानरकगामिनः ॥ संपर्कात्कौतुकाल्लोभाद्भयाद्द्वापिचयंस्मरेत् ॥
श्री कीर्तयेद्दर्शयेद्रुद्रंसाध्यवशंगणोभवेत् ॥ ५९ ॥ ॥ इतिशैवरत्नाकरेशि श्री
वपूजात्मकमंनामत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ लिंगधारण ॥ व्यासउवाच ॥

मि निसंवादे ॥ जैमिनिरुवाच ॥ व्यास सर्वागमावासं मुनिं मुनिग ॥ ॥
णावृतं ॥ नीलोत्पलदलाभासं नीलकंठमिवापरं ॥ ३ ॥ कृतपूर्वाण्हिकाचारं
कृतासनपरिग्रहं प्रसन्नं प्रांजलिः प्राह प्रणम्या किल जैमिनिः ॥ ३ ॥ धन्यस्त्व
नन्यभावेन वक्तुमर्हसि मे गुरो ॥ को देवः पुरः पूज्यः पूजा तस्य च किंवद ॥ ३ ॥
ध्यानं च कीदृशं तस्य किं रूपं जपनं मुने ॥ व्यास उवाच ॥ सुरासुरेंद्रसन्मौ
लि निर्माल्यचरणांबुजं ॥ गंगाधरं प्रणम्याहं कलानिधिकलाधरं ॥ ४ ॥ इ
तिहासेषु देवेषु पुराणेषु पुरातनैः ॥ महर्षिभिर्महादेवो महनीयः प्रतिष्ठितः ॥ ५ ॥
पूजा तस्य च देवस्य मया संकथ्यतेधुना ॥ रत्नासौवर्णरजतापीठे वाचंद्रकांत
के स्फाटिके दारवे वापि स्थापयल्लिंगरूपिणं ॥ उपचारपरस्ताच्च शिवस्यैतान्

शै.र.
९४

मकल्पयेत्॥ उपचारान्समभ्यर्थ्यास्तु लानलाच धारयेत्॥ ७॥ तथागस्त्या दिमु
नयो दूर्वासानंदिकेश्वरः॥ महाकालो दधीचिश्च पाणिनिश्च कणादकः॥ स्कंदो
भृंगिरिटी वीरभद्रस्तु प्रमथादयः॥ अजोहरिः सहस्राक्षो बाणासुर दशाननौ॥ ८॥
वशिष्टरुरुवाल्मीकि भरद्वाजो त्रिगौतमाः॥ एते परमशैवाश्च भजंतिपरया
मुदा॥ प्रसादसेवनात्ध्यानादर्चनाद्धारणाद पि॥ जातादर्शनकर्त्तारः श्रावय
तिजगत्रयं॥ ९॥ धारयेद्यस्तु हस्तेन लिंगाकारं शिवं सदा॥ तस्य हस्त स्थितं वि
द्धिमत्सदं संपदांपदं॥ १०॥ अपवर्गे मुरीशानं गले भक्तिपरायणः॥ ईश्वरे
णाविनाभावसंबंधं कर्त्तुमात्मनः॥ ११॥ मूर्ध्निवा धारये ल्लिंगंन कदाचिद्वियो
जयेत्॥ ईशाननित्यसंयोग परया निजनिष्टया॥ १२॥ व क्षेव धारये ल्लिंगं मत्समा

वं विभावयेत् ॥ तस्मिन् सन्निहिते किंचिन्नोच्छिष्टमिति निश्चितं ॥ १३ ॥ ब्रह्मवि
ष्णुसुरेशादिदेवताः परया मुदा ॥ शिरोभिर्धारयंत्येते शिवलिंगमहर्निशं ॥ १४ ॥
अक्षपादादयः सर्वाः शाक्तयः परया मुदा ॥ धारयंत्यलिकाग्रेषु शिवलिंगंच
सादरं ॥ १५ ॥ विनिर्भिद्य तथा गात्रं विवरे लोहपात्रके ॥ शिवलिंगं विनिक्षि
प्य पूजयंति च राक्षसाः ॥ १६ ॥ कंठेषु हरकंटादि मुनयो मनवस्तथा ॥ सर्वदा
शिवलिंगं तु धारयेतियजंति च ॥ शिवरहस्ये ॥ गच्छन्तिष्ठन्स्वपन्जाग्रन्
दुन्मिषन्निमिषन्नपि ॥ शुचिर्वाप्यशुचिर्वापि लिंगं सर्वत्र धारयेत् ॥ १७ ॥
संध्या दानं तपो होमः स्वाध्यायः पितृतर्पणं वृथा भवेति तत्सर्वं तल्लिंगं न तु
धारयेत् ॥ १८ ॥ अधमाधमयुक्तानां पापिनां चाभिचारिणां ॥ यमलोको न

शै.र.
८५

वि द्येतसदावै लिंगधारिणां॥१९॥यथाप्यग्निसमावेशान्नयो भवति केवलं॥त
थैवममसान्निध्यान्नते प्रकृतिमानुषाः॥२०॥उत्तमांगेगलेकक्षेतथा वक्षस्थ
लेपिवा॥तथाहस्तस्थलेवापि प्राणलिंगंधरेत्सुधीः॥२१॥ग्रंथांतरे॥उत्तमांगेग
लेकक्षेसर्वदाधारयेच्छिवं॥मूत्राद्युत्सर्जनेयानेभोजनेपिसदाशुचिः॥२२॥
नाभौचहृदयेवापि सर्वावस्थातुसर्वदा॥श्रीलिंगंधारणंकुर्याद्देवीनित्यंमम
प्रियं॥२३॥नाभेरधो लिंगधारी पापनाम्नासयुज्यते॥नाभ्यूर्ध्वेलिंगधारी
चसौभाग्यज्ञानवर्धनः॥२४॥कायसंबंधो लिंगनरहितस्यात्पिशाचवत्॥नि
मिषार्धवियोगेन विशेषात्पातकी भवेत्॥२५॥सत्यहीनानिलोकानांसान्नि
ध्यंनचकारयेत्॥यः कुर्यात्सशिवद्रोही गुरुद्रोहीबहिष्कृतः॥२६॥अवेदि

कायाशैवायरहस्यंतदिदंमुने॥नवक्तव्यंनवक्तव्यमितिशांकरभाषितं
॥२७॥तस्मात्सर्वप्रयत्नेनगोपनीयमिदंत्वया॥वैदिकायचशैवायवक्तव्यं
भक्तिशालिने॥२८॥शिवरहस्ये॥अंगंप्रतिष्ठितंलिंगमंगलिंगसमुद्भवं॥
तत्सुखंत्वनुभोक्तव्यंकदापिसुखमर्चनं॥२९॥स्वयंचमज्जनंकृत्वास्वयमे
वार्चनंसदा॥स्वयमेवार्पयेद्द्रव्यंस्वयमेवजपेत्सदा॥३०॥अतःपरंगुरोर्लिंगा
दन्यलिंगंनपूजयेत्॥अन्यलिंगप्रसादेनगणत्वंनप्रयुज्यते॥३१॥बहुलिंगा
र्चनंचैवबहुभावंगुरोस्तथा॥बहुप्रसादंकुर्वंतिवेश्यापुत्रायथैवते॥३२॥
शिवपूजापरोभूत्वायोन्यदेवंस्मरेत्सकृत्॥अष्टाविंशतिकोटिष्वनरका
न्यासंसौध्रुवं॥३४॥+शिवपूजापरोभूत्वापूर्वकर्माणिवर्जयेत्॥अथवा

शै०र०
९६

पूर्वकर्मस्या त्सापूजा निष्फला भवेत् ॥ ३३ ॥ लिंगार्चनैकशरणो यो न्यदेवं तु पश्य
ति ॥ नरकं नायकं गत्वा शुनि गर्भे षु जायते ॥ ३५ ॥ लिंगार्चनरता नारी सूतिका त्र
जस्वला ॥ रविरश्मिर्यथा वायुरत्त हृत्को टिगुणं शुचिः ॥ ३६ ॥ स्त्री वाथ पुरुषः षंडश्चं
डालो द्विजवंशजः ॥ न जातिभेदो लिंगार्चे सर्वे रुद्र समाः स्मृताः ३७ ॥ पूजालोपो न
कर्त्तव्यः सूतके मृतके पि वा ॥ जलबुद्बुदवद्देहं तस्मान्नित्यं शिवं यजेत् ॥ ३८ ॥ सांगै
र्द्रव्यैश्च किं कार्यं गंधपुष्पाक्षतादिभिः ॥ अस्थोदकमात्रेण पूजा संपूर्णता मिया
त् ॥ ३९ ॥ अंगलेपकृतो लोपस्तस्मादिह न विद्यते ॥ तस्मादेकमनो भूत्वा यावज्जीवि
प्रतिज्ञया ॥ ४० ॥ अर्चयित्वा महादेवमापन्नो पि सदा बुधः ॥ लिंगार्चनस्य काले तु
प्रच्छन्नं पदमुत्तमं ॥ ४१ ॥ पापी कोपी परिभ्रष्टो नास्तिको वेददूषकः ॥ दुर्जनश्च दुरा

चोरो दुःशीलश्चाप्यदीक्षितः॥ ४७॥ प्रमादाद्दर्शनं कुर्यात्सा पूजा निष्फला भवेत्॥
श्री ॥ ॥ इति शिवरत्नाकरे लिंगधारणं नाम चतुर्दशोध्यायः॥ १४॥ ॥ ॥ ॥ श्री
पादोदकमाहात्म्यं॥ बोधायनशाखायां॥ अथातो महादेवस्य पादोदकविधिं
व्याख्यास्यामः॥ श्रीरुद्रेण पवित्रेण शतधारेण सहस्रधारेण छिद्रशमनं तम
परितमविघ्नदमक्षरमच्युतं परं पवित्रं भगवंतमेव स्नापयित्वा सर्वो वै रुद्र इति
द्वाभ्यां ऋतं सत्यं परं ब्रह्म वा प्राशयेत्॥ १॥ जाबालशाखायां॥ भगवतः पादौ प्रक्षा
ल्य शंखं प्रपूर्य गंधपुष्पाक्षतादिभिरभ्यर्च्य चरुं निवेद्य इमं मे गंगे इत्यभिमं
त्र्य कद्रुद्रायेति मा त्वा रुद्रायेति संमार्जनं कृत्वा॥ ऋतं सत्यं परं ब्रह्मेति प्राश
येत्॥ य एवं कुर्यात्स कुलजान् दशपूर्वान् दशापरान् आत्मानं च तारयेत्॥ २॥

शै०र०
९

कुरुक्षेत्रे नैमिशे च भूमिभागश्च ये शुभाः॥ सर्वतीर्थोदस्यैते कलां नार्हंति षोड
शीं॥३॥ अकालमृत्युमथनं सर्वव्याधिविनाशनं॥ सर्वदुरितोपशमनं शंभोः
पादोदकं शुभं॥४॥ सर्वमंगलमांगल्यं सर्वपावनपावनं॥ सर्वतीर्थफलं स
द्यः प्राप्यते मूर्ध्नि धारणात्॥५॥ सर्वोत्पातप्रशमनं सर्वरोगप्रभेदनं॥ दुष्ट
ग्रहोपशमनमिष्टसिद्धिप्रदायकं॥६॥ अगम्यगमनं चैव पापाचाराश्च
ये शुभाः॥ तेपि पूता भवंत्याशु सद्यः पादांबुधारणात्॥७॥ अशौचं नैव वि
द्येत सूतके मृतके तथा॥ गृहे यस्मिन् प्रसुतास्त्री संभोगास्पृश्यमेव च॥ दूषित
श्चापि पादांबु बिभ्रच्छुद्धिमवाप्नुयात्॥८॥ पादोदकं पुरभिदः पाशजालह
रं परं पापिशुक्तिभिरादाय पपुः कामं गणेश्वराः॥९॥ शंभोः पादोदकं पीत्वा

त्

पश्चादशुचिशंकया॥ यआचमतिमोहेनतंविंद्याद्ब्रह्मघातकं॥१०॥आदित्य
पुराणे॥पादौप्रक्षाल्य देवस्यकराभ्यांकमलेक्षण॥अभ्युक्ष्यचात्मनोमूर्ध्निअति
श्रेष्ठगुरोस्तथा॥११॥रामायणे॥प्रमथैः प्रवरैः पीतं सुरमुख्यैः शिरो धृतं॥शुद्धं
तत्त्वतया दिष्टं वल्मीकप्रभवेनच॥१२॥तत्रदेवर्षिगंधर्वावसुधातलवासिनः॥
भवांगपतितंतोयंपवित्रमितिपस्पृशेत्॥१३॥तथाचवेद्यशास्त्रे॥निर्माल्यस
लिलंप्राश्यदेवदेवस्यशूलिनः॥क्षयकुष्ठज्वरश्वासैर्मुच्यतेकिल्बिषैरपि॥१४॥
अभिषिक्तजलंप्रातःपिबन्नित्यंदिनेदिने॥शूलकुष्ठाद्यपस्मारज्वराणांभेष
जंप्रिये॥१५॥दासमार्गप्रपन्नायश्रौतेपाशुपतेस्थिताः॥तैरेवपेयंध्यायंच
घ्रातव्यंचमुमुक्षुभिः॥१६॥लिंगाभिषेकंकुर्वीततल्लिंगोदकमुच्यते॥तत्रला

शै॰र॰
९९

लाचपीत्वाचनाशयेसरिवलामयं ॥३७॥ आरोग्यमस्तुबलमस्तुयशोस्तुनित्यं
सौभाग्यमस्तुशिवमस्तुशशांकमौले ॥ त्वत्पादपंकेरुहमज्जनपुण्यतोयमास्वा
दयामिपरतोनपुनर्भवाय ॥३८॥ शिवरहस्ये ॥ मत्प्रसादोदकंपुण्यंसदाधा
श्री यैमदाश्रितैः ॥ त्र्यक्षादशभुजाः सर्वेममसाम्यपराक्रमाः ॥३९॥ ॥इतिशैवर श्री
त्नाकरेपादोदकमहात्म्यंनामपंचदशोध्यायः ॥१५॥ ॥प्रसादस्थलं ॥
प्रसादपूर्वकार्येयंभक्तिमुक्तिविदायिनी ॥ नैवासाशक्यतेप्राप्तुंनरैनैकेन
जन्मना ॥१॥ अनेकजन्मसिद्धानांप्रसीदतिमहेश्वरः ॥ प्रसन्नेसतिदेवे
शेपशुत्वात्सविमुच्यते ॥२॥ भक्तियोगेसदाभ्यासस्ततोभक्तिपराभवेत् ॥
परस्याचततोभक्त्याप्रसादोलभ्यतेनरैः ॥३॥ प्रसादः सर्वपापेभ्योमुक्ति

मुक्तिं प्रयच्छति ॥ महापापो पियो मर्त्यो सो पि जन्मत्रयात्परं ॥ ध्यानयोनियंत्र
पीडानां भवेदिति न संशयः ॥ ब्राह्मणाः क्षत्रिया वैश्यास्तथा शूद्राश्च येन
रा ॥ ५ ॥ न लंघयेत्तु निर्माल्यं धारणे सुमहत्फलं ॥ स्थिरपर्युषितं माल्यं लिं
गस्थाने वसंत्रिधा ॥ ६ ॥ तेषां चंडेश्वरप्रीतिकरं निर्माल्यसंज्ञकं ॥ दग्धं देहमि
दं ज्ञान क्षणात् ज्ञानाग्निना व्यये ॥ ७ ॥ प्रसादादमलं स्नानं कर्मबंधं प्रहास्यति ॥
निर्मलस्य तु निर्माल्यं निर्मलत्वादनिंदितं ॥ ८ ॥ तस्माद्भोज्यं निर्माल्यं प्राकृतै
रशिवात्मभिः ॥ ९ ॥ रुद्रेणात्तमनश्नाति रुद्रेण पीतं पिबंति रुद्रेणाघ्रातं जिघ्रंति ॥
तस्माद्ब्राह्मणाः प्रशांतमनसो विद्वांसो भूत्वा निर्माल्यमेव चसेवंत इत्युपनिष
त् ॥ १० ॥ वाजपेयसहस्रेण अश्वमेधशतेन च ॥ नास्ति हबहु यज्ञैश्च रुद्रोच्छिष्टस

शै०र०
९९

मेफलं ॥ १० ॥ तिलानां षोडशांशं तु तणाग्रे बिंदुसंमितं ॥ गंधमाल्यसमायुक्तं ब्रह्मा

दमितिशस्यते ॥ ११ ॥ ब्रह्महत्या विष्णु ध्यर्थं निर्माल्यस्य च भक्षणं ॥ तस्य पाप

महं शीघ्रं नाशया मि वरानने ॥ १२ ॥ यस्य प्रसादा देवस्य ब्रह्मा ब्रह्मत्वमाप्नुया

त ॥ विष्णुत्वमपि विष्णुश्च स शिवः कैर्न सेव्यते ॥ १३ ॥ लिंगे र्पिते त्रिदले विश्वे

श्वर्पितं स्यान्न संशयः ॥ साक्षाल्लिंगार्चनोच्छिष्टं स्वदेहे धारयेन्नरः ॥ १४ ॥ व

ज्रकायस्तु भवति शिवसायुज्यमाप्नुयात ॥ एकपादपुराणे ॥ अन्नपानादि

भिः सर्वैर्यस्तु संतर्पयेच्छिवं ॥ न तत्फलेनाप्नुते मोक्षं शिवं परमकारणं ॥ १५ ॥

निर्माल्यं धारयेद्भक्त्या शिरसा पार्वतीपते ॥ १६ ॥ राजसूयस्य यज्ञस्य फल

माप्नोति नारद ॥ १६ ॥ शिरसा शिवनिर्माल्यं भक्त्या ये धारयंति हि ॥ अशुचि

वे तमर्या दः सर्वावस्थागतोपिवा ॥१७॥ तस्य पापानि घोराणि नाशयस्येव शंक
रः ॥ लोभान्न धारयेच्छंभो र्निर्माल्यं च न भक्षयेत् ॥१८॥ न स्पृशेदपि वा चैत
ल्लंघयन्नापि नारद ॥१९॥ निर्माल्यलंघनात्सुंसः सिद्धिभ्रंशो पि जायते ॥ नि
र्माल्यदानात्नरके पच्यते कालमक्षयं ॥२०॥ लिंगे स्वयं भुवि बाणे वा रत्ने र
संस्थिते ॥ सिद्धैः प्रतिष्ठिते चैव न चंडो धिकृतो भवेत् ॥२१॥ शिवरहस्ये ॥ प्रसा
दः प्रथमो ग्राह्यः प्रसादाद्गुरुसंभवः ॥ प्रसादान्निर्मलं नित्यं प्रसादात्सत्यसं
ग्रहः ॥२२॥ प्रसादात्करुणाभावः प्रसादात्सर्वकारणं ॥ प्रसादो गुरुवाक्यं च प्र
सादश्च सुभोगदः ॥ परंज्योतिपरं तत्वं परात्परतरं महत् ॥ परवस्तु समावाप्तिः
परमाणुप्रसादतः ॥२३॥ प्रसादं गिरिजादेवि सिद्ध किन्नरगुह्यकैः ॥ विष्णुप्र

मुखदे वैश्वसुदु र्लभमगोचरं ॥२४॥ एकत्वे तियोरुद्रः सर्वं वेदेषु गीयते तस्य
प्रसादलेशेन भुक्तिर्मुक्तिश्च शांकरि ॥२५॥ वसुरुद्रार्करूपेभ्यो मध्ये पिंडस्तु
पुत्रदः॥ वेदोक्तं रुद्रनिर्माल्यं किं पुनर्बहुभाषणे ॥२६॥ निर्माल्यं परमानं
दं निर्माल्यं शुद्धसज्जनं ॥ निर्माल्यं परमं ज्ञानं निर्माल्यं परमामृतं ॥२७॥
कालिकाखंडे ॥ प्रसादं त्रिविधं प्रोक्तं शुद्धं सिद्धं प्रसिद्धकं ॥ शुद्धं लिंगमुखा
त्यक्तं सिद्धं चरविसर्जितं ॥ प्रसिद्धं गुरुणात्यक्तं प्रसादं त्रिविधं यतः ॥२८॥
गुरुप्रसादो मुक्त्यर्थं भुक्तिर्लिंगप्रसादतः ॥ गुरुकारुण्यतो लभ्यमखंडि
तमिदं द्वयं ॥२९॥ वातुलतंत्रे ॥ असमर्प्य यदीशाय वस्तु किंचित्कदाच
न ॥ कथंचिन्नोपभुंजीत शिवभक्तिपरो नरः ॥३०॥ स्वच्छंदतो यदा बुद्धिः प्र

सादः परिकीर्तितः॥ करणानि च सर्वाणि बाह्याण्यभ्यंतराणि च। ३१॥ बुद्धि
प्रसादतस्तत्र प्रसन्नानि भवंति हि॥ संतोषैश्वर्ययुक्तानां यत्सुखं शांततेज
सां॥ ३२॥ देवासुरमनुष्याणां कुतः स्वप्नेपि तत्सुखं॥ यः प्रसन्नेंद्रियग्रामः स
दा चंद्रांशुनिर्मलः॥ ३३॥ प्राप्नोति परमं स्थानं शांतः शांतेन चेतसा॥ यथाका
मप्रदानेन प्रतिष्ठायगतिर्न च॥ ३४॥ प्रसन्नार्थेषु यस्तोषः संतोषः स प्रकी
र्तितः॥ अतीतानागतार्थेषु वर्त्तमानेषु सर्वदा॥ अननुस्मृतिरर्थेषु संतो
षः सर्वदाहृतः॥ तेन सर्वफलप्राप्तियोगप्राप्तिश्च तत्फलं॥ ३५॥ एतत्त्रयवरं
दं तत्त्वासंतोषः सम्यगाश्रितः॥ अश्वमेधशताच्छ्रेष्ठं देवि चित्तप्रसाद
नं॥ ३६॥ मुक्तिसाधनमित्युक्तं कर्म भुक्तिप्रदायकं॥ प्रसादाद्देवसाभक्तिः

शै-र-
१०१

प्रसादान्मुक्तिसंभवः॥यथैवांकुरुते बीजं बीजतो वा यथांकुरं॥३७॥ब्रह्म
गीतायां॥शिवादिनामहीनस्यध्यानहीनस्यशूलिनः॥शिवभक्तिविहीनस्य त्रि
पुंड्रोद्धूलनादिषु॥३८॥श्रद्धाहीनस्यरुद्रस्य प्रसादेबुद्धिवर्जनं॥साक्षान्मुक्तिश्च
हे देवा नैव सिध्यति देहिनः॥३९॥प्रसादेन विना देवयेजानंतिसुरप्रभो॥तेजा
नंति विनाज्ञानं ग्रंथैनैकेनकेवलं॥४०॥स्नानोदकाच्छु चिस्नायाद्दुषंचपि
वेत्सदा॥ लिंगग्राह्यमथग्राह्यमन्यन्नाग्राह्यमेवयत्॥४१॥लिंगसारे॥लिंगा
भिषेकयत्तोयंयद्यलिंगोदकंभवेत्॥तत्पिबेल्लिंगशरणाअन्यतन्मध्यमांस
वत्॥४२॥लिंगावगाहनं चांबु लिंगांबुरुचितर्पणं॥तेनस्नानंचपानंचअन्य
द्वि— चेरेतसि॥४३॥लिंगप्रक्षालनंतोयं लिंगतोयंतथैवच।तत्तोयंसर्वदा

ग्राह्यमन्यचंडालतोयवत्॥४७॥शंभोस्नानोदकंसद्यःसर्वतीर्थसमंमह
त्॥धारणात्पापसंघातैस्तत्क्षणादेवमुच्यते॥४८॥पादोदकंचनिर्माल्यं
भक्त्याधार्यंप्रयत्नतः॥नतंस्पृशंतिपापानिमनोवाक्कायजानिच॥४९॥
शूद्रान्नंयाचकान्नंचनैवेद्यंचश्राद्धवर्जितं॥शालान्नंसमुदायान्नंराजान्नंचै
विवर्जयेत्॥५०॥अन्नशुद्धौसत्वशुद्धिर्नमृदानजलेनवै॥सत्वशुद्धौभवेच्छु
द्धिस्ततोन्नंपरिशोधयेत्॥५१॥अस्नात्वानैवभुंजीतजप्त्वालिंगंनपूजयेत्॥
अन्यान्वाभ्यागतान्गेहेअतिथिर्नाभिपूज्यते॥५२॥पत्रंपुष्पंफलंतोयंमन्त्रया
नाद्यमौषधं॥अनिवेद्यनभुंजीतयदाहारायकल्पते॥५३॥शिवमंत्रेणशुद्धा
त्मासंस्कृतःशिवभाषितः॥पात्रेरपिनभुंजीतसार्धंक्रूरैरधार्मिकैः॥५४॥ ॥

नि

श्रीशि

शै०र.
१०२

पर्णपृष्टे न भुंजीत रात्रौ दीपं विना तथा भिन्नपात्रेषु पृथिव्यां वा शिलायां दारवे तथा
शूद्रशेषं न भुंजीत तद्दत्तान्नं च विसर्जयेत्॥ ५२॥ शुद्धान्ने स्निग्धमश्नीयाच्छिव
मंत्रेण मंत्रितं॥ ओंकारं शिव इति स्मृत्वा मौनी चैकाग्रमानसः॥ ५३॥ आसनस्थः
पिबेदंभ तिष्ठन्वांजलिना पिच॥ वामहस्तेन शय्यायां तथैवान्यकरेण वा॥
५४॥ अनिवेद्य तु भुंजानः प्रायश्चित्तिर्भवेन्नरः॥ शिवाष्टशतजाप्येन पूजया च
विशुध्यति॥ ५५॥ संस्कृते शिवभक्तस्य नायान्मृतकसूतके॥ संस्कारेषु च स
र्वेषु गृहे वापि कुलान्यतः॥ ५६॥ सूतके न च भोक्तव्यं मृतके च विवर्जयेत्॥ भु
क्त्वा प्रमादतः स्नेहात् छिवस्याष्टशतं जपेत्॥ ५७॥ शुनिसूकरचंडालैर्मार्जा
लकपिकुक्कुटैः॥ उदक्यागर्दभकाकाद्यैः स्पृष्टमन्नं न भक्षयेत्॥ सौरेशरीरस

र्वतो रक्षेच्छरीरं धर्मसाधनं॥ नशरीरं विना शुद्धिः पूज्यते गिरिजापतिः॥ ५९॥ शि
वज्ञानविद्यायां॥ विनियोगं प्रवक्ष्यामि सिद्धमंत्रप्रयोजनं॥ दौर्बल्यं यातितन्मं
त्रं विनियोगविवर्जितः॥ यस्यैवैव विधानेन नैकार्याणि च विशेषतः॥ ६०॥
विनियोगस विज्ञेपस्तरे वामुष्मिकं फलं॥ कालिकारवंडे॥ गणत्वेचश्वरण्य
त्वे प्रसादं चैवमाहरेत॥ ६१॥ मिश्रितं तु न भुंजीयात्तदेवास्पृश्य किल्बिषं॥ प्र
सादं मिश्रितं भोक्तुं गणत्वे नैव युज्यते॥ यावज्जीवं न भुंजीयान्मिश्रितं नि
ष्फलं भवेत॥ ६२॥ सद्योजाततु चोष्यं च पानीयं वामदेवके॥ अघोरवक्त्रे भ
क्ष्यं तु तत्पुरुषे भोज्यमेव च॥ ६३॥ ईशाने लेह्यकं चैव पंचवक्त्रे समर्पयेत्॥ पं
चप्रकारसंयुक्तं षड्रसं जीवसंयुतं॥ ६४॥ पृथिव्यादि भूमिसंतुष्टं दशवायु

शै॰र॰ दशेंद्रिय॥ मनोबुद्धिरहंकारश्चित्तं जीवाश्च पंचकं॥ पंचविंशातितत्वंच पंचरुद्रा
१०२ त्मकप्रिये॥ ६६॥ लिंगसारे॥ लिंगार्पित तनुप्राणमर्पितंच पृथक् पृथक्॥ अ
र्पितस्यमुखज्ञात्वामुख्यमर्पणमर्पितं॥ ६७॥ आत्मानं कारये छुद्ध मना
दिमलकुंठितं॥ अनेनैवाजितंकर्म दग्धबीजमिवाग्निभिः॥ ६८॥ अनर्पि
तादिकंलिंगयो भुंक्तेधर्मवर्जितं॥ सविष्टासदृशंचान्नं नीरंचसुरयासमं
॥ ६९॥ सर्वंचतृणकाष्टंच भक्ष्यंचैव सुलेपनं॥ लिंगार्पितप्रसादंचनान्य
दुर्नीतबुद्धिमान्॥ ७०॥ गंधंमृगमदंचैव कर्पूरंतैलमज्जनं॥ लिंगार्पितप्र
सादंचमन्यतज्ञेयंचमुत्रवत्॥ ७१॥ लिंगसारे॥ रत्नाभरणजातंच वस्त्रंसक
लवाहनं॥ प्रसादमेवभोक्तव्यं नचेच्चंडालवद्भवेत्॥ ७२॥ भोज्यंलेह्यंचचो

ष्यंचयेच लिंगार्पितपरे ॥ लिंगोच्छिष्टं तु भुंजीरन् धन्यास्ते समुदाहृताः ॥ महा
देवस्य निर्माल्यं स्वीकार्यमधिकारिभिः ॥ तद्बोधकानि वाक्यानि दर्शयामि
समासतः ॥ ७४ ॥ तदुक्तं स्कांदे व्यासजैमिनिसंवादे ॥ प्रसादाद्धि लिंगं
च प्रसादाद्गुरुसंचयः ॥ ७५ ॥ प्रसादान्निर्मलो नित्यं प्रसादात्सत्यसंग्रहः ॥
तत्प्रसादं पवित्रं च प्रसादं मंगलं शुभं ॥ पादोदकं प्रसादं च शुद्धिः सिद्धिर्न
संशयः ॥ ७६ ॥ अनन्यदेवतोपास्तिरनर्पितपराङ्मुखः ॥ अनन्यकं
कर्मनिर्माणैः प्रसादी भक्तिमान् भवेत् ॥ ७७ ॥ शिवरहस्ये ईश्वरः ॥ मद्भ
क्तजनवात्सल्यं मत्प्रसादेन जीवनं ॥ ममतत्त्वपरिज्ञानं भवेद्देवि मत्प्रसादतः ॥
॥ ७८ ॥ मदीयं भुक्तनैवेद्यं पादांबु कुसुमं दलं ॥ धर्ममर्थं च कामं च मोक्षं च दधते

शै०र० ९.४

क्रमात्॥ नित्यं परमशैवेन सेव्यते देवसेवितं॥ व्यास जैमिनिसंवादे। जैमिनिरुवा
च॥ शैवसेहितायां॥ अन्नाहं मम मनै वे द्यं पादांबु कुसुमं दलं॥ एकेश्वरेण कथित
मितिके चिन्महर्षयः॥ ८०॥ वंदितत्कथं स्वामिन्यथार्थं कथय स्वमे॥ व्यास उवा
च॥ देवदेवस्य वचसा विषयाय हि जैमिने॥ ८१॥ ये वीरभद्र शापिताः शिवभ
क्तिपराङ्मुखाः शंभोरन्यत्र देवेषु ये भक्ता येन दीक्षिताः॥ ८२॥ ये शुद्धकर्म
णः शंभोरन्यत्र समबुद्धयः॥ तेषामनर्हमीशस्य तत्प्रसाद चतुष्टयं॥ ८३॥ नै
वेद्यं विष्णुनामुक्तममृतं चान्यदेवतेः॥ निर्माल्यं च निवेद्यं च भुक्त्वा चांद्राय
णं चरेत्॥ ८४॥ परस्पर विरोधिलात्प्रसादस्य च कर्मणः॥ एकत्र न निवास
स्यात्तेज स्तिमिरयोरिव॥ ८५॥ निर्माल्यं निर्मलं शुद्धं निर्मलत्वादनिं दि

तं॥तस्मादभोज्यं निर्माल्यं माकृतैरशिवात्मभिः॥८६॥ईश्वरः॥मल्लिंगधारि
णो लोके देशिकामत्परायणाः॥मदेक शरणास्तेषु योग्यं नैवान्य जंतुषु॥८७॥
अज्ञानलोभभयुक्तोवा जिह्वाचापल्य मानसः॥शिवनिर्माल्यभोजी तु
रौरवं नरकं व्रजेत्॥८८॥शिवधर्मे॥निर्मलहाच निर्माल्यं मलदेही
न धारयेत्॥धारयेच्छिवनिर्माल्यं भक्त्या लोभान्न धारयेत्॥८९॥लोभान्नधार
येल्लोभी निर्माल्यं च न भक्षयेत्॥निर्माल्य लंघनाल्लोभाद्बुद्धि भ्रंशो भिजाय
येत जिह्वाचापल्यसंयुक्तः शिवसंस्कारवर्जितः शिव निर्माल्यभोगी चरौ
रवं नरकं व्रजेत्॥९१॥सर्व दोषशुद्धिरहितानां शुद्धवस्तु पयोगादोषाक्षय भव
तीत्ययमेवार्थः॥श्रुतिस्मृतीतिहास पुराणेषु सर्वतंत्रेषुच्यते॥यथाहापस्त

नि

वः॥ अग्निर्वै दीक्षितस्तस्मादेनं नोपस्पृशेत्॥ इति दीक्षितादिस्पृष्टिवत्॥ कामि
के॥ अशुद्धात्माशु विलोभान्मद्भुक्तं पावनं परं॥ भक्षयेन्नाशमायाति शूद्रोह्य
ध्ययनादिव॥ १२॥ मानवपुराणे॥ नस्पृशेत्सा णिनो॥ छिष्टो विप्रगोब्रह्मणान
लात्॥ नचापिपश्येदशुचिः स्वस्थो ज्योतिर्गणान् दिवि॥ १३॥ वटु अश्वत्थार्क
पर्णेषु कुंभि तिंदुक पर्णयोः॥ पलाश पद्मपत्रेषु भुक्त्वा चांद्रायणं चरेत्॥
इत्यादिवचनैः सर्वमुदाहृतमेतदुक्तं भवति॥ अपीच॥ परमेश्वरशिरोनि
र्माल्यभूतकलानिधिकलाः सकलसुराः पुरंदरादयो भुंजते॥ नैवामरलो
कपूज्याश्चजाताः॥ अपिचशिवनिर्माल्यभूतसुधाकरकलासारभसा
दितसुधारसाभिषिक्तव्रीहिजातानिकथं देवतायोग्यानि भवंति॥ अं

पित्रभास्करस्येश्वरोदेवइतियोमंडलंतपतीतियश्चांतरादित्येहिरण्म
यःपुरुषइतिसूर्यस्यांतर्भावस्थितिः॥परमेश्वरस्यवसोपिपरमार्थज्ञात्ता
द्वसमादत्ते॥तत्रापिश्रुतिः॥योसोतपन्नुदेतिससर्वेषांभूतानांप्राणा
नांदायोदेतितस्यभूतानांपदार्थानांसमाकर्षत्तीत्यर्थः॥तस्मात्प्रा
णापायाभावात्॥तस्मात्परमेश्वरभुक्तशिष्टान्येनाहाणिकथंभवेयुः॥
महोपनिषदि॥अपएवससर्जादौतासुवीर्यमुपासृजत्॥इत्यापो
नारायणोरुद्रइति॥जलमपिशिवाज्जातमितिअत्रापिश्रुतिः॥
आपोवाइदंसर्वंविश्वाभूतान्यापःप्राणावाआपःपशवआपो

शै०र०
१०६

न्नमापोमृतमापःसंम्राडापो विराडापः छंदा ८ ष्यापोज्योती ८ ष्यापोय
जूंष्यापःसत्यमापइति।।तस्मात्सकलंजलंपरमेश्वरचरणकमलाभि
षिक्तमसारितप्रवाहरूपमेव।मुखाज्जातोग्निरितिपरमेश्वरजातो
ग्निःततश्चतस्याकपरिनिवृत्तंरुद्रोपभुक्तमेवस्यात्।।अतश्चपक्का
न्नेनदेवतोपहारवैश्वदेवप्राणाग्निहोत्रहोमातिथिसंतर्पणादयोहोधर्म
र्मानसंभवेयुः।।ततःसर्वमन्नंरुद्रोच्छिष्टंतेनदानहोमयोरनर्हत्वान्ना
सिकाभ्यांप्राणाद्वायुरितिधातु।।प्राणेनप्रेरितंचैतन्यस्वरूपेणशंभु
नाग्रहीतपरिमलानिसकलप्रसूनानिपात्राणिचपूजार्थमनर्हाणि

संवंदेरन्प्राणापानव्यानोदानसमानादिनचै तन्यस्वरूपस्यपरमे
श्वरस्यप्राद्दायांप्राणे निष्टामृतंजुहोमि॥ शिवोमाविशाप्रदायायप्रायस्वा
हेतिपंचमंत्रैर्दत्तंहविःपरमेश्वरस्यप्रसादंनभवति॥ किंतत्प्रसादभूतमन्नं
ब्राह्मणैर्नैवोपभुंजते। किं॥ मध्यपिंडपत्निप्राशयेत्॥ अत्ररुद्रोद्देशेनतप
स्यपुत्रार्थस्याप्राशनविधानात् तत्प्राशनेनपुत्रोत्पत्तिरगम्यते॥ अदत्त
पितरोगगर्भेकुमारंपुष्करस्त्रज इतिमंत्रः॥ लिंगबलेनास्यमंत्रस्यायं
मर्थः॥ अस्मिन्नर्थेलिंगे॥ वसुरुद्रार्करूपेणमध्यपिंडस्तुपुत्रदः॥ वे
दोक्तंरुद्रनिर्माल्यं किंपुनर्बहुभाषणैः॥ २५॥ अथवैदिकशैवाः॥ केच
नविनियुक्तविनियोगंनभवतिकिं॥ अपिच॥ श्राद्धकालेविश्वेदेवाभ्यां

पितृपितामहेश्वयजमानेनानुद्दिश्यसमर्पितंचान्नंप्राणाग्निहोत्रस्यार्हं
नभवति।किंतत्रश्राद्धकालेविच्छिन्नाग्निहोतारश्चसंति।तेरग्नौकरणंक
रिष्यतइतिवचनाद्देश्वदेवहविःशिष्टान्नेप्राणकरणंहविःशिष्टान्नेविश्व
देवपितृपितामहप्रपितामहानुद्दिश्यसंमर्पितंचान्नंप्राणाग्निहोत्रस्यं
ब्राह्मणानांप्रथमंदत्तमन्नंतत्किंप्राणाग्निहोत्रस्यार्हंभवतिनवातस्मा
देवपरमेश्वरस्यप्रसादमपिप्राणाग्निहोत्रस्यविशेषेणार्हमेव॥अस्मि
न्नर्थेकूर्मपुराणे॥श्राद्धकालेहरभुक्तंशेषंददातिभक्त्यापितृदेवतानां॥
तैरेवपिंडैश्चतितृप्ति।लवैमिश्रैराकल्पचद्याःपितरःसंतृप्ताः॥९६॥शैवे॥
प्राणाग्निहोत्रंयःकुर्याच्छिवस्यैवस्यैवप्रसादतः॥अश्वमेधायुतंपुण्यं

सिकथे सिकथं लभेन्नरः॥ ९७॥ लिंगे॥ पत्रं पुष्पं फलं तोयं मन्नपानाद्यमौषधं॥ अ
निवेद्यनभुंजीयाद्यदाहारायकल्पितं निवेदितं च देवाय भुंजीयादात्मशुद्धये॥ ९८॥
बोधायनस्मृतौ॥ यदन्नमाहरत्वेन प्रासंतं च्छोमीयाम्यहं॥ ॐ व्यासस्मृतौ॥ यद्य
द्भुक्तं प्रथममागच्छेत्तद्धोमीयामिति॥ ॐ ईश्वरमुखनिःसृतविद्यासिभूतैर्वेदे
ष्वेवदांतेषुशब्दविवर्त्तजगदेतत्प्रपंचरूपमितिप्रतिपादितं॥ ततश्चपरमेश्वरमु
खनिर्गतशब्दरूपस्यशब्दप्रपंचस्यसर्वस्मिन्कर्मण्यर्हतास्यात्॥ सकलस्यश
ब्दविवर्तभूतस्यवस्तुनः शिवोपभुक्तप्रसादत्वयांनार्हत्वात्॥ वातुलतंत्रे॥ अ
कारादिक्षकारांतमातृकारचनाविधेः॥ जगन्निर्माणचातुर्यात्सर्वज्ञइतिकथ्यते॥
इतिपंचाशद्वर्णव्यवहाराणि शिवनिर्माल्यमेव॥ यजुर्वेदे॥ यदेकमव्यक्तम

शै॰र॰ १०८

नंतरूपं विश्वं पुराणं तमसः परस्तात्॥ इति तद्विश्वरूपिणः॥ परमेश्वरादुत्पन्नष

ड्रसोपेतषड्विधाहारजलकुसुमजातानि सर्वाण्यपि देवप्रसादलब्धानि भवेयुः॥

तत्वसारे॥ अस्पृश्यं शिवनिर्माल्यं व्यापकत्वे शिवे कथं सर्वव्यापि शिवश्चेव निर्मा

ल्यं परमार्थतः॥ किं तत्र चंडनिर्दिष्टं निर्माल्यमिति शंकया॥ ९९॥ शिवरहस्ये

यत्र भक्तिविशेषः स्यान्न चंडो नैव दूषणं॥ यत्रैव भक्तिसामान्यं तत्र चंडो भवि

ष्यति॥ १००॥ तस्मादनर्हमीशस्यनैवद्यमित्यादिव्यर्थं समर्थितं तद्दानं भवति

चे॥ ननु भवन्मतेपि तस्यैवान्नं तस्मै किमर्थमर्पणीयमित्याह॥ शैवे॥ शिवस्वा

मिकमेवान्नं शिवायावनियुज्यते॥ विनियोगोपचारेण संतुष्यति सदाशिवः॥

१॥ ब्रह्मांडपुराणे॥ सर्वलोकैकनाथस्य शंभोः कः किं प्रयच्छति॥ उपचारप्रियः

शंभुस्तेनैवायंप्रसीदति॥२॥तथाहीराजकीयपुरुषस्तदीयवस्तुतस्मैसमर्प्य
तुष्टेनपुष्टोभवति।।तद्वतीतिभावः॥शिवरहस्ये॥शिवानुभूतमखिलंनिर्माल्यं
परिभक्ष्यते॥भोज्यंधार्यमितिद्वेधाषड्विधंकेचिदिष्यते॥३॥देवस्वंदेवताद्रव्यं
नैवेद्यंचनिवेदितं॥चंडद्रव्यंबहिःक्षिप्तंनिर्माल्यंषड्विधंतथा॥४॥देवस्वंग्राम
भूम्यादिदासीदासचतुष्टयं॥हेमरौप्यंचरत्नादिदेवद्रव्यमितिस्मृतं॥५॥यत्सं
कल्प्यतुदेवायपत्रंपुष्पंफलंजलं॥अन्नपानादितत्सर्वंनैवेद्यमितिकीर्त्तितं॥
॥६॥एतत्रिविधनिर्माल्यमनार्हमितिकथ्यते॥प्रमाद्भोजनंकुर्याद्धूमेरष्य
कमंगलं॥७॥किंचिद्द्रव्यापहारेणनरकंयात्यसौध्रुवं॥शिवोपभुक्तस्त्रग्गंध
मन्नपानादिकंतथा॥८॥निवेदितमितिप्रोक्तंसर्वपापहरंपरं॥बाणलिंगेच

शै॰र॰ रेलोहेरत्नलिंगेस्वयंभुवि॥प्रतिमासुच सर्वासुनचंडोधिकृतोभवेत्॥९०९॥स्थापि
१०९ तेविधिनालिंगेसर्वदेवासुरैर्नरैः॥एतत्रिविधनिर्माल्यंचंडेशोधिकृतंशिवे॥१०॥
बहिःक्षिप्तमनर्हंहिअन्यद्रव्यत्वकारणात्॥पिशाचानांहिसर्वेषामधिकारोहिस
र्वदा॥११॥इतिषड्विधप्रसादेषुनिवेदितप्रसादमेवप्रसादभोक्तृणांअर्हंभ
वति१२॥प्रसादानुभवस्यैवमहत्वंप्रतिपादितं॥इदंपवित्रंपरममखिलागम
चोदितं॥१३॥वेदवेदांततत्वज्ञैःपवित्रंपरिभाषितं॥इतिहासेशिवाचारसार
भूतमुदाहृतं॥१४॥इदंप्रसादंभुंजानोविरिंचिःकिलजैमिने॥विष्णुःपरशु
रामोपिशिवेनचपरीक्षितो॥पादोदकप्रसादानांनिर्माल्यानांनिषेवको॥व
सिष्टश्चगरिष्टोभूत्प्रसादस्यप्रभावतः॥१५॥प्रसादसेवनाज्जातोविश्वामि

त्रोमहामुनिः॥ पाणिनिश्च कणादश्च कपिलो गोतमादयः॥१६॥ प्रसादसेवना
ध्यानादर्चनाद्धारणादपि॥ जातादर्शनकर्त्तारः श्रावयंति जगत्रयं॥१७॥ हरि
वंशे पुरहूतनारदसंवादे॥ कदाचिदीशपादांबु निर्माल्यपरिमेलितः॥
पवनः पन्नगेशेन निपीतः पुण्यकारणात्॥ तेन विश्वंभराभारधुरीणत्वमवा
प्यते॥१९॥ भोगीश्वरत्वमचलमीशभूषणतापि च॥ सर्वज्ञातां च संप्राप्ता देवेंद्रे
ण हि संशयः॥२०॥ साक्षात्प्रसादभोगेन भक्तोयं लभते फलं॥ तदुक्तं नहिमशक्ति
नंगुसेन गिरापतेः॥२१॥ शिवधर्मे॥ निर्माल्यं धारयेन्मूर्ध्नि नैवेद्यं चापि भक्षयेत्॥
तत्प्रसादोदकं पीत्वा गणापत्यमवाप्नुयात्॥१२२॥ स्वच्छंदललितभैरवे ईश्वरकु
मारसंवादे॥ निर्माल्यधारणात्पुत्र सालोक्यं लभते नरः॥ पादोदकस्य पानेन सामी

र्घ्यंभजतेसदा ॥२३॥मत्प्रसादोपभोगेनसारूप्यंप्रतिपद्यते।नान्यस्यतपसःशक्ति
स्तववालस्यविद्यते ॥२४॥रहस्यंतदिदंपुत्रसुलभंकुरुवत्सक॥कामिकेनि
र्माल्यंदेवदेवस्यचांद्रायणशतात्परं ॥भक्षयेद्योनरोभक्त्यापवित्रमितिशुद्धि
दं॥१२५॥शुद्धात्माब्राह्मणस्तस्यपापंक्षिप्रंविनश्यति॥ईशानसंहितायांउ
मामहेश्वरसंवादे॥किंदीक्षयाकिंतपसाकिंदानेनजपेनकिं॥शृणुदेविव
रारोहेमद्भक्तैर्यदिभुज्यते ॥२६॥शिरसाधारयेद्भक्त्याशिवनिर्माल्यमलो
भतः॥असावेवधृतस्तेनसोमःसोमकलाधरः॥२७॥निर्माल्यधारयेद्भ
क्त्याशिरसापार्वतीपतेः॥राजसूयसहस्रस्यफलंप्राप्नोत्यसंशयः॥२८॥शि
रसाशिवनिर्माल्यंभक्त्यायोधारयेद्यदि॥अशुचिर्भिन्नमर्यादःसर्वावस्था

गतेऽपि वा ॥२९॥ सर्वदेवामयुक्तात्मा नियमैश्च बहिष्कृतः ॥ तस्य पापानि घोरा
णि नाशयत्येव शंकरः ॥३०॥ निर्मात्यं परमं पुण्यं प्रसादं पापनाशनं ॥ ब्रह्मचा
रिगृहस्थानां यतीनां भुक्तिमुक्तिदं ॥३१॥ पृथिव्यां यानि तीर्थानि येन द्यः पु
ण्यदाः शुभाः ॥ यत्पापस्थापितं नित्यं तस्माद्दूर्यं प्रसादजं ॥३२॥ उपवास
सहस्राणि प्राजापत्यायुतानि च ॥ शिवप्रसादसिक्थस्य कोट्यंशो नापि नो
समाः ॥३३॥ तिलषोडशभागं च तृणाग्रांबुकणोपमं ॥ पादोदकप्रसादा
न्नं सेवया मोक्षमाप्नुयात् ॥३४॥ अथार्पणविधिः ॥ लिंगे रवाद्यानि चोदनी
याःनिपयाद्यान्यान्यानियानिवे ॥ देयानि तानिवे शंभोरश्नीयाद्दासभावतः ॥
भोज्याले ह्यांश्चचोष्यांश्च ये चालिंगार्पिताः परे ॥ लिंगोच्छिष्टं तु भुंजीत प्रसादा

शै·र·
१११

र्त्तिरुदाहृता ॥३६॥ रूपांगं च समायुक्तं रुचीनां शुद्धशैविकं ॥ तन्निश्राद र्पितं चेत्तच्छं
भोः प्रसादसिद्धिकं ॥३७॥ रूपं समर्प्य द्रव्यं स्यरुचिं चैवार्पयेत्ततः ॥ उभयार्पणहो
नश्चेत्प्रसादो निष्फलो भवेत् ॥३८॥ इति वचन प्रमाणात्स्वकीय जिह्वास्प
र्शन पदार्थ रुचिं मानसकरेण स्वेष्ट लिंगस्य समर्पणं कृत्वा तत्प्रसाद सुख
मनुभवितुमर्हो भवति ॥ तस्योदाहरणमाहुः ॥ ब्रह्मांडपुराणे ॥ ईश्वर पिताम
हसंवादे ॥ नैवेद्यं पुरतोन्यस्य दर्शनात्स्वीकृतं मया ॥ सरसान्भक्तस्य जिह्वा
ग्रादश्नामि कमलोद्भव ॥३९॥ इत्येवमादि वचन प्रमाणात् ॥ प्राण लिंगस्य यद्य
त्कर्मणा मनसा वाचा पूर्वमर्पित पदार्थ रूपांतर्गत रुचिं स्वजिह्वापेक्षया नि
श्चयात् ॥ सावधान मनसा समर्पितं भवतीति पाकदशायां परिचारकैस्तथा

कृतमपि देवार्हमेव ॥ तथा च स्कांदे ॥ समाघ्रातं परिस्पृष्टं यद्दृष्टं मनिच्छया ॥
शिवाय कल्पितं वस्तु नार्कं चिदपि दूष्यते ॥ १४० ॥ क्रियातिलके ॥ गवां सर्पिः
शरीरस्थं न करोत्यात्मपोषणं ॥ मिश्रितं कर्मणा स्यं तं पुनस्तासां तु भेष
जं ॥ एवमंतः शरीरस्थः सर्पिर्वत्परमेश्वरः ॥ विनाचोपासनादेवो न करो
ति हितत्फलं ॥ ४१ ॥ इति वचनप्रामाण्यादभ्यंतरार्पितमेव भवति ॥ तथा
यजुर्वेदे ॥ यद्धि मनसाध्यायति तद्वाचावदति तत्कर्मणा करोतीति श्रुत्या
गमप्रमाणाद्वा विज्ञापनमनोभावेन क्रियासमर्पण त्रिकरणशुद्धांतदे
वार्पणं भवति ॥ अस्मिन्नर्थे लैंगे ॥ कर्मणा मनसा वाचा त्रिविधं चार्पणं
शुभं ॥ नैवेद्यमनर्पितं भुंक्ते प्रसादं निष्फलं भवेत् ॥ ४२ ॥ स्वेष्टलिंगाय य

शै०र०
३१२

दत्तं चरुकं तन्न संशयः ॥ तस्मा शये त्स्वयं भाज्ञो नान्यस्मै वतु दापयेत् ॥ नदद्यादो
जलादिभ्योदद्यान्त्रैन्नवत्रकं व्रजेत् ॥ ४३ ॥ बृहत्कालोत्तरे ॥ गच्छन् तिष्ठन् स्वप
न् जाग्रन् भुंजानो मैथुने रतः ॥ यः शिवार्पितचेतस्को भक्तिमान् सतु नान्य
था ॥ ४४ ॥ संयोगेषु वियोगेषु चाणुमात्र सुखानि च ॥ यः कुर्याद् दिष्ट लिंगेतु
सोद्धानीनिरंतरं ॥ ४५ ॥ पंचेंद्रियसुखं मुख्यं हृदयं तस्य कारणात् ॥ मरु
तं च तनुस्पर्शं सर्वलिंगसमर्पणं ॥ ४६ ॥ इंद्रियादागतं किंचित् सुखं तच्छि
वार्पितं तत्त्वसारं भोक्तव्यं तदिंद्रियं द्रिमुखेन च ॥ ४७ ॥ यदिंद्रियं मुख
ज्ञेयं तदिंद्रियमुखाच्चरत् ॥ अन्येंद्रियोपभुक्तं चेदन्नहंभूषणादिवत् ॥
॥ ४८ ॥ यायाक्रियाविधातव्या प्रस्तुता जायते रति ॥ तां तां कुर्यान्महा

द्वेशिवार्पणधियासुधीः॥ ४९॥ उपभोगाययत्पुरतोवस्तुयद्यदुपस्थितं॥ तत्तत्सम
र्प्यदेवाय विदधीतान्मसात्ततः॥ ५०॥ आरभ्यकर्माणिशुभान्यितानिभावांश्चस
र्वान्विनियोजयेद्यः॥ तेषामभावेकृतकर्मनाशःकर्म क्षयंयाति समर्पणेन॥ ५१॥
अस्मिन्नर्थेक्रियातिलके॥ अभावेभाव मासाद्य स्थानेस्थानेसमाचरेत्॥
एतद्वयपरिज्ञानिमसादीसावधानकः॥ ५२॥ लिंगसारे॥ इक्षुरंभाफलादीनि
खंडितानिनिवेदयेत्॥ द्राक्षाखर्जूरचूतादिन्यखंडानिनिवेदयेत्॥ ५३॥ शुद्धे
शिवप्रसादेचशुचित्वंयोनभावयेत्॥ सोपियातिनरोघोरंनरकंकालमक्षयं॥
५४॥ सुप्रतिष्ठितलिंगस्यनयथापूर्वभावना॥ तथाशिवप्रसादस्यपूर्वनामनसं
स्मरेत्॥ ५५॥ ततःस्वयंचभुंजीतशुद्धमन्नंयथासुखं॥ निवेदितंचदेवायतद्धे

शै॰र॰ पंचात्मशुद्धये॥ ३५६॥ असमर्प्य पदं शंभोर्भुंक्ते रवादतिपातिच॥ पत्रं पुष्पं फलं तोय
१३२ मन्नपानाद्यमौषधं॥ शिवार्पणं विना भुंक्ते भुंक्ते सद्यो हि किल्बिषं॥ ५७॥ फलं पु
ष्पं सुगंधं च वस्त्राद्याभरणानि च॥ लिंगार्पणात्प्रसादः स्यात् किल्बिषं स्यादनर्पितं॥
॥ ५८॥ लिंगे॥ सर्वं च तृणकाष्ठं च भक्ष्यं चेवानुलेपनं॥ गंधो मृगमदश्चैव कर्पूरः स्त्रै
लमंजनं॥ ५९॥ लैंगे॥ रत्नाभरणजातं च वस्त्रं सकलवाहनं॥ प्रसाद एव भोक्तव्यो
नान्यच्चांडालविट्समः॥ ६०॥ भोज्यं लेह्यं च चोष्यं च यच्च लिंगार्पितं शुभं॥ नोच्छि
ष्टान्नमिश्रं तु प्रसादं निष्फलं भवेत्॥ ६१॥ बद्धापि स्तोकमेवापि शिष्टान्नेन विमिश्रि
तं॥ अनर्पितं च भुंजानस्तद्व्योनतकिल्बिषं॥ ६२॥ इत्यादिवचनप्रामाण्यात्॥ प्रसा
दमन्यदेवस्य भुक्तं तु किल्बिषं भवेत्॥ शिवस्यैव तु निर्माल्यं भक्त्या धार्यं द्विजादि

भिः॥ ६३॥ न तन्न शांतिपापानि मनोवाक्कायजानि च॥ नैवेद्यं विष्णुना भुक्तममृतं चान्य

दैवतैः॥ निर्माल्यं च सनैवेद्यं भुक्त्वा चांद्रायणं चरेत्॥ ६४॥ इत्यादि वचनप्रामाण्या

त्॥ ब्राह्मणानामपि परमेश्वरप्रसाद एव विशेषेण भोक्तव्यः॥ वसिष्ठभृगवत्रिपाणि

निकणादप्रभृतिमुनिगणैर्निषेवितत्वाच्च परमेश्वरस्य प्रसाद एव भोगमोक्षार्थि

नां ब्राह्मणादिवर्णानामुपभोग्य एव॥ असंस्कारिभ्यायस्ता कंशभोरस्य निवे दि

तं॥ भुक्तेय द्युभयं तस्य प्रसादं निष्फलं भवेत्॥ ६५॥ अभक्तजनसंस्पृष्टान्य

दार्थानिह वर्जयेत्॥ अभक्तालोकितं चैव वर्जयेद्रोदनादिकं॥ ६६॥ बहिःश

ब्दः कुशब्दश्च हिंसाशब्दस्तथापराः॥ श्वपचादिकशब्दश्च कर्मशोभादिकं

वचः॥ बैभसिकोमहादेवि प्रसादी वर्जयेदमून्॥ वातुलतंत्रे॥ अंतरायामया

भुक्ताः प्रसादस्य च सप्तधा ॥ कथं चित्तत्र जातेषु निर्माल्यं वै चितं स्मृतं ॥ ६९ ॥ चर्मा
स्थिरुधिरं मांसं क्षुद्रगामीणजंतुयुक् ॥ मधुबिंदुयुतं त्याज्यं दर्शने स्पर्शने शुभं ॥
पूर्वपदार्थानसंशोध्य सद्यः पाको विधीयते ॥ लिंगोच्छिष्टं परं कार्यं ततः प्रसाद
सेवनं ॥ ६९ ॥ कथं चित्प्रसादजातायैः तरायइमे शिवे ॥ तत्सर्वं न हि भुंजीयाल्लिं
गोच्छिष्टं न पावनं ॥ ७० ॥ मनः पूतं तु नैवेद्यं नयनाभ्यं च दष्टूरतं ॥ भविदष्टिस्तिरो
धान पटेनाच्छादयेत्सदा ॥ ७१ ॥ रहस्ये ॥ न विकल्प्यधिया शंभोर्भुक्तोच्छिष्टा
न्नपानकं ॥ योभुंक्ते सगणाधीशो याज्जीवं प्रतियज्ञया ॥ ७२ ॥ प्राणप्रयाणका
लेषु सर्वभोगोपभोगकं ॥ अर्पयेत्सावधानी च स लिंगप्राणदायकः ॥ ७३ ॥ पू
जकाबहवः संतिभुक्ताः शतसहस्रशः ॥ तत्र प्रसादपात्रं तु द्वौ त्रयो नैव पंच

षट्।।७४।।शिवप्रसादमाहात्म्यं सिद्धकिन्नरगुह्यकाः।। विष्णुप्रमुखदेवाश्च
तेनजानंति किंनराः।।७५।।तल्लक्षणाभिधानपुरःसरमवांतरभेदमाह।।
प्रसादंत्रिविधंप्रोक्तंशुद्धसिद्धप्रसिद्धकं।।शुद्धंलिंगमुखात्यक्तंसिद्धश्चरावि
सर्जितं।।प्रसिद्धंचगुरोर्भुक्तमित्येतत्त्रिविधंस्मृतं।।७६।।नित्यंवैदिकशैवेन
सेव्यतेलिंगसेवितं।।तत्त्वार्थवीरशैवेनसेव्यतेचरसेवितं।।तथैवोभयशैवेन
सेव्यतेचुरसेवितं।।तथैवोभयशैवेनसेव्यतेगुरुसेवितं।।७७।।शिवरहस्ये।।
गुरुजंगमलिंगानांनिर्माल्यभोजनादिनः।।सदैवानुभवेद्देविप्रसादव्रतमु
त्तमं।।७८।।गुरौलिंगेचरेज्ञानेप्रसादेपादवारिणि।।समयेभजनेभक्त्यात
द्व्रतंभक्तिदंस्मृतं।।७९।।प्राणप्रसादमव्यक्तंव्यक्तंलिंगप्रसादकं।।लिंगजंगम

संयुक्तं प्रसादं चेत्यखंडकं॥ ८०॥ महता लिंगरूपेण महता जंगमेन च॥ द्विविधे
न समुद्भूत प्रसादाय नमो नमः॥ ८१॥ लिंगद्वयं प्रसादं च यो भुंक्ते श्रद्धयान्वितः॥
तदीयोच्छिष्टनिर्माल्यं सर्वेयां ति परंपदं॥ ८२॥ बोधायने गुरुदेवोच्छिष्टप्रसाद
प्रक्षालित तीर्थग्रहणमुखेन दीक्षान्यायमाह॥ पादोदकं पापहरं निर्माल्यं चै
हिकप्रदं॥ गुरोर्भुक्तं सदाकालमामुष्मिकफलप्रदं॥ ८३॥ यद्यदात्मोपभोगा
यतत्तद्द्रव्यमवंचयन्॥ निवेद्य गुरवे भक्त्या तदाज्ञापालको भवेत्॥ ८४॥ क
र्मणा मनसा वाचा गुरूणां भक्तवत्सलः॥ शरीरमर्थं प्राणं च सद्गुरुभ्यो निवे
दयेत्॥ ८५॥ त्रिविधार्पणेन किं लभ्यते शरीरनिवेदनात्प्रसादं लब्धवान्॥
अर्थनिवेदनाज्जंगमभक्तिं लब्धवान् न भवति चेत् शरीरं वंचकस्य प्रसादे से

वासो रव्यं न भवति ॥ प्राणवंचकस्य तल्लिंगसंबंधो न भवति ॥ अर्थवंचकस्य तद
परावतारजंगमपरिचर्याफलं न भवति ॥ अस्मिन्नर्थे शैवे ॥ मत्प्रसादोपभोगी यो म
द्भक्तानां च वंचकः ॥ कुंभिपाकेषु घोरेषु पच्यते नात्र संशयः ॥ ९६ ॥ एतदेव ॥ इत्थ
मवंचकस्य कदाचिद्दौर्गत्यं न भवति ॥ लौकिकानां तथान्येषामपि मुक्तिर्न विद्यते ॥
९७ ॥ पाषंडिनोपि मुच्यंते गुरोश्चैव प्रसादतः ॥ संसारपापपंकस्य शिवज्ञानांबु
नाशनं ॥ ९८ ॥ गुरोः पादोदकं पीतं संसारदमनाशनं ॥ ॐ अथ गणप्रसादः ॥ ब्र
ह्मांडपुराणे ॥ नैवेद्यं च पुरतो न्यस्तं दर्शनात्स्वीकृतं मया ॥ रसान्मद्भक्तजिह्वाग्रा द
श्नामि कमलोद्भव ॥ इत्यादिवचनप्रामाण्यात् ॥ तेनोपभोगस्रग्गंधवस्त्रालंकरणा
दिकं ॥ अनुभुक्तं गणोच्छिष्टं सोपि मायां तरिष्यति ॥ ९९ ॥ सकृल्लिंगार्चको च्छिष्टस्व

शै.र.
१२६

देहे यस्तु लेपयेत्॥ वज्रकायस्स भवति शैवेन सह मोदते॥ १०॥ तस्योदाहरणमा
ह॥ श्रीमहाभारते॥ दुर्वासो च्छिष्टभुक्तेन पादबाह्यांगलेपनात्॥ सहसा वज्र
कायं हि प्राप्तवान्विष्णुरव्ययः॥ ११॥ तस्मात्कारणात्॥ सर्वभक्तगणप्रीतिभु
क्तं शिवप्रसादतं॥ गणप्रसादियः सोपंभुंजीत सुखलीलया॥ चराचरप्रसा
दान्नभोक्तुस्तच्छेषधारणात्॥ चराचराणां भूतानामपि मुक्तिर्भवेत्प्रिये॥ १२॥
प्रसादभोक्तॄन्निंदंति येजनाभक्तिसंयुतान्॥ तेयांति पितृभिः सार्धं नरकंना
श्री त्रसंशयः॥ १३॥ इति शैवरत्नाकरे प्रसादमाहात्म्यंनाम षोडशोध्यायः॥ १६॥ श्री
कालिकाकांडे॥ ध्यानरूपं महेशानं लिंगं दृष्ट्वा न मन्यते॥ सपच्यते म
हाघोरे नरके कालमक्षयं॥ १॥ सोमशंभो लिंगपादेन संस्पृष्टेलं घने वापि

यातकं॥मात्रोपकरणंचैव निर्माल्यंचनलंघयेत्॥३॥वायवीये॥तृणंवाय
दिवाकाष्टंमृदंवाजलमेववा॥परस्यापहरंजंतुर्नरकेचमवु ध्यते॥३॥तृणंकाष्टंफलं
पुष्पंफलाशंवैहरेतुयः॥धर्मार्थंकेवलंचैवमन्यथापतितोभवेत्॥४॥शिव
धर्मे॥स्वामिनांलभ्यमानानांउछिशनांचसंभ्रमे॥परस्वानामनादानामेत
दस्तेयलक्षणं॥५॥अलाभेपिपरस्वंषुयोमनोनैवयच्छति॥कर्मणामनसावा
चासत्पत्तः शिवतांव्रजेत्॥कूर्म॥श्राद्धदानाश्रमेर्युक्तः सोमृतत्वायकल्पते॥
न्यायागतधनःशांतोब्रह्मविद्यापरायणः॥स्वधर्मपालको नित्यंसोमृतत्वा
यकल्पते॥६॥तिथिपरस्यनब्रूयान्नक्षत्राणिननिर्दिशेत्॥मक्षिकापादमा
त्रेणशिवस्त्वमुपजीवति॥७॥लोभान्मोहात्सपच्येतकल्पांतंनरकेनरः॥इती

शै०र०
१३७

यांशेन वित्तेन प्रकुर्वीत शिवार्चनं ॥८॥ न्यायोपार्जितवित्तः सन् अन्यायं परिव
र्जयेत ॥७ न्यायार्जितवित्तं तु नरकायैव केवलं ॥९॥ सत्येन लोकं जयति सत्यं
तत्परमं पदं ॥ यथाभूतार्थवादं तु सत्यमाहुर्मनीषिणः ॥१०॥ शिवधर्मे ॥
स्वानुभूतं स्वदृष्टं च यो दृष्टार्थं न गूहति ॥ यथाभूतार्थकथनमित्येतत्सत्य
लक्षणं ॥११॥ सत्यं सत्यं पुनः सत्यं एतद्वा सत्यस्य लक्षणं ॥ परपीडाविनिर्मुक्तं
यो दद्याद्वचनं सदा ॥१२॥ अश्वमेधशतं पूर्णं सत्यं तत्साम्यमाहृतं ॥ सत्ये प्रति
ष्ठितं ज्ञानं धर्मः सत्ये प्रतिष्ठितः ॥१३॥ सत्ये प्रतिष्ठितं शौचं शीलं सत्ये प्रतिष्ठि
तं ॥ सत्ये प्रतिष्ठितं शौचं शीलं सत्ये प्रतिष्ठितं ॥ सत्ये प्रतिष्ठितो मोक्षो मोक्षे
सत्यं प्रतिष्ठितं ॥१४॥ कामान्मोहाद्भयाल्लोभात् सत्यं नातिक्रमेद्द्विजः ॥ सं

ध्यातिक्रमणाद्वि प्रोब्राह्मणान्मुच्यतेयथा ॥१५॥ असत्यंनवदेत्किंचिन्नस
त्यंचपरित्यजेत् ॥ यत्सत्यब्रह्मभित्याहुरसत्यंब्रह्मदूषणं ॥१६॥ अनृतंपुरु
षंग्राम्यंपै शुन्यंपापहेतुकं ॥ सौरे ॥ अहिंसासर्वभूतानांभवेदानंदकु
सदा ॥ अहिंसापरमोधर्मः सर्वेषांप्राणिनांततः ॥१७॥ यद्धि द्वानमभयस्य
स्यात्सर्वदानात्तमोत्तमं ॥ तस्माद्वैपरिहर्त्तव्याहिंसासर्वत्रसर्वदा ॥१८॥ सर्व
धर्मेषु विप्रेंद्रास्त्वहिंसापरमोमतः ॥ तस्मादहिंसानिरतः शांतः शिवजन
प्रियः ॥१९॥ भक्तिः शिवेसमास्थायतस्मिन्जन्मनिमुच्यते ॥ शिवधर्मेशा
स्त्रे ॥ अहिंसापरमोधर्मः शक्तानांपरिकीर्त्तितः ॥ अशक्तानामयंधर्मोदा
नयज्ञादिपूर्वकं ॥२०॥ पापेरमंतियेलोकेपापिष्टास्तेनराधमाः ॥ अभूतसं

शि०र०
१२९

पूर्वयाभुवत्स-च्यतेनरकेध्रुवं ॥२१॥आत्मवत्सर्वभूतेषुयोहितायशिवायच॥
सदापर्वततेसद्भिरहिंसेयमुदाहृता॥२२॥सर्वशास्त्रेषुवेदेषुयज्ञास्तेषांतुतत्फ
लं॥योहिंसत्वभूतानितस्यपुण्यंततोधिकं॥२३॥त्रैलोक्यमपियोदद्यादभिवि
लैरत्नपूरितं॥परेतपांसियज्ञाश्चनतत्तुल्यमहिंसया॥२४॥नततसरंमव
श्यामिकचिदप्यागमेस्वयं॥पुंसामरिवलदेवानांदानमद्भुतमुत्तमं॥२५॥
सर्वभूताभयंकृत्वायश्चरेत्शांतमानसः॥इहैवसर्वभूतेभ्योनभयंतस्यविद्य
ते॥२६॥योनहिंसतिभूतानिचराणिस्थावराणिच॥सभूतात्मेतिनिरतंपरां
शांतिमवाप्नुयात्॥२७॥स्वगृहेयोनरःकुर्यात्प्राणहिंसानिवारणं॥अनस्थि
प्राणिसंघानांहैवैकाथशिवजपेत्॥२८॥जपेदष्टसहस्रंतुक्षेत्रविद्वावधे

नच॥ हत्वाशूद्रं स्त्रियंबालं शिवंपंचशतंजपेत्॥२९॥ जपेदष्टसहस्रंतु क्षेत्र
विद्रावंधेनचं॥ गजाश्वादिनिपातने॥ सौरे॥ अन्नतासारदार्याच्चतथाभक्ष
स्यभक्षणात्॥ अश्रोतधर्माचरणात्किमंनश्यंतिवैकुलं॥३०॥ शिवधर्मे॥
मौनंव्रतंमहापुण्यंहुंहुंकारविवर्जितं॥ कर्मणामनसावाचाहिंसांत
त्रविवर्जयेत्॥३१॥ सदामौनव्रतेनिष्ठमौनंसर्वार्थसाधकं॥ शिवधर्मे॥
यश्चात्मार्थेपरार्थेवासमस्तेंद्रियसंयमः॥ नकार्येसंप्रवर्तेतनदृष्टुःशमल
क्षणं॥३२॥ अक्षीणाशेषदोषाणांशिववार्त्तापिदुर्लभा॥ प्रक्षीणादोष
दोषस्यशुद्धांतःकरणस्यतु॥३३॥ देवदेवपरिज्ञानेवांछायायातिसुव्रत॥
शिवाज्ञाश्रवणाद्युक्तायद्यालस्यात्सराज्ञुरवं॥३४॥ विनाश्यसुकृतंस

शै॰र॰ वेंदुष्कृतरौरवंव्रजेत्॥पारवश्यंयदामध्येदुर्निवारंमहामुने॥३५॥यदाज्ञा
११९ नमुवक्तारमनुज्ञाप्यतथाशिवं॥पुस्तकंचतथाराध्यक्रमादन्यपराभवेत्॥
॥३६॥अहोरात्रस्यपक्षस्यमासःसंवत्सरस्यच॥गुपक्षवासव्रतानांतुनत्क
लं वा चिकार्चनं॥३७॥अंगवंगकलिंगाश्चमालवागूर्जरस्तथा॥अहि
रःकोंकणश्चैवद्राविडोदक्षिणापथः॥अवंतिर्मागधीश्चैवदेशानेतान्वि
वर्जयेत्॥१॥शिवधर्मे॥३॥यत्रक्षेत्रे शिवोनास्तिवीरमाहेश्वरोजनः॥तत्र
स्नानंनकर्त्तव्यं विध्यंनरवमांतरं॥२॥स्वयंभुयत्रवालिंगंयत्रवाशिवयो
गिनः॥समंताद्योजनंतत्रवाराणस्याःसमंविदु॥३॥कीदृशेष्वपिदे
शेषुतल्लिंगंयदिपूजितं तत्रयोजनपर्यंतंवाराणस्याःसमंविदुः॥४॥की

ष्टोषु पिदेशेषु यत्र भूतिविभूषणः ॥ तत्रशंभुः प्रसन्नो वै तिष्ठेत्काशीसमं
ततः ॥ ६ ॥ यस्मिन्देशे वसेन्नित्यं भूतिशासनसंयुतः ॥ गतो यदृच्छया वापि
सर्वतीर्थसमो हि सः ॥ ७ ॥ अंत्यजो वाधमो वापि मूर्खो वा पंडितोपि वा ॥
यस्मिन्सदा शिवः साम्बः सर्वभूतगणैर्वृतः ॥ ८ ॥ सर्वतीर्थं च देवाश्च सा
न्निध्यं कुर्वते सदा ॥ अध्यात्मचरणेच्छित्वा शिवक्षेत्रे वसेन्नरः ॥ ९ ॥
देहांते शिवसायुज्यं जायते नात्र संशयः ॥ सौरे ॥ सा पियाति शिवस्था
नं यद्देवैरपि दुर्लभं ॥ तस्मात्तद्वसतं कुर्याच्छिवक्षेत्रे समीपतः ॥ १० ॥
लिंगसारे ॥ सती सुताश्च भृत्याश्च लिंगार्चनरताः शुभाः ॥ लिंगार्पितम
सादाश्च अन्ये दुर्शनसंशयः ॥ ११ ॥ दासी गोपाश्च भृत्याश्च गृहस्थस्य

शै॰र॰ षकास्तथा॥ लिंगसंसर्गशून्यः कर्मा अन्ये नीचा न संशयः॥१२॥ लिंगार्चनरता
१२० नारी सुतकी च रजस्वला॥ रविरग्निर्यथा वायुस्तद्वत्कोटिगुणैः शुचिः॥१३॥
शिवधर्मे॥ शिवार्थं वचनं त्वेषां संतानार्थं च मैथुनं॥ भुक्त्यार्थं जीवनं तेषां
स्वर्गार्थं जीवनं हि तत्॥१४॥ चंडाला श्विरमेध्याग्निः सुतका ग्निगर्हितः॥ प
थिस्ता श्विश्विताग्निश्च श्रमणगृहमोरिछतः॥१५॥ पूजालोपो न कर्त्तव्यः सुत
केमृतके पिवा वा॥ जलद्रवद्देहस्तस्मा ल्लिंगं सदार्चयेन्नरः॥१६॥ धर्मपत्न्या
श्च गमनं विधिनात्र विधीयते॥ स्त्रियो वै भर्तृशुश्रूषां विधाय व्रततत्पराः॥१७॥
भयाति नरकं घोरं नात्र कार्या विचारणा॥ गुरुरग्निर्द्विजातीनां वर्णानां ब्रा
ह्मणो गुरुः॥१८॥ पतिरेव गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः॥ अथ भर्तृविही

श्वि

नाया धर्मं वक्ष्ये सदाशिवे ३१ ब्रतं दानं तपः शौचं भूशय्या नक्तभोजनं ॥ ब्रह्म
चर्या सदा स्नानं भस्मना सलिलेन वा ॥ २० ॥ शांतिर्मौनं क्षमा नित्यं संविभागो
यथाविधि ॥ शिवधर्मे ॥ १० ॥ शिवभक्तिः सदा क्षांतिरहिंसा सर्वदाक्षमः ॥ श
संतोषः सत्यमस्तेयं ब्रह्मचर्यं तथाष्टकं ॥ २१ ॥ लक्षणं ब्रह्मचर्यस्य समस्तेंद्रियसंयमः ॥
ब्रह्मचर्या स्थितं सत्यं ब्रह्मचर्य स्थितं तपः ॥ २२ ॥ ब्रह्मचर्ये स्थितं ज्ञानं ब्रह्मचर्ये स्थि
ताक्षमा ॥ यस्तिष्ठे ब्रह्मचर्येको नत्वस्या संस्थितः शिवः ॥ २३ ॥ एकरात्रे स्थितः
स्यापि यागति ब्रह्मचारिणः ॥ ब्रह्मस्थापि न तां यातु माघे वर्षशतैरपि ॥ २४ ॥ मै
थुनं यः समुत्सृज्य चेतरासो निराकुलः ॥ अहोरात्रं यतिः श्रीमान् स संक्षोभं स्त्रि
याततः ॥ २५ ॥ रात्रौ न भोजनं कुर्यान्मुनिर्वै ब्रह्मचर्यवान् ॥ एकपादपुराणे ॥ ब्रह्म

चर्यं स्थितो यस्तु लिंगमभ्यर्च्चयेत्सदा ॥ तस्य मोक्षो भवेद्देवि अतिकामो विनश्य
ति ॥२६॥ शिवधर्मे ॥ ब्रह्मचर्यं तपो ध्यानं क्षांतिराहारलाघवं ॥ एतेनैतपसोऽस्य रूपं
सुघोरं पंचलक्षणं ॥२७॥ क्षमा शांतिश्च संतोषः सत्यमस्तेयमेव च ॥ ब्रह्मचर्यं शि
वज्ञानं वैराग्यं भस्मसेवनं ॥२८॥ ऋतुकालाभिगामित्वं स्वदारेषु च नान्यथा ॥
सर्ववर्ज्जं गृहस्थस्य ब्रह्मचर्यमुदाहृतं ॥२९॥ रागस्य वशगत्वं यः क्षांतिरेषा सुनि
र्मला ॥ क्रोधस्तस्य वृथा यस्मात्तस्मात् क्रोधं विवर्जयेत् ॥३०॥ क्षमा दानं क्षमा
सत्यं क्षमा हिंसा क्षमा श्रुतं ॥ क्षमा स्वर्गश्च मोक्षश्च क्षमयैव जगज्जनं ॥३१॥
स शूरः सात्विको विद्वान् स तपस्वी जितेंद्रियः ॥ येनाशु शांतिखड्गेन क्रोध
शत्रुर्निपातितः ॥३२॥ यस्तु वसंत्सरं त्वन्यैः पतितैः सह संवसेत् ॥ सोपि तत्स

नमूर्खैः सहसंवासः पतितैर्नकदाचन॥
सोपितत्समतांयातिनामतोज्ञानतोपिवा॥ नमूर्खैःसहसंवासःपतितैर्नकदाचन॥ दोवाणिंविवादं
मिथ्यानिंदारतैश्चैवपरमेश्वरनिंदकैः॥३४॥सौरे॥पैशुन्यंदुःखदोवाणिंविवादं
वर्जयेत्सदा॥मूर्त्तयोयाःशिवस्याष्टौतासांनिंदांविवर्जयेत्॥३५॥सौरे॥वदेन्नै
वाप्रियंवाक्यंनानृतंचनधर्महृत्॥कालिकाकांडे॥मन्निमित्तकृतंपापम
पिधर्मायकल्प्यते॥मामनादृत्ययत्पुण्यंपापंस्यात्मत्प्रवायकृत्॥३६॥अ
हिंसाकाश्चयेभक्तास्तानिंदंतिमहेश्वरान्॥त्रिशूलपाणिनासर्वेहतास्तेतु
नसंशयः॥३७॥शंकरस्नेहसंजातोरक्षणीयःप्रयत्नतः॥तद्रक्षणान्महेश
स्यलोकेसंमोदतेनरः॥३८॥गुत्तमंसर्वमरणाद्धुनतंपरमासरं॥शिवनिंदा
करंहित्वापीडितःस्वयमेववा॥३९॥यस्त्यजेद्दुस्तत्प्राणान्नपुनःसोभिजायते॥

शै·र·
१२२

शिवनिंदाकरंहंतुमशक्तौशेयःस्वयंहतः॥ ४०॥सद्यएव विमुच्येत त्रिसप्तकुलसं
युतः॥शिवार्थयस्त्यजेत्प्राणान् शिवभक्तार्थमेववा॥ ४१॥शिवाचारार्थमथवा
शिवविद्यार्थमेववा॥नतेनसदृशःकश्चिन्मुक्तिमार्गेस्थितोनरः॥ ४२॥वीरभ
द्रियेत्रैलोक्येप्राणिनःसर्वे नहंतव्याःप्रयत्नतः॥ शिवकार्येषुवक्रस्तुहंत
व्यश्चसशीघ्रतः॥ ४३॥वातुलतंत्रे॥शिवनिंदाकरंवाक्यंश्रुत्वातद्वक्रताड
नं॥कुर्यादन्यत्रवागच्छेदशक्तोपिहितंश्रुतौ॥ ४४॥ शिवद्रव्यापहारायप्रया
तिमनुजाधमः॥हत्वातन्मरणंकुर्यात्तन्मर्दनपरोभवेत्॥ ४५॥शिवचिह्नंवि
षंचैवहन्यद्योदुर्जनोनरः॥तस्यहंतासहस्रेण वीरमाहेश्वरोव्रती॥ ४६॥शि
वाख्मविषयेकुर्यादपराधंकदाचन॥शिवालयेशिवग्रामेशिवारामादिरक्ष

णे॥ तत्कार्यमनिशंकुर्याद्न्यात्तदपहारिणं॥ सौरे॥ शिवनिंदाकरंहत्वाघातयेत्तमय
त्नतः॥ हत्वात्मानंपुनर्यस्तु सयातिपरमांगतिं॥ ४८॥ वातुलतंत्रे॥ शिवकिंकर
भूतोहमितिनित्यंतुभावयेत्॥ तत्कार्यंसकलंकुर्यान्मत्कर्त्तव्यमितिब्रुवन्॥ ४९॥
वीराचारः॥ वीरभद्रीये॥ षडध्वशुद्धिंविधिवल्लमतेनाम्रियतेयदि॥ पशुना
मिवतस्यैकनकुर्यादौर्ध्वदेहिकं॥ ५०॥ नैवाशौचंप्रकुर्वीततत्सुतादौर्विशेष
तः॥ खनेवाभुवितद्देहंदहेद्वाशुचिनाग्निना॥ ५१॥ क्षिपेद्वाप्सुमहासेनत्यजेद्वा
काष्टलोष्टवत्॥ अथैनमपिचोद्दिश्यकर्मचेत्कर्तुमीप्सितं॥ ५२॥ कल्याण
मेवकुर्वीतभक्त्याभक्तांश्चतर्पयेत्॥ जितेंद्रियात्मासततंस्वकालक्रोधनंशु
भे॥ ५३॥ द्युतंचपरिवादंचस्त्रीद्रोहालोचनंतथा॥ गंधमाल्यंरसंतक्रंजायते

शे.र.
१२३

दंतधावनं॥ ५४॥ सर्वपर्युषितं वर्ज्यं घृतं चापि जलं तथा॥ सर्वभूतानुकंपी स्यात्सं
विभागरतः सदा॥ ५५॥ परिवादं मृषावादं निद्रालस्यं विवर्जयेत्॥ मानं मदं तथा
शोकं द्वेषं च परिवर्जयेत्॥ ५६॥ चिंतयन्नक्षरात्मानं शयानं योगनिद्रया॥ भिन्ना
सनं भिन्नशय्यां वर्जयेद्भिन्नभाजनं॥ ५७॥ शिरोभ्यंगावशिष्टेन तैलेनांगं
न लेपयेत्॥ न सर्पशस्त्रैः क्रीडेत स्वान्यंगानि न संस्पृशेत्॥ ५८॥ न संहता
भ्यां पाणिभ्यां कंडूयेदात्मनस्तनुं॥ न वामहस्तेनोद्धृत्य पिबेद्वक्त्रेण वा ज
लं॥ ५९॥ सौरे॥ शुक्लांबर धरो नित्यं सुगंधि प्रियदर्शनः॥ न जीर्णवस्त्रं च प
रिदध्यात्कदाचन॥ ६०॥ सोमशंभो॥ प्रातरुत्थाय संचिंत्य शिवाय शिवम
स्तरं॥ उत्सृजेन्मलमूत्रादि गत्वा देशं यथोचितं॥ ६१॥ शिवधर्मे॥ भूमदेशेय

शौचे तु स्वदेह मलमूत्रके ॥ विसर्जयेन्नचान्यत्र रुद्रालयसमीपतः ॥ ६२ ॥ सो
मेशं भो ॥ उत्तराभिमुखो मूला दिवासंध्यासु सर्वदा ॥ दक्षिणाभिमुखो रात्रौ ना
साग्रव्यग्रलोचनः ॥ ६३ ॥ न तस्तृणेश्वयज्ञांगे मृद्लोष्टेन वा गुदं ॥ न तु गोमयपा
षाणैर्दारुभिश्च कदाचन ॥ ६४ ॥ विशुद्धां मृदुमादाय नो निधाय जलांतिके ॥
ततः समुद्धृतैस्तोये विशुद्धैः शौचमाचरेत् ॥ ६५ ॥ अथवाभावसंशुद्धिप
र्यंतं शौचमाचरेत् ॥ भावो पि भ विनाशुद्धिः शुद्धये मुनिभिर्मतः ॥ ६६ ॥ आच
मे द्विधि वद्विहं दंतधावनमाचरेत् ॥ न ततो मुखसंशुद्धिर्दंतानां धावनं वि
ना ॥ ६७ ॥ शौचं न मृज्जलैः कुर्याद्गंधलेपोपमोचनं ॥ सौरे ॥ शौचं पश्चात्प्रकु
र्वीत गंधलेपक्षया विधि ॥ अंतरं च मनःशुद्धिर्यथा भवति त द्विजाः ॥ ६८ ॥

शै॰र॰
१२४

गंधलेपविहीनोपि भावशुद्धो विशुध्यति॥ भावशुद्धो भवेच्छुद्धिः शुद्धभावस्त
तो भवेत्॥६९॥ असंस्कारो भवेन्मर्त्यो यायस्यांगे मलं वसेत्॥ तस्मान्नैसंस्प
र्शे लिंगं नरो निर्माल्य दूषितः॥७०॥ सोमशंभौ॥ गंडूषैः सूर्यसंख्यातैर्वि
धायस्नानमाचरेत्॥ शौचमाभ्यंतरं विद्यान्न बाह्यं शौचमुच्यते॥ अतः शौ
चविमुक्तात्मा शुचिरप्यशुचिर्यतः॥ शिवधर्मे॥ उदकुंभसहस्रैश्च मृद्यादक
शतैरपि॥ अपि वर्षसहस्राणि क्षाल्यमानो न शुध्यति॥७२॥ भावपूतं भवे
च्छौचं वस्त्रपूतं जलं शुचि॥ दृष्टिपूतं न्यसेत्पादं सत्यपूतं वचो वदेत्॥७३॥
सदाचारः॥ सदाचारं प्रवक्ष्यामि सम्यग्ज्ञानस्य साधनं॥ यस्मादाचार
हीनस्य सर्वदोषाश्रयः स्मृतः॥१॥ सत्संगेवै वै द्विकाद्वि द्विनान्यमार्गाश्रितं

शुभे ॥ यत्प्रोक्तं वैदिकैः शास्त्रैस्तत्सदाचार उच्यते ॥ ३ ॥ आचारः परमो धर्मो आ
चारः परमो धनं ॥ आचारः परमा विद्या आचारः परमा गतिः ॥ सदाचारेण दे
वत्वं ऋषित्वं च वरानने ॥ उपागताः कुतो नित्यं मनुष्यास्तद्विपर्यये ॥ ४ ॥
आचारहीनः पुरुषो लोके भवति निंदितः ॥ समया निंदिते लोके लोकरू
पाधरो ह्ययं ॥ ५ ॥ ज्ञानमाचारहीनेषु सर्वदैव समन्वितं ॥ दुष्टचंडालभां
डेषु यथा भागीरथीजलं ॥ अनाचारयुतः कष्टः सर्वदोषसमाश्रयः ॥ ६ ॥
शिवस्थानेक चित्साक्षात्सर्वदोषविवर्जितः ॥ यस्मात्सन्यस्तपुरुषः स
सम्यग्वृत्तिमान्भवेत् ॥ ७ ॥ वर्णाश्रमविधानोक्तं धर्मं कुर्वीत यत्नतः ॥ य
स्य द्विहितं कर्म न तत्कुर्वन्न पियः सदा ॥ ८ ॥ परदाराः परद्रव्य परनिंदाश्च स

शे.र. वंदा॥ कचिद्दापिन कुर्वीत वाचाचमनसातथा॥९॥ बिभितकार्क कोरंडस्नुहि
१२५ छायांप चना श्रयेत्॥ एकोन गच्छेद ध्वानं बहुभ्यो ल्नरैं नेत्न दिं॥१०॥ नावारोहेत
कुपादि नारोहे द्वक्षपर्वतान्॥ अग्निनान दहेत्यादावग्निं पद्भ्यां नलंघयेत्॥ ११॥ अ
ग्निनो ध्मायमानीतो नाग्नौ किंचिन्मलं त्यजेत्॥ ननरवाग्र जलै धौतस्नानवस्त्रं प
टोदकं॥१२॥ अजश्वानरवेरा घ्राणां मार्जारस्पर्शनं न्रणां पुण्यं पुराकृतिं हंति श्रियं ह
तिं हरेरपि॥१३॥ मार्जनी भुपवातोच्चचर्मा निलमुखानिलो॥ सकृदायुर्हरंसेत
संस्पृष्टा पुरुषस्यतु॥१४॥ कोदेयपादपंवार्थ चार्मं चैलमयापिवा॥ दारवंतालप
र्णवा आसनंपरिकल्पयेत्॥१५॥ अथस्नानंसामदंभो॥ योपिकुंडप दानेषु स्रहे
वास्नानमुत्तमं॥ कपोतकुकुटश्वान काककंकरबरादिभिः॥१६॥ ग्रामसूकरगृ

द्वोष्ट्रैर्नदंश्यः स्पृश्य एव वा॥ श्मशानयतिनमेतभुतिकाम्यभोजने॥१७॥ कृते यदि
मदाने न विनास्नानान्नशुध्यति॥ तथा न लिंगीभिस्पृष्ट्वा वारुणे स्नानमाचरेत्॥१८॥
शुक्रविण्मूत्रसंपर्के नाभे रूर्ध्वं करौ विना॥ वपने वमने रवे प्रेचावगाहेन शुध्यति
॥१९॥ आद्रौ तु विधिशुद्धेन संहितामंत्रितेन च॥ निवृत्ता द्विविधानेन भस्मना स्नानमा
चरेत्॥२०॥ यो ऽस्नानश्चान्नमश्नाति सा हि वै पापवत्तरः॥ तस्मात्स्नात्वा तु भुंजीत भ
स्मनासलिलेन वा॥२१॥ प्रातः स्नात्वा भसा गच्छेद्भस्मना च शिवं पदं॥ आग्नेयं भ
स्मना स्नानं वायव्यं रजसा गवां॥२२॥ दिव्यासातवपर्जेनं र्षेणकं स्नानमनुत्तमं॥
गौरवं गुरुपादोदान्मानसं स्नानमुत्तमं॥२३॥ अथ भविसंकर दोषः॥ यो लिंगद्वे
ष्टिसंमोहादन्यदेवनमस्कृतः॥२४॥ नरो नरकगामी स्यात्तस्य संभाषणादपि॥

शै॰र॰ १२६

लिंगसारे ॥ मृगयुर्भक्ष्यपो वेश्या बहुदैवज्ञ दूषकः ॥ तत्संभाषणतो नित्यं न लिंगी च
तथा भवेत् ॥ २५ ॥ एकपादपुराणे ॥ यो निंदति शिवं शास्त्रं गुरुं चैव तपस्विनं ॥ तेषां
भोजनदाने न दाता च नरकं व्रजेत् ॥ २६ ॥ कालिकाखंडे ॥ ब्राह्मणोपि चतुर्वेदी रु
द्रभक्तिविवर्जितः ॥ तस्य दानं न दातव्यं नरत्नं हि रवैर्यथा ॥ २७ ॥ सौरे ॥ अपूज्यपू
जनेनैव पूज्यानां चाप्यपूजनात् ॥ नरः पापमवाप्नोति महदेनात्र संशयः ॥ २८ ॥ शि
वभक्तिमतिक्रम्य यच्चान्यस्मै प्रदीयते ॥ निष्फलं तद्भवेद्दानं नरकं च प्रपद्यते ॥ २९ ॥
वीरभद्रीये ॥ कवाटार्गलकं बध्वा यजेद्देवं त्रियंबकं ॥ ३० ॥ अर्चनादिक्रियाका
लेप्रच्छन्नंपटमुत्तमं ॥ पापी कोपि परिभ्रष्टो नास्तिको देवनिंदकः ॥ एतेषां स्पर्शनं
कृत्वा पूजायां निष्फलं भवेत् ॥ दुर्मुखश्च दुराचारो मूर्खश्च गुरुनिंदकः ॥ ३१ ॥ ॥

लिंगाचारः सदाचारो भृत्याचारस्तथैव च ॥ शिवाचारो गणाचारः सर्वश्रुतिषु दुर्लभः ॥
॥१॥ पंचाचारो महास्मानो ॥ लिंगसारेषु सज्जनाः ॥ सर्वलोकेषु सूक्ष्मायां सुलभोग
ण मुख्यकृत् ॥२॥ उत्तमां वृत्तिमाश्रित्य नीचावृत्तिं समाश्रितः ॥ आरूढपतितो ज्ञेय
सर्वकर्मबहिष्कृतः ॥३॥ विशुद्धभावनायुक्तः शिवैकगतमानसः ॥ विशुद्धमाप्नुया
त्स्थानमचिंत्यं सर्वगं ध्रुवं ॥४॥ वीरभद्रीये ॥ पतिव्रतः स्वभावेन विहाय परदेवता ॥ शि
वमेकं भजेद्भक्त्या सर्वज्ञातिकरं परं ॥५॥ शिवरहस्ये ॥ नान्यदेवमभिध्यायन्नन्यदेवं
पूजयेत् ॥ नान्यस्य नाम स्मरण्हा मिचेतद्वीरव्रतं मम ॥६॥ अपि कीटपतंगो वा भवेयं शं
कराज्ञया ॥ न तु शक्रत्वमादत्तं त्रैलोक्यमपि कांक्षये ॥७॥ व० ॥ न नाकपृष्टं न च दे
वराज्यं न ब्रह्मलोकं न च विष्णुलोकं न धर्मकामानखिलान्वृणे मि हरस्य दास

शै.र.
१२७

लमहंवृणोमि ॥ ९ ॥ अंतावरमहंकांक्षी निधनंवापिशंकरात् ॥ गच्छेतोवाजनाःशक्र
यथेष्टंनसृजेत्स्मति ॥ १० ॥ शिवधर्मे ॥ शिवमेकंपरित्यज्ययोऽन्यदेवमुपासते ॥ तृषि
तोजाह्नवीतीरे कूपंखनति दुर्मतिः ॥ ११ ॥ कालिकाखंडे ॥ अथरुद्रनमस्कारः ॥
सर्वकर्महरो ध्रुवं ॥ अन्यदेवनमस्कारान तत्फलमवाप्नुयात् ॥ १२ ॥ अपूज्यपूजने
चैवपूज्यानांचाप्यपूजनात् ॥ नरःपापमवाप्नोतिमहादेवेन संशयः ॥ १३ ॥ सौरे ॥
यस्तुलिंगार्चनंत्यक्त्वादेवानन्यांश्चपूजयेत् ॥ रत्नंविहायमूढात्मा यथाकाचमपेक्ष
ते ॥ १४ ॥ ब्रह्मगीतायां ॥ विष्णुभक्त्याचमद्भक्त्यानास्तिनास्तिपरागतिः ॥ शंभुभ
क्तैषैवसर्वेषांसत्यमेवमयोदितं ॥ १५ ॥ विष्णोरपिपरंतत्वंमहादेवंघृणानिधिं ॥
विनाजंतुःसमभ्यर्च्यमुच्यतेनहिसत्तमाः ॥ १६ ॥ शिवपूजापरोभूत्वायोन्यदेवम

नुसमरेत् ॥ अष्टाविंशतिकोटिस्तु नरकान्यास्यसो ध्रुवं ॥ १६ ॥ जाबालस्मृतौ ॥
शंभोर्निर्माल्यसंशुद्धं भुंजीयात्सर्वदाद्विजः ॥ अन्यदेवस्यनैवेद्यं भुक्त्वाचांद्रायणंच
रेत् ॥ १७ ॥ लिंगसारे ॥ लिंगार्चनेकशरणायोन्यदेवंनमस्यति ॥ नरकंनायकं
गत्वात्रिदोषीचप्रजायते ॥ १८ ॥ शुनीगर्भेषुजायते ॥ १८ ॥ लिंगार्चनेकशरणायोन्य
देवंतुमन्यते ॥ नरकंनायकंगत्वाकुष्टीपंगुश्चजायते ॥ १९ ॥ लिंगार्चनैकशरणायो
न्यदेवंतुवंदते नरकंनायकंगत्वात्रिदोषीचप्रजायते ॥ २० ॥ सौरे ॥ केचिद्विष्णुंप्र
शंतिब्रह्मणंचतथापरे ॥ रुद्रमन्यंप्रशंसंति ऋषयोदग्धकिल्बिषाः ॥ २१ ॥ वीरम
द्रिये ॥ देवान्सर्वान्परित्यज्यपूजयेदिंदुशेखरं ॥ नमुख्यंपरिगृह्यादल्पेकथ
र्मंसमाचरेत् ॥ २२ ॥ नान्यशास्त्रंसमादिष्टंनचान्यांदेवतांस्मरेत् ॥ शिवज्ञानविद्या

शै.र.
१२९

यां॥ ईश्वर उवाच॥ सदाचारं प्रवक्ष्यामि सम्यग्ज्ञानस्य साधनं॥ यस्मादाचारहीनस्य ज्ञानं निष्फलतां व्रजेत्॥ २३॥ सदाचारेण देवत्वं ऋषित्वं च वरानने॥ प्रयागताः कुर्यान्नित्यं मनुष्यास्तद्विपर्यये॥ २४॥ आचारहीनः पुरुषो लोके भवति निंदितः॥ मयाच निंदितो देवि लोकरूपधरो ह्यहं॥ २५॥ तस्मात्सर्वप्रयत्नेन सम्यगाचारवान्भवेत्॥ वातुलतंत्रे॥ सतिसुतश्च भृत्यश्च दासी गोपस्तथैव च॥ २६॥ सर्वे लिंगार्चकाः श्रेष्ठास्त्वन्यचंडालवद्भवेत्॥ २६॥ यः शिवाचारसंपन्नो ह्यनाचारेण मिश्रितः॥ नप्रसादी नचाचारी सर्वभक्षी च वायसः॥ २७॥ गृहक्षेत्रं च बीजं च धान्यानि च धनानि गौः॥ एतल्लिंगांकितं शुद्धमन्यथा नरकं व्रजेत्॥ २८॥ रहस्ये॥ भक्तहस्तगतं द्रव्यं धनं वस्त्रं विभूषणं॥ नंदिमुद्रांकितं ग्राह्यं द्रव्यशुद्धिरिहोच्यते॥ २९॥

तदेवपावनंक्षेत्रंक्षेत्रसिद्धि रिहोच्यते॥
नंदिमुद्रां किंतंक्षेत्रंयुक्तंशिवशरण्यकैः॥ प्रौढप्रसादभोगश्चकालशुद्धि रि
॥३०॥रात्रौमध्यमयामेषुसुप्तेषुरिवलजंतुषु॥ रिहोच्यते॥अभक्तदर्शनाभावा
होच्यते॥३१॥जलपाकक्रियायांचभांडशुद्धि रिहोच्यते॥
त्पक्वमन्नंवराननं॥३२॥शारवतैलादिभांबाह्यं कंसर्वंपाकशुद्धि रिहोच्यते॥
भक्तेनयत्कृतंवेश्म लिंगमुद्रासमन्वितं॥अभक्तस्पर्शनाभावादेश्मशुद्धि रि
होच्यते॥ लिंगार्चनविधौभक्तः काष्टमौनं समाचरेत्॥ दत्वाचभावनांलिंगे
भावशुद्धि रिहोच्यते॥३५॥गुरुसंस्कारमाहात्म्यसंप्रदाययुतोभवेत्॥अथ
वागर्भसंस्कारेभवशुद्धि रिहोच्यते॥३६॥सर्वभूतदयानित्यंपंचभूतेषु
सक्रिया॥सभूतपोषणाभावोभूतशुद्धि रिहोच्यते॥३७॥समयाराधनेभ

शे॰र॰ त्क्तेधनप्राणाभिमानके ॥ त्रिसंध्यमर्चनाद्देवी मार्गशुद्धि रिहोच्यते ॥ ३८ ॥ विनयः
१२९ सर्वभक्तानां क्रियते हि तया गिरा ॥ तद्वचश्चानुकुल्यं हि नयशुद्धि रिहोच्यते ॥ ३९ ॥
घृतंदधिपयस्तक्रं माक्षिकं वर्जयेत्ततः ॥ तद्भोजनं भवेद्देवि रसशुद्धि रिहोच्यते ॥ ४० ॥
विभूति संस्कृतं काष्टं भक्तानीतं च सुव्रते ॥ तद्वै वयोग्यं काष्टशुकाष्टशुद्धि रिहो
च्यते ॥ ४१ ॥ तृणबिंदुलतादीनि भक्तानीतानि चैव हि ॥ संस्कृत्य भस्मनादेवि तृ
णशुद्धि रिहोच्यते ॥ ४२ ॥ भक्त दारु समुद्भूतं फलं पत्रादिकं समं ॥ अथवा स्व
हस्तपक्वानि ॥ शुद्धिस्तांबूलिका मता ॥ ४३ ॥ ५१ ॥ संसारापंथद्धि धान्मोक्ता
जलं पुष्पं फलानि च ॥ पत्रं पात्रं तथा गोत्रं भक्तानां भक्तवत्सलः ॥ ४४ ॥ भक्तहस्त
भवं कूपं मसहं तरुणं जलं ॥ भस्ममंत्रपवित्रं च गृहीतं जल संस्कृतिः ॥ ४५ ॥

...ज्जलं लिंगयोग्यं न अन्यद्दृज्यते सुधीः॥४६॥
नवकुंभगतं तोयं महदृंभविनामपि॥ तज्जलं लिंगयोग्यं च अन्यद्दूज्यते सुधीः॥४६॥
अस्पृश्या नि च पुष्पाणि विमुक्तानि शिली मुखैः॥ अन्यैर र्चितान्येव पुष्पसंस्कार
संभवं॥४७॥ यानि यानि फलान्येव भक्तहस्तगतानि वै॥ अभक्तदर्शनाभावात्क
थ्यते फलसंस्कृतिः॥४८॥ पत्राणि चक्रवर्यादि भक्तहस्त भवानि वै॥ तस्य शाकादि
पाकाय कथ्यते पत्र संस्कृतिः॥४९॥ पात्राणि जंगमादीनि तत्पादरजसा शिवे॥ तेना
पिपावनं विश्वं कथ्यते पात्रसंस्कृतिः॥५०॥ गोत्राणि शिवगोत्राणि तत्र संबंधकार
णं॥ अयम भक्तिपरा तत्र कथ्यते गोत्रसंस्कृतिः॥५१॥ वातुलं तंत्रे॥ ईश्वर उवाच॥
दासोऽहं भावसंयुक्तः सर्वाचार ईषणात्रितये॥ शिष्यो गुरु शुश्रूष सेवयेत्॥५२॥
दासोऽहं जन्म नाशनं॥५३॥ दासोऽहं ज्योतिरूप
नियुक्तकः॥ दासोऽहं धन्यताहेतु दासोऽहं जन्म नाशनं॥५३॥ दासोऽहं ज्योतिरूप

शै-र-
३३०

चदासोहंनिर्मलप्रभं॥ दासोहंकुरुतेयस्तुपार्वतीपरमेशयोः॥ ५४॥ अचिरेणैवका
लेनसर्वपापैः प्रमुच्यते॥ दासोहमितियोभक्त्या चिंतयेद्वृषभध्वजं॥ ५५॥ संसारवि
षदादिभिः सर्वदुःखैर्न लिप्यते॥ तदाज्ञं वीरदासत्वं भृत्यत्वं वीरभृत्यकं॥ ५६॥
समयः सकलावस्थाः स्पर्ज्जनं षड्विधं तथा॥ आदौ नियमसंतुष्टो गुरुपादांबुजा
र्चने॥ ५७॥ कर्मयोगरतः प्रोक्तो दासभावं तु सज्जनं॥ स्वामिभृत्यसमोपेतं परदे
वविवर्जितं॥ ५८॥ मद्भक्तकांक्षितं वित्तं वीरदासं तु सज्जनं॥ अकुलं कुलवंतं वा
नमस्कारपुरःसरं॥ ५९॥ भक्त्या तु भोजयेद्देवीभृत्यभावं तु सज्जनं॥ इष्टसिद्धियुतं
भोक्तुमीषणत्रयसंयुतं॥ असुरं कर्मयोगेन वीरभृत्यं तु सज्जनं॥ ६०॥ स्वगृहं स्वध
नं चैव स्वदेहं भक्तिसंयुतं॥ जंगमे स्थावरे क्षिप्तं स्वसमयाचारं तु सज्जनं॥ ६१॥ श्री

अणिमादिगुणैश्वर्यमीषत्त्रयविवर्जितं निर्मलं निरहंकारं कलावस्थंतुसज्जनं ॥ ६२॥
गुरौ लिंगे दृढो भक्तः सत्यवादी जितेंद्रियः ॥ सुव्रतः सुमतिश्चैव दासभावार्चनक्रमः ॥ ६३॥
शुद्धं लिंगार्चनं नित्यं सज्जनं समयान्वितं ॥ अन्यथा देवतं नास्ति वीरदासार्चनक्रमः
॥ ६४॥ पुष्पानुलेपनं वस्त्रं पादाद्याभरणान्वितं ॥ तांबूलागरुकर्पूरं सुगंधामो
दपूरितं ॥ ६५॥ योजयेद्धयनृत्यं च धवलैश्छत्रचामरैः ॥ स्तुतिस्तोत्रप्रकुर्वीत भृ
त्याचारार्चनक्रमः ॥ ६६॥ प्राणलिंगव्रते लुब्धे हस्तरवड्गादवंचयन् ॥ मुखपंकजव
छिद्यादीरभृत्यार्चनक्रमः ॥ ६७॥ तैलाभ्यंगं च वस्त्रं च इष्टान्नं जंगमार्पणं ॥ सु
खसंभाषणं प्रीत्या समयाचारार्चनक्रमः ॥ ६८॥ चित्तं समरसं शांतं भावपुष्पांबु
निर्मलं ॥ आलिंगार्चनं नित्यं सकलावस्थार्चनक्रमः ॥ ६९॥ ॥ श्रीदेव्युवाच ॥ ॥

शै०व्र०
१३१

दीरव्रतानां भगवान्प्रकारस्तत्र कीदृशः ॥ केवा भवेयुरन्ये मे नियमास्तान्प्रसाद

य ॥ ७० ॥ ईश्वर उवाच ॥ ॥ शृणु देवि त्वया पृष्टान्नियमान्कथयामि ते ॥ भक्तैरंगी

चरान्सर्वान्वीरव्रतपुरःसरान् ॥ ७१ ॥ विकसंति सुकांतीनि सुरभीण्युत्पलान्य

न्यहं ॥ संपाद्याष्टोत्तरशतं संख्यानि प्रतिवासरं ॥ ७२ ॥ यावज्जीवमवश्यं तैः

पूजयिष्यामि शंकरं ॥ तदभावेन भोक्तव्यमेतद्वीरव्रतं मम ॥ ७३ ॥ सांद्रचंदनपं

केन सकर्पूरसुगंधिना ॥ सर्वदा पूजयिष्यामि मयि जीवति शंकरं ॥ ७४ ॥

गंधमक्षतसंयुक्तं दत्वा भोक्ष्यामि शंकरे ॥ अभिसंकल्पमात्रेण एतद्वीरव्रतम

म ॥ ७५ ॥ कल्पयिष्यामि कर्पूरमवश्यं मासंसंयुतं ॥ तांबूलार्पणवेलायां

मत्प्राणेशाय संभवे ॥ ७६ ॥ तं तु न्यं गमयिष्यामि न किंचिदपि वासरं ॥ पाव

नंजीवनं यत्तदेतद्वीरव्रतंमम ॥ ७७॥ वनस्पतिरसैर्दिव्यै र्दशांगैस्सुमनोहरैः ॥ धूपंसमर्पितंभूतनाथमर्पयतेमम ७८॥ अद्यप्रभृतिनश्यतुनिखिलास्तेचवासराः ॥ धूवंमदंतर्पयंतमेतद्वीरव्रतंमम ॥ ७९॥ द्वात्रिंशतुसंक्षिप्तं वर्त्तिकाभिमनोहरं ॥ दीपंघृतेनद्रव्येन दास्याभिस्मरवैरिणे ॥ ८०॥ इत्याचार्योसमयेनित्यं कृत्यं लेनप्रतिश्रुतं ॥ उपहारंमहारम्यं हरायपरमात्मने ॥ ८१॥ कालेतुवर्तमानेचकोलेभाविनिसर्वदा ॥ यदिवैविद्यमानोहमेतद्वीरव्रतंमम ॥ ८२॥ सुगंधकेतकीदलच्छायासममनोरमैः ॥ नागवल्लिदलेमिश्रं सुपूगफलपंचकं ॥ ८३॥ तांबूलमर्पयिष्याभिमत्यहंमृत्युमृत्यवे ॥ उपहारंमहारम्यं पंचभक्ष्यसमन्वितं ॥ ८४॥ नित्यंनित्यायदास्याभिसर्वदास्मरवैरिणे ॥ मदीयनशरीरेण नियमायमतःप

शै०र०
१३२

रं॥भविष्यतिविनादेवि एतद्वीरव्रतंमम॥८५॥रसवितिसुगंधीनिसुगंधीयानि
कानिच॥फलानिपंचभक्ष्याणिस्वादूनिप्रतिवासरं॥८६॥नैवेद्यार्पणवेलाया
मर्पयिष्यामिशंभवे॥सर्वंमत्प्राणपर्यंतमेतद्वीरव्रतंममं॥८७॥मनोज्ञरौ
प्यसौवर्णमेकपुष्पंपुरद्रूष॥श्रीपादपद्मयोःपूजासमयेप्रतिवासरं॥८८॥
अर्पयिष्यामिनियतायदिस्यात्तदसंभवं॥८९॥मिनेत्रमुसाटप्यचैतद्वीरव्र
तंमम॥९०॥ इत्यादिव्रतसंकल्पवीरव्रतविशेषकः॥केनापिवक्ष्यमाणेननि
यमानिचवासरेत॥९०॥ शिवरहस्ये॥ सदाकालंशिवभक्तिर्लिंगंजंगम
पूजनं॥एकपलिव्रतंचैवमहामाहेश्वरव्रतं॥९१॥शिवधर्मीशिवज्ञानीशि
वकर्मरतःसदा॥वीरशैवाभिषिक्तस्यापि छिद्रोष्ठिष्टैकभोजनः॥९२॥वातूलतंत्रे॥

यद्गृहे शुभविभा तिष्ठ

यद्गृहे शुभविभा ति ४

दीक्षाप्रकरणे॥ एकनिष्ठाव्रतशीलं द्वितीयं योनमन्यते॥ परिच्छेदकरं वीरमाहेश्वरमभीष्टदं॥१३॥ न ध्यायेन्न स्मरेदन्यं नयश्चेच्छृणुयान्न च। नवाक्यं नापि कुर्वीत जन्मांतरशतैरपि॥१४॥ यद्गृहे ष्वन्यदेवोस्ति तद्गृहाणि परित्यजेत्॥ यद्गृहे शिवनिंदास्ति तद्गृहा यत्राचार निंदास्ति तद्गृहाणि परित्यजेत्॥१५॥ यद्गृहे शिवनिंदास्ति तद्गृहाणि परित्यजेत्॥१६॥ शिवनिंदा णि परित्यजेत्॥ यत्राचारनिंदास्ति तद्गृहाणि परित्यजेत्॥ हंतव्यास्त्व विचारेण वीरमाहेश्वरव्रतैः॥१७॥ गुरोर्निंदा भक्तिनिंदा भवेद्यदि॥ हंतव्यास्त्व विचारेण वीरमाहेश्वरव्रतैः शिवनिं मातरः पितरश्चैव भ्रातरो बांधवस्तथा कलत्रभृत्यपुत्राश्च हंतव्याः शिवनिंदकाः॥१८॥ शिवनिंदाकरं वाक्यं श्रुत्वा तद्वक्त्र शिक्षणं। कुर्यादन्यत्र वा गच्छेदशक्तोपि इति श्रुतिः॥१९॥ शिवद्रव्यापहाराय प्रवृत्तो मनुजाधमः॥ ज्ञात्वा त

श्रीशिव

न्मरणं कृत्वा तद्द्रव्याणि समाहरेत् ॥१००॥ शिवभक्तस्य मरणं भविधाने दुरात्म
नि ॥ न कदाचिद्दयां कुर्यान्न मर्दनपरो भवेत् ॥१॥ शिवचिह्नं वृषं चापि हंति यो
दुर्जनो पुनः ॥ सहंतव्यः स्वहस्तेन वीरमाहेश्वरव्रते ॥२॥ शिवात्मविषयं किंचिदप
राधं कदाचन ॥ कस्याप्याचरतो द्रोहं ज्ञात्वा किंचिन्न मानयेत् ॥३॥ मातरः पि
तरश्चैव भ्रातरो बांधवस्तथा ॥ शिवकार्येषु वक्रास्ते हंतव्याः शीघ्रमेव ते ॥४॥ प
रं ज्योतिः परं रूपं मम माहेश्वरव्रतं ॥ मद्भक्तं मत्परित्यज्य स्वेच्छया वर्तते नरः ॥५॥ स
याति नरकं घोरं दशपूर्वे दशापरे ॥ व्रतभ्रष्टमुखं दृष्ट्वा त्वासने शयनेथवा सपंक्ति
भोजनं कृत्वा पतंति यमशासने ॥६॥ शिवरहस्ये ॥ देवद्रव्यं गुरुद्रव्यं चंडद्रव्यं त
थैव च ॥ भक्षयेन्नरकं याति ॥ पेक्षेत कुलक्षयः ॥७॥ गुरुद्रव्यं गणद्रव्यं मद्भक्तस्य च

मंदिरे॥अनुग्रहेणस्वीकार्यंभावाभावनिवर्तने॥८॥शिवनिंदागुरोर्निंदा।शिवज्ञान
स्यदूषणं॥देवद्रव्यापहरणंगुरुद्रव्यविनाशनं॥९॥हरंतियेचसंमूढाः।शिवज्ञानस्यपुस्तु
कं॥सुमहत्पातकान्याहुर्निरंतरफलानिषट्॥१०॥येत्यजंतिशिवाचारंशिवभक्तान्द्विषं
तिच॥शिवनिंदासमाहेतेमहांतःपातकोत्तमाः॥११॥आज्ञाभंगोर्थहरणंगुरोरप्रिय
वर्तनं॥गुरुद्रोहमितिप्राहुस्तत्संसर्गंपरित्यजेत्॥१२॥अ॥कामतोयथालिंगंवि
शीर्णपतितंभवेत्॥प्रायश्चित्तंनतत्रास्तिसत्यंसत्यंवरानने॥१३॥अस्यार्थोयच्छ
लात्कार्यमेदेपापमहत्तरं॥आयातेतेनकर्तव्यानप्रमादात्तुकर्हिचित्॥१४॥
लिंगबाह्योपजीवीचप्रतिलिंगप्रसादकः॥भुंजीतक्रिमिकीटंचजायतेमलज
न्मनि॥१५॥पुत्रकर्मविवाहादिसंबंधःशिवकर्मभिः॥कर्तव्यःशिवभक्तेनयथालो

शै०र॰
१३४

केस्वजातिभिः॥१६॥वायवीयसंहितायां॥यातुकन्यास्वपित्राद्यैः शिवधर्मेनियो
जिता१७॥साभक्तायप्रदातव्या नापरायविरोधिने॥१७॥त्तोर्दद्येत्प्रतिकूलायप्रमादा
द्वाथयेत्पति॥अशक्तौतंपरित्यज्यमनाधर्ममाचरेत्॥१८॥देवतार्थंतुपचनंयेषांसंततान
र्थंचमैथुनं॥स्वर्गार्थंजीवितंतेषांनरकार्थंविपर्यये॥१९॥चर्मपात्रेजलंतैलंनग्राह्यं
भक्तवत्सले॥गृह्णतेयदिभक्तेनरौरवंनरकंव्रजेत्॥२०॥अमेध्यादिरसाज्जातंमक्षि
कासंचितंमधु॥तस्यैवमदपानस्यसुरादोषोनविद्यते॥२१॥विषकंटकशास्त्राणिदि
श्वानमार्जालकुक्कुटाः॥नतेषांग्रहणंकार्यमनर्थविरतिस्मृताः॥२२॥पंचाक्षरो
पदेशीचनरस्तुतिकरोयदि॥सोलिंगीसदुराचारीकुकविःसतुविश्रुतः॥२३॥बहु
लिंगबहुमंत्रंबहुभाषाबहुर्गुरुः॥बहुचित्तंबहुभावोभविनोभवबंधनं॥२४॥भ

भविनाशायनाद्यानांसंपर्कात्सहभोजनात्तु॥संचरंतिमहाघोरेनरकेकालमक्षयः॥
॥२५॥सत्यंथक्षमादयाशौचंनियमामार्दवंतथा॥धर्माएकादशप्रोक्ताभक्तानांशुभ
लोछने॥२६॥कामभक्तिरतोकुर्यात्क्रोधंचाधर्मकर्मणि॥लोभंशिवार्चनेकुर्यान्मो
हंभक्तजनेषुच॥मात्सर्यंकरणेष्वेवमदंमायापराङ्मुखं॥२७॥ ॥इतिश्रीवरत्ना
करेआचारस्थलंसप्तदशोध्यायः॥३७॥ ॥लिंगांकिततनुप्राणलिंगजीवंतुजीव
नं॥लिंगतत्वपरिज्ञानंप्राणलिंगस्थलंभवेत्॥१॥वायुप्राणगुदंत्यक्ता लिंगप्राणस
मा हितपुण्यपापभयंनास्तिप्राणलिंगस्थलंभवेत्॥२॥प्राणायस्यविलीयंतेपर
मात्मनिशांकरे॥सप्राणलिंगसंबंधीनिषकेवलमानवः॥३॥यद्देहेस्थापितेलिं
गंतत्प्राणेतुप्रतिष्ठितं॥प्राणलिंगस्यसायुज्यंप्राण।लिंगमितिस्मृतं॥प्राणेनप्रा

शै०र० ३३५ णनिर्देशः प्राणभावं परित्यजेत् ॥ प्राणलिंगं प्रतिष्ठाप्य लिंगप्राणमिदं स्मृतं ॥ ५ ॥
प्रसंस्कारी च यः प्राणस्तत्प्राणो जड एव च ॥ ५ ॥ संस्कार लिंगनिर्देशी लिंगप्राणो वि
निर्दिशेत् ॥ प्राणशब्दं परित्यज्य लिंगशब्द प्रतिष्ठितः ॥ ६ ॥ लिंगनिर्देशनि
रतो लिंगप्राण इति स्मृतः ॥ प्राणलिंगे प्रतिष्ठाप्य तत्प्राणः कुत्र वर्तते ॥ ७ ॥ त
त्प्रभेदं न जानाति सोपि लिंगं न पूजयेत् ॥ निर्देशं प्राणलिंगस्य इष्टलिंगं न प
श्यति ॥ ८ ॥ लिं० ॥ द्वेषपियमूढो लिंगाचारं न पश्यति ॥ लिंगं च प्राणवद्ग्राह्यं प्र
सादग्राहिणी तनुः ॥ ९ ॥ येन मेन हि मंतव्यं लिंगसारोत्करी हशी अनिद्रः क्षुत्तृषा
लस्य काम क्रोधादि वर्जितः ॥ १० ॥ लिंगप्रसाद लिंगी स्या लिंगसारपरायणः ॥ स
तत्र प्राणलिंगे च लिंगसंकर एव च ॥ ११ ॥ प्रसादसंकरश्चैव गणत्वेन न युज्यते ॥

मत्प्रसादं प्राणलिंगस्य यो भुंक्ते लिंगवर्जितः ॥ सोऽश्वमांसं सरुधिरं सादरं भक्षितो भवे
त् ॥ प्राणलिंगसमायुक्तः परहस्तसमर्पितं ॥ १३ ॥ गुरुवाक्याद्दासनि भुंजीयात्कि
ल्बिषं भवेत् ॥ प्राणलिंगं परित्यज्य योऽन्यलिंगमुपासते ॥ १४ ॥ स नरो नरकं याति
यावच्चंद्रदिवाकरौ ॥ प्राणलिंगमविश्वस्य तीर्थलिंगं तु विश्वसेत् ॥ १५ ॥ स नरः स्वर्ग
माप्नोति गणत्वेन न युज्यते ॥ १५ ॥ कीर्तयेत्प्राणलिंगं च त्वन्यलिंगं न कीर्तयेत् ॥ अन्यालिं
गस्मरणमेन गणत्वेन प्रयुज्यते ॥ १६ ॥ प्राणलिंगसमायुक्तो नोपवासादिकं चरेत् ॥ मो
हाद्यद्याचरेत्तस्य प्रत्यवायो महान् भवेत् ॥ १७ ॥ प्राणत्यागे भये प्राप्ते चौरे भूतहरे ज
ले ॥ भ्रमप्रमादे प्रमादे च प्राणलिंगं न वर्जयेत् ॥ १८ ॥ प्राणलिंगेन विच्छिन्नो लिंग
प्राणं गमिष्यति ॥ परोक्षे प्राणसंत्यागे रौरवं नरकं व्रजेत् ॥ १९ ॥ शिवधर्मशास्त्रे ॥ लिं

शै॰र॰
३३६

लिंगाद्धस्तशतं यावच्छिवक्षेत्रं समंततः॥ देहिनां तत्र पंचत्वं शिवसायुज्यकारणं॥२०॥मानुषे स्थापिते लिंगे क्षेत्रमानमिदं स्मृतं॥स्वयंभुवे सहस्रं स्यादार्षे स्यात्तदर्धकं॥२१॥पापान्नरोपि पुरुषो मृतो गच्छेच्छिवं यतः॥तस्मादावसथं कृत्वा शिवक्षेत्रे समीपतः॥२२॥रहस्यं॥यः प्राणलिंगसंलग्नो लिंगप्राणी स युज्यते॥ शरीरदहनात्तस्य नरके कालमक्षयं॥२३॥यत्प्राणो लिंगनिक्षिप्तो निक्षिपेत्तं स लिंगकं॥तद्देहदहनाद्घोरं रौरवं नरकं व्रजेत्॥२४॥उत्तमो दहनं प्राप्नोति निक्षेपो मध्यमो भवेत्॥कनिष्ठो दाहमाप्नोति शिवभक्तो मृतो यदि॥२५॥दग्धस्य दहनं नास्ति पाकस्य पचनं तथा॥शिवाग्निदग्धदेहस्य न च श्राद्धं न च क्रिया॥२६॥ इति श्रीशैवरत्नाकरे प्राणलिंगस्थलं नाम अष्टादशोऽध्यायः१८॥ ॥जंगमस्थले

लं॥ जकारः कथ्यते चंद्रो मकारः सूर्य उच्यते॥ एकत्र गमयेदेतावितिजंगम इष्यते॥ १॥
निस्संगत्वं निराभारं निर्देहं निरुपाधिकं॥ निःसीमं निर्मलं चैव निरूपं जंगमस्थ
लं॥ २॥ वातूलतंत्रे॥ लिंगक्षेत्रे गुरुस्थानं गुरुक्षेत्रे च जंगमः॥ जंगमस्तु निराभा
री भाराभारनिवर्त्तकः॥ ३॥ शिवधर्मशास्त्रे॥ लिंगद्वयं समाख्यातं चरं चाचरमेव च॥
चरं चातिथिविख्यातमचरं पार्थिवादिकं॥ ४॥ चरे सदा वसत्येव भीतियुक्तो महेश्व
रः॥ अचरे मंत्रसंस्कारे स्वयं सत्सं सदाशिवः॥ ५॥ जटी मुंडी शिखी वापि भिक्षासी
त्रिगतस्पृहः॥ मौनी भूतानुकंपी च यतिः शांतगतिश्चरेत्॥ ६॥ जटाकलापधारी स्या
च्छपक्षं वपनं भवेत्॥ यद्देवपुण्यं जटिनां तत्पुण्यं वपनाद्भवेत्॥ ७॥ त्रिसंध्या
माचरेन्नित्यं भस्मस्नानं त्रिपुंड्रकं॥ पुत्रपुष्पफलैर्वन्ये जंगमो लिंगमर्चयेत्॥ ८॥

शै॰र॰
१३२७

सर्वभूतदयाधर्मकर्म शंकरपूजनं॥ नियमतो लयोयस्य एवं जानाति जंगमः॥ ९॥ स्थ
तिवर्णस्त्रिधर्मात्मा विचरेद्व्रतकर्षितः॥ सर्वलोकहितार्थाय शिवज्ञानी जितेंद्रि
यः॥ १०॥ माधुकरेण मार्गेण गृहस्तानंदकारकः॥ जंगमस्तु चरेद्भिक्षां यादृशी
यावतीमपि॥ ११॥ पंचासकासु भिक्षासु माधुकर्यान्नमुत्तमं॥ स्वसामयीकनि
र्दिष्टमाचरेद्व्रतनिश्चलः॥ १२॥ चरेन्माधुकरं भिक्षामप्येम्लेच्छकुलादपि॥ एका
न्नं तु न भुंजीत बृहस्पतिसमादपि॥ १३॥ माधुकरी चरेद्भिक्षामेकान्नपरिवर्ज
येत्॥ उपवासासरंभे क्षमेकान्नं गृहिणामलं॥ १४॥ यदा मध्याद्दानोपि भं
गः पुष्यं न बाधते॥ तथा माधूकरी भिक्षामादद्दीत गृहाधिपान्॥ १५॥ भक्तैर
पि च पूज्यास्युर्व्रतिनं शिवभिक्षुकाः॥ एभिर्विनाकृतान्यत्र सा पूजा निष्फला

जंगमेन विना देवि कर्माण्याचरते यदि। सो वनरके घोरे पुनश्चंडालजन्मनि॥३३

इष्टलिंगार्पितं शुद्धं स्वदेहस्यैव कारणं॥ गृहीतं जंगमात्सिद्धं चराचर निवर्तकं॥३४॥

मत्प्रसादिष्ट संयुक्तं योभुंक्ते जंगमं विना गुरुद्रोही शिवद्रोही भक्तद्रोही बहिष्कृतः॥

३५॥ तस्मात्कारणात् गृहीत्वा स्वगृहे भक्तः प्राणलिंगं च जंगमं॥ उच्चैः सिंहासने

भक्त्या स्थापयेद्भवनाशनं॥३६॥ वस्त्रभूषणगंधादिपुष्पशय्यादिपंचकं॥ वाहनाद्य

खिलं वस्तु तदुच्छिष्टं तु भोजयेत्॥३७॥ गृहे क्षेत्रं च धान्यं च गोकुलं महिषी तथा॥

जंगमेष्टं न दत्तश्चेत्प्रसादं निष्फलं भवेत्॥३८॥ विवाहे च प्रतिष्ठासु गुणसंकुलपर्व

णि॥ जंगमेष्टं विना भुक्तं प्रसादं निष्फलं भवेत्॥३९॥ तैलाभ्यंगोद्वर्तने च स्नानभो

जने मैथुनेः॥ जंगमेष्टं विना भुक्तं प्रसादं निष्फलं भवेत्॥४०॥ आसने शयने याने स

शै-र-
१३९

वंकर्मसुसर्वदा॥ असाक्षिणं चरंकृत्वारौरवंनरकंव्रजेत्॥ ४१॥ भोज्यलेह्यंचचोष्यंच
भुत्क्वाजंगमवर्जितं॥ आस्थिमलंसमश्नातिचंडालग्रहसंभवं॥ ४२॥ जंगमंप्राणलिं
गंचतन्निवेद्यंचभोजयेत्॥ पश्यंतिजंगमंयत्रतत्रकार्यानमस्क्रिया॥ ४३॥ जंगमे
लिंगमाख्यातस्तत्रैवाष्टविधार्चनं॥ तदाज्ञापालनंदेविममाज्ञापरिपालनं॥ ४४॥
इतिजंगमार्चनविधिः॥ शिवयोगीप्रकरणं॥ अथशिवयोगीश्वरः॥ शिवस्वभाव
येकेस्मिंकेस्यते निरुपाधिकः॥ तस्मिन्नेवमनोवृत्तिर्महायोगइहोच्यते॥ १॥ वायवीय
संहितायां॥ मदुक्तेनैवमार्गेण मय्येवस्थाप्यतेतसं॥ वृत्यंतरनिरोधाय सयोगइ
तिकथ्यते॥ २॥ वैराग्यज्ञानसंपन्नः शिवशांतेनतेजसा॥ युक्तःषडंगयोगेन शिव
योगीसकीर्तितः॥ ३॥ वातुलतंत्रे॥ शिवज्ञानंशिवेभक्तिः शिवमुद्राशिवव्रतं॥ शि

भवेत्॥१६॥गृहस्ता संविदातारस्तदर्हं इतरेषु नः॥परस्परमपेक्षंते पूज्यपूज
कभावतः॥१७॥अभक्तेभ्यो न गृण्हीयाद्भक्तेभ्यो यदि लभ्यते॥नवस्तुसं
ग्रहं कुर्याद्द्याद्वा तरे पुनः॥१८॥सुवर्णधान्यमनुरववस्तु वृध्युपजीव
नात्॥अतिवर्णो यदि चेरल्लोयं पातकिनां वराः॥२०॥जटीमुंडी शिखी वापिषंचेमुद्रे
कभूषितः॥प्रमादान्मैथुनं कृत्वा द्रोही न संशयः॥२१॥अलिंगी लिंगरूपेण यो लिं
गमुपजीवति॥स पच्यते महाघोरे नरके कालमक्षयं॥२२॥लिंगलांछनसंयुक्तो
धान्यवेषं न धारयेत्॥तन्दूषणेन सद्भक्तो रौरवे नरकं व्रजेत्॥२३॥स्थावरं चांग
दोषेण व्रतदोषेण जंगमः॥उभयोर्भिन्नलिंगयोर्नार्चनं नाभिवंदनं॥२४॥वातु
लतंत्रे॥सोहिं प्राणलिंगप्रतिग्राही प्राणजंगम एव च॥सोपि लभमवद्दश्यते प्राण

शै.र. ३३९

ण लिंगइतिस्मृतः॥ अस्मिन्नर्थे स्थावरं जंगमं चैव द्विविधं लिंगमुच्यते॥
जंगमस्यावमानेन स्थावरं निष्फलं भवेत्॥ २६॥ स्थावराराधनं पुण्यं जंगमा
राधनादिकं स्थावराणां सहस्रेभ्यो जंगमस्तु विशिष्यते॥ २७॥ कनिष्ठा मत्क्रिया
पूजा मध्यमं गुरुपूजनं॥ उत्तमा जंगमार्चा तु विशिष्टं समयर्चनं॥ २८॥ वातुल
तंत्रे॥ साहित्यं द्विविधं प्रोक्तं चराचरविभेदतः॥ प्रथमं चरसाहित्यं द्विती
यं चाचरं स्मृतं॥ २९॥ अतो न लिंगसाहित्यं चरसाहित्यवंचनात्॥ क्रमेण फल
दं लिंगं चरं साक्षात्फलप्रदं॥ ३०॥ लिंगसत्कृतिभागश्च साहित्यं जंगम
मस्य च॥ तदभावे महादेवि कुर्याल्लिंगस्य सत्कृतिः॥ ३१॥ स्वलिंगभज
नं देवि किं तु जंगमसंसदि॥ अत एव गुरुः साक्षाज्जंगमः प्रभुरीश्वरः॥ ३२॥

व लिंगार्चनज्ञ स्त्रि:शिवयोगा हि पंचधा ॥४॥ शिवयोगी शरीरेषु नित्यं सन्निहित:शि
व:॥ योगींद्रं पूजयेत्तस्मात्साक्षात्संपूजित:शिव:॥५॥ युगपत्पूजितास्तेन ब्रह्मावि
ष्णुमहेश्वरा:॥ पितर:सर्व देवाश्च येर्चये ॥ च्छिवयोगिन:॥६॥ सर्वेषामेव भूता
नामुत्तम:पुरुष:स्मृत:॥ पुरुषेभ्यो द्विजश्रेष्ठो द्विजेभ्योग्रंथपारगा:॥७॥ ग्रंथज्ञा
द्देहपुरुषस्तेभ्यस्तत्वार्थचिंतक:॥ नानात्व विदां मध्ये कृतबुद्धो विशिष्यते ॥८॥ कृ
तबुद्धो सहस्रेभ्यो विशिष्टो योगिन:स्मृत:॥ यो नेःगि कोटि कोटिभ्य:परमं शिव
योगिराट्॥९॥ सर्वयज्ञतपोदानकृत्ये दं तस्य यत्फलं ॥ तत्फलं लभते सर्वं संभो
ज्य शिवयोगिनं ॥१०॥ ध्यायमान:शिवयोगिया भुक्ते संकृतं यदि॥ तदा साक्षाच्छिवेनै
व तद्भुक्तमशनं भवेत्॥११॥ विमाणांवेदविदुषां कोटिसंभोज्य यत्फलं ॥ भिक्षामात्रप्र

शै॰र॰
१४०

दानेन तत्फलं शिवयोगिनः॥१२॥शिवयोगी गृहे यस्य भिक्षां गृह्णाति संस्कृतां॥कुल
मुत्तरयेत्तस्य नरकार्णवसंस्थितं॥१३॥शिवयोगिनमायांतं दृष्ट्वैव गृहसंस्थि
ताः॥क्रीडंत्योषधयः सर्वा यास्यामः स्वर्गमक्षयं॥१४॥पितॄनुद्दिश्य श्राद्धे भ्योया
जयेच्छिवयोगिनं॥स्वर्गच्छेदैश्वरं स्थानमेकविंशत्कुलान्वितः॥१५॥अपि नः स्व
कुलेकश्चिज्जनयेत्पुत्रमीदृशं॥यः संपूज्य शिवं श्राद्धे भोजयेच्छिवयोगिनं॥१६॥न
त्यंति पितरस्तुष्टा गायंति च पितामहाः॥अद्य नः पुत्रपौत्रो वा योगिनं भोजयिष्य
तः॥१७॥रूपान्वितं विरूपं वा मलिनं मलिनांबरं॥योगींद्रं शंकरं कयानि त्यं मतिथिं
नविचारयेत॥१८॥अस्य त्वमपि यद्दत्तं शिवज्ञानार्थवेदिने॥तन्महाप्रलयं यावद्वह्र
तुर्भोगाय कल्प्यते॥१९॥गंगास्नानादिकं पुण्यं दर्शनाच्छिवयोगिनं॥सर्वतो

र्थाभिषेकेभ्यो सेस्ते भाषणमुत्तमं॥ २०॥ मुच्यते सर्वपापेभ्यः प्रणम्य शिवयोगिनं॥
शुश्रूषया तितंभ त्त्या शिवलोके महीयते॥ २१॥ ज्ञानयोगरतं शांतं रोगार्त्तं शिव
योगिनं॥ यः करोति नरः स्वस्थं सर्वदानफलं लभेत्॥ २२॥ ये योगिनं द्विषं
त्यज्ञाः सर्वपापेष्ववस्थिताः॥ अधोमुखोर्ध्वपादास्ते पतंति नरकादिषु॥ २३॥ अ
थशरण्यलक्षणमुच्यते॥ वातुलतंत्रे॥ स्वयंपरंपरं नास्ति स्वदेहं निर्मलप्रभं॥ २४॥
स्वयं घरं परं स तत्वा निर्देशं परमेश्वरं॥ अद्वयं चाचलानंदं शरणस्थलमुत्तमं॥ २५॥
ज्ञातृज्ञानवि निर्मुक्तं सुज्ञानं निर्मलप्रभं॥ स्वानुभावार्थ निर्देशं शरणस्थलमुत्त
मं॥ २६॥ निर्मोहं च निरापेक्षं निर्देहं निरहंकृतिः॥ आत्मादिपप्रकाशं शरण
स्थलं मुत्तमं॥ २७॥ सुखदुःखभयं नास्ति पुण्यपापैर्न लिप्यते॥ न शीतं च न चोष्णं

च शरणस्छलमुत्तमं ॥२८॥ पतिर्लिंगं सती चाहमिति सुक्तः स्वयंप्रभुः ॥ प्राप्ते चिच सुखं ना
स्ति शरणस्छलमुत्तमं ॥२९॥ अनेनैव शरीरेण रुद्रः संतिष्ठते क्षितौ ॥ पापहा सर्वभूतानां
सल्लापाद्दर्शनादपि ॥३०॥ षड्भेयश्च षड्ङ्गो नास्ति चाष्टविधार्चनं ॥ निर्भावो निजलिं
गैक्यः शिखिकर्पुरयोगवत् ॥३१॥ ॥इति शैवरत्नाकरे शिवयोगीप्रकरणं नाम
एकोनविंशोध्यायः ॥१९॥ ॥पाराशरस्मृतौ ॥ तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ॥
द्वापरे यज्ञमेवाहुर्दानमेव कलौ युगे ॥१॥ अभिगम्यः कृते दानं त्रेतास्वाहूय दीयते ॥
द्वापरे याचमानाय कलौ सर्वाय दीयते ॥२॥ अभिगम्योत्तमं दानमाहूतं चैव मध्यमं ॥
अधमं याचमानं स्यात्सेवादानं तु निष्फलं ॥३॥ कृते त्वस्थिगताः प्राणास्त्रेता
यां मांसमाश्रिताः ॥ द्वापरे रुधिरं प्राणाः कलौ त्वन्नादिकास्थिताः ॥४॥ शिवरहस्ये ॥

भक्तः स्वजातियोगेन कर्मणा व्यवसायवान्॥ अतिथिप्रियकारी स्याद्दाता स वित्तानुसा
रतः॥ वित्ततृतीयभागेन प्रकुर्वीत शिवार्चनं॥ ६॥ कुर्वीत वा तदर्धेन यतो निःसं हि जी
वितं॥ चित्तं वित्तानुसारेण कदा कस्य भविष्यति॥ ७॥ ग्रासादर्धमपि ग्रासं युक्तं
दातुं तदर्थिने॥ कल्याणमित्रामायातमर्थिनं को न पूजयेत्॥ ८॥ दानतः स्वर्गमा
प्नोति कोऽन्यो बंधुरिहार्थिनः॥ प्रिये वाय दिवा द्वेष्यो मूर्खो वा पंडितोपि वा॥ १०॥ यो
दानकाले संप्राप्तः सोऽतिथिः स्वर्गसाधनः॥ न पृच्छेद्गोत्राचरणे न स्वाध्यायं च श्रुतं तथा॥
॥ ११॥ हृदये कल्पयेत्तस्मिन् सर्ववेदमयो हि सः॥ दूराद्वा पथविश्रांतो दानकाल उपस्थि
तः॥ १२॥ अतिथिं तं विजानीयान्नातिथिं पूर्वमागतं॥ नैकग्रामीणमतिथिमग्रही तु कदा
चन॥ १३॥ अनित्यश्चागतो यस्मात्तस्मादतिथिरुच्यते॥ अपूर्वः सद्व्रती विप्रो ह्यपूर्व

शै०र
१५२

मयतस्तथा ॥१४॥ विद्याभ्यासरतो नित्यं त्रयो पूर्वा दिने दिने ॥ ॐ ॥ अतिथिर्यस्य
भग्नाशो गृहात् प्रतिनिवर्तते ॥१५॥ स तस्य दुष्कृतं दत्वा पुण्यमादाय गच्छति ॥१५॥ अ
तिथिश्चापवादी च द्वावेतौ मम बांधवौ ॥ अतिथिः सुकृतं दत्वा पवादी दुष्कृतं मेव
तु ॥१६॥ स्वदेहाद्विशेषेण शिवभक्तांश्च पालयेत् ॥ भयदारिद्र्यरोगेषु तेषां
कुर्यात् प्रियाणि तु ॥१७॥ दारिद्र्यार्णवनिमग्नं हाहाभूतमचेतनं ॥ समुद्धृत्य यथा
शक्त्या सर्वान्कामानवाप्नुयात् ॥१८॥ पतितासुरसंपन्नाः कीर्णा चंडालादिश्व
पक्षिणां ॥ कारुण्यात् सर्वभूतानां देयमन्नं स्वशक्तितः ॥१९॥ यदि चामन्नं देयं स्या
त्संप्राप्ताया[र्थि]ने गृहं ॥ वाक्येन पि च नेष्टानि प्रियाण्यनुगतानि च ॥२०॥ प्रत्युत्था
नाभिगमने स्वागतं प्रियवादिनं ॥ आसनं चान्नपाने च मुक्तेः सोपानसप्तकं ॥२१॥

शिवधर्मशास्त्र॥ पात्रे देशे च काले च विधिना श्रद्धया च यत्॥ हुतं दत्तं कृतं चेष्टं तद
नंतफलं भवेत्॥२२॥ पात्रापात्रविवेकोऽस्ति धेन्वोः पन्नगयोरिव॥ तृणात्संजायते क्षी
रं क्षीरात्संजायते विषं॥२३॥ क्षांतिः स्पृहा दया दानं सत्यं शीलं तपः श्रुतं॥ एतदष्टां
गमित्युक्तं वरं पात्रस्य लक्षणं॥२४॥ किं चिद्वेदमयं पात्रं किंचित्पात्रं तपोमयं॥ आ
गमिष्यति यत्पात्रं तत्पात्रं तारयिष्यति॥२५॥ न्यायोपार्जितवित्तस्य द्वावेवानर्थकार
णं॥ अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनं॥२६॥ तद्यथा॥ आमपात्रे रसो यद्वन्न
श्यते सह भाजनः॥ दानमज्ञे तथा न्यस्तं सह पात्रेण नश्यति॥२६॥ तद्बीजमूषरे
यद्वद्वापितं निष्फलं भवेत्॥ भस्मनीव हुतं हव्यं यथा होतुस्तु निष्फलं॥२७॥ ज्ञा
नाग्निरहिते विप्रे तथा दानं निरर्थकं॥ तस्मात्सात्रं तमं ज्ञात्वा शिवभक्तमकल्म

शि॰र॰
१४३

षं॥२८॥तस्मैसर्वंप्रदातव्यमक्षयंफलमिच्छतां॥तस्यपात्रमहात्म्याद्दानमण्वपि
चाक्षयं॥२९॥तस्मात्तस्मैसदादेयमप्रमाणफलार्थिभिः॥सर्वेषामपिपात्राणाम
तिपात्रंमहेश्वरः॥३०॥पतनात्त्रायतेयस्मादतीवनरकार्णवे॥शिवभक्तःसदा
नंदश्वपचोपिममप्रियः॥३१॥नतस्मादधिकंकिंचिद्विद्यतेपात्रमुत्तमं॥असंय
तःसंयतोवासर्वावस्थांगतोपिवा॥३२॥योवाकोवाशिवेभक्तःशिववत्पात्रमुत्तमं॥
गुणवत्पात्रपूजायांवरंशासनपूजनं॥३३॥शासनंपूजयेत्तस्मादविचार्यशिवाज्ञ
या॥३४॥पात्रशासनयोर्मध्येशासनंतुविशिष्यते॥३४॥तस्माच्छासनमेवा
दौपूज्येयत्नादिवायथा॥तस्मात्पात्रतमंज्ञात्वाशिवभक्तमकल्मषं॥३५॥तस्मै
सर्वंप्रदातव्यमक्षयंफलमिच्छतां॥ वृ॥नाहंतथाद्मियजमानंहविर्वितानेश्च

स्मृतंपूतमिदंहुतभुङ्मुखेन ॥ यज्जंगमस्यमुखतस्यंश्वरतोनुघस्त्रः तृप्तःसम
द्यविहितेनिजकर्मपाके ॥३६॥ क्षीयंतेचवरारोहे तपोयज्ञक्रियादयः ॥ नक्षीय
तेवरारोहे शिववक्त्रे हुतंहविः ॥३७॥ शिवधर्मशास्त्रे ॥ नैवेद्यंपुरतंन्यस्तंदर्श
नात्स्वीकृतंमया ॥ रसान्मद्भक्तजिह्वाग्रादश्नामिकमलोद्भव ॥३८॥ यत्रभुंजी
तभस्मांगी मूर्खोवापतितोपिवा ॥ तत्रभुंक्तेमहादेवः सपत्नीकोवृषध्वजः ॥
॥३९॥ शिवस्यपरिपूर्णस्य किंनाम क्रियतेजनैः ॥ यत्कृतं शिवभक्तानांतच्छिवायकृ
तंभवेत् ॥४०॥ वायवीयसंहितायां ॥ नमेप्रियश्चतुर्वेदी मद्भक्तः श्वपचोपियः ॥ त
स्मैदेयंततोग्राह्यं सचपूज्योयथाह्यहं ॥४१॥ शिवभक्ताययद्दानं भक्त्यादत्तंयद
र्चितं ॥ तदहंचानुगृण्हामि तेनानंतंतदुच्यते ॥४२॥ श्वपचः शिवभक्तश्चेदुत्तमा

शै॰र॰ १५५

त्तमजन्मभाक्॥ तस्य कन्यादिदानेन दाता मद्देशजः शिवे॥ ४३॥ पात्रविवेकः॥
वाराणसी कुरुक्षेत्रं प्रयागः पुष्कराणि च॥ गंगासमुद्रसरयुनैमिषारण्यकंटकः॥
॥ ४४॥ श्रीपर्वतो महारण्यो गोकर्णो ब्रितवर्धनः॥ इत्याद्याः कीर्तिता देशाः सुरसि
द्धनिषेविताः॥ ४५॥ सर्वे शिवाः समाः पुण्याः सर्वनद्याः सपर्वताः॥ गोसिद्धमुनि
वासाश्च देशाः पुण्याः प्रकीर्तिताः॥ ४६॥ शिवायतनसंस्थाने यदल्पमपि दी
यते॥ तदनंतफलं ज्ञेयं शिवक्षेत्रानुभावतः॥ ४७॥ इति देशविवेकः॥ अथ काल
विवेकः॥ ग्रहणं चंद्रसूर्याभ्यां दक्षिणायनमुत्तमं॥ विषवं च व्यतीपातं षडशीति
मुखं तथा॥ ४८॥ दिनछिद्राणु संक्रांति ज्ञेयं विष्णुपदं तथा॥ इति कालः समाख्या
तः पुंसां पुण्यविवर्धनः॥ ४९॥ इति कालविवेकः॥ भक्तिभावः परां प्रीतिः शिव

धर्मे कृतानलः॥ मतिपक्तिरिति ज्ञेयाः साधुपर्यायवाचकाः॥ ५०॥ अथ दानप्रं०
सर्वेषामेव दानानामन्नदानं परं स्मृतं॥ सद्यः प्रीतिकरं नित्यं बलवृद्धि विवर्ध
नं॥ ५१॥ नान्नदानसमं दानं त्रिषु लोकेषु विद्यते॥ अन्नाद्भवंति भूतानि त
द्लाभे म्रियंति च॥ ५२॥ रक्तं मांसं वशास्थि कुक्रमादन्नात्सवर्तते॥ शुक्लाद्भवं
ति भूतानि तस्मादन्नमयं जगत्॥ ५३॥ हेमरत्नाश्वनागेंद्रैः नारीस्रक्चंदना
दिभिः॥ समस्तैरपि संप्राप्तैर्नारमंति बुभुक्षिताः॥ ५४॥ गर्भस्था जायमानाश्च
बालवृद्धाश्च मध्यमाः॥ आहारमभिकांक्षंति देवदानवतामसाः॥ ५५॥ क्षु
धा हि सर्वरोगाणां व्याधिः श्रेष्ठतमा स्मृता॥ तस्यान्नौषधलेपेन प्रतिकारः प्र
कीर्तितः॥ ५६॥ क्षुधापन्नगदष्टस्य विषदग्धस्य देहिनः॥ अन्नमौषधमन्ना

शे०र०
१४५
णांदातानि विषमेवच॥५७॥नास्तिक्षुधासमं दुःखं नास्तिरोगः क्षुधासमः॥ ना
स्त्याहारसमं सौख्यं नास्ति क्रोधसमं रिपुः॥५८॥अतएवमक्षुण्यमन्नदानमदा
नतः॥यतःक्षुधाद्धि संततप्ताम्रीयंतेसर्वदेहिनः॥५९॥अन्नदःप्राणदःसर्वमिहामु
त्रफलभवेत्॥यस्यान्नदानपुष्टांगः कुरुतेपुण्यसंचयं॥६०॥अन्नदातुस्तस्या
र्धं निश्चितं हिनसंशयः॥धर्मार्थकाममोक्षाणां देहःपरमसाधनं॥६१॥स्थितिस्त
न्नपानाभ्यामतस्तत्सर्वसाधनं॥अन्नंपितामहःसाक्षादन्नं विष्णुःशिवःस्वयं॥
॥६२॥तस्मादन्नसमंदानं न भूतनभविष्यति॥आहारदानार्जितपुण्यपा - दी
र्घायुरारोग्ययुतःसुखानां॥६३॥ स्त्रीणांसुराणांचमहागुणानां स्वामीभवेत्सिद्धि
वधूवरश्च॥६३॥त्रयाणामपिलोकानामुदकं जीवनं स्मृतं॥पवित्रममृतं दिव्यंशुद्धं

सर्वरसाश्रयं॥ मीनकर्कटयोर्मध्येयावच्चरतिभास्करः॥ फलमेकं तु तोयानां सुवर्णकोटिरुच्यते॥ ६४॥ अरण्ये निर्जने यत्र देशे तोयविवर्जिते॥ जलदानं तु षार्तानां पुण्यसंख्यान विद्यते॥ ६५॥ भुदायमादायहरः प्रसन्नो भूदेवरूपेन गुणाधिकेन॥ ददाति तस्मै सुरलोकवासं तस्मिन्समाप्ते भुवि भूमिराज्याः॥ ६६॥ भक्तेभ्यः स्वनदत्तानि भ्रातृपुत्रेण भार्यया॥ मात्रा पित्रा च दत्तानि पुण्यक्षेत्राण्युपद्रवं॥ ६७॥ पितृव्यैर्मातुलैः रन्यैर्मान्यैर्दातानि यानि च॥ स्वदत्ताधिकपुण्यानि पूर्वदत्तानि पार्थिवैः॥ ६८॥ ये पालयंति भूतानां लोकपालासमा हिते॥ पक्वो लिंगार्षके दत्वा भूमिंगोपदमात्रकः॥ ६९॥ भूलोकाधिपतिर्भूत्वा शिवेन सह मोदते॥ स्वदत्ताद्विगुणं पुण्यं परदत्तानुपालनं॥ ७०॥ पूरदत्तापहारेण स्वदत्तं निष्फलं भवेत्॥ स्वदत्तापर

दत्तांवायोहरेतिवसुंधरां ॥७१॥ षष्टिवर्षसहस्राणि विष्टायां जायते क्रिमिः ॥ योहरेद
वनिंभक्ते दत्तांस्वेनपरेणवा ॥७२॥ हरोरिमिर्धनं तेषांपुरं देशंचहारयेत् ॥ विंध्याटवी
षुतोयासुशुष्ककोटरवाशिनः ॥७३॥ कृष्णवरवाःप्रजायंते भक्तदत्तापहारकाः ॥
नहरेद्वसुधां विप्रे दत्तंभूयफलामपि ॥७४॥ गुणतारुण्यरूपाढ्यां भुक्ताभोज्यामि
वात्मजां ॥ एकैवभगिनीलोके सर्वेषामेवभूभृतां ॥७५॥ नभोग्यानरकग्राह्या वि
प्रदत्तावसुंधरा ॥ भक्तक्षेत्रमुखंबध्वा निम्नं कष्यंपुरस्थितं ॥७६॥ कुल्यायाःप
रतोनेतास्वामीगंतायमांतिकं ॥ भक्तक्षेत्रप्रसंगेतु नराणामुपकारिणां ॥७७॥
पुण्यानांपितरः पुण्याभवंतिस्वर्गसमुखाः ॥७७॥ गृहदानंतुयःकुर्याद्गृहोपक
रणान्वितं ॥ बंधुपुत्रसुतोराज्यमहद्द्रव्यपतिर्भवेत् ॥७८॥ संस्कृत्यलिंगार्चकेदत्वा

सुवर्णं चाणुमात्रं के देवेभ्यः पूज्यते सम्यग्गणमुख्यो गणेश्वरैः॥ ७९॥ सकृल्लिंगार्चके
दत्वा वस्त्रमात्रं यदृच्छया। एककुलं लभेद्राज्यं शिवसायुज्यमाप्नुयात्॥ ८०॥ सकृल्लिंगार्च
के दत्वा धेनुं बहुपयोधरां॥ रुद्रलोके तु वसति यावद्रोमाणि तत्पशोः॥ ८१॥ फलमूला
नि भक्ष्याणि शाकानि विविधानि च॥ सकृल्लिंगार्चके दत्वा शिवलोके महीयते॥ ८२॥ क्रमु
कं नागरं पत्रं चूर्णं कर्पूरमिश्रितं॥ सकृल्लिंगार्चके दत्वा इहामुत्र सुखी भवेत्॥ ८३॥
यथा सुराणां सर्वेषां परमः परमेश्वरः॥ तथैव सर्वदानानां विद्यादानं परं स्मृतं॥ ८४॥
धर्मार्थकाममोक्षाणामारोग्यं साधनं यतः॥ तस्मादारोग्यदानेन दत्तं चास्याच्चतुष्ट
यं॥ ८५॥ आकाशस्य यथा नार्थं सुरैरप्युपलभ्यते॥ दत्वादारोग्यदानस्य नांतं संवि
द्यते क्वचित्॥ ८६॥ यो दद्याच्छिवभक्तानामुपानत्काष्टपादुके॥ सवराश्वेन तया

गो.र.
२४७

नेनसुखंयातिशिवंपदं॥८७॥छत्रदानेनगच्छंतियथाछत्रेणदेहिनः॥शिबिका
संप्रदानेनतद्वद्देवसुखंव्रजेत्॥८८॥शय्यासनप्रदानेनपुष्पारामप्रदायकः॥
देवायतनकर्त्ताचयतीनामाश्रमस्यच॥८९॥अनाथमंटपानांचकर्त्तायातिग्र
होत्तमे॥देवाग्निगुरुविप्राणांमातापित्रोश्चपूजकाः॥९०॥पूज्यमानानरायांतिका
मिकेनयथासुखं॥द्योतयंतिदिशःसर्वायांतिदीपप्रदायिनः॥९१॥विश्राम्यमाण
गच्छंतिगुरुशुश्रूषणेरताः॥यद्यदिष्टंसमुत्कृष्टंन्यायप्राप्तंचयद्भवेत्॥९२॥भक्त्या
यतनिवेद्यंस्याद्गत्यांतंनिवेद्यंस्याद्गत्यानंतफलार्थिभिः॥९३॥यद्यदात्महितं
लोकेतत्तद्द्रव्यमवंचयन्॥९३॥तत्तद्गुणवतेदेयंफलमक्षय्यमिच्छता॥द्वाविमौपु
रुषौलोकेस्वर्गस्योपरितिष्ठतः॥९४॥दुर्भिक्षेचान्नदानेचसुभिक्षेचहिरण्य

रः॥ अपहृत्य परस्यार्थान्यपरेभ्यः प्रयच्छति॥९५॥ सनरो नरकं याति यस्यार्थ
स्तस्य तत्फलं॥ अनित्यानि शरीराणि विभवे नैव शाश्वतः॥९६॥ नित्यं संनिहितो
मृत्युः कर्त्तव्यो धर्मसंग्रहः॥ अटन्नपि महीं कृत्स्नां विशन्नपि रसातलं॥९७॥
उत्पतन्नपि वाकाशं नादत्तमुपतिष्ठति॥ यस्मिन्काले च देशे च वयसा या दृ
शेन च॥९८॥ कृतं शुभाशुभं कर्म तत्तथा तेन भज्यते॥ गृहादर्था निवर्तंते श्म
शाना मित्रबांधवाः॥९९॥ सुकृतं दुष्कृतं चैव गच्छंतमनुगच्छति॥ अनुकूले विदो द
देयं यतः पुर इताचसः॥१००॥ प्रतिकूले न दातव्यं यतः सर्वं हरिष्यति॥ न्यायोपार्जि
तवित्तस्य त्यागएवाहिरक्षणं॥१॥ तडागोदर संस्थानां परिवाह इवांभसां॥ दानं भो
गोनाश स्तिस्रो गतयो भवंति वित्तस्य यो न ददाति न भुंक्ते तस्य कृतीया गतिर्भव

श्रीशिव

शो.र.
१४८

ति॥२॥एकेनतिष्ठताधस्ताद्हस्तेनापरिनीला॥दातृयाचकयोर्भेदःकराभ्यामेवसूचितः॥
॥३॥द्वारंद्वारमटंत्येतेभिक्षुकाःपात्रपाणयः॥दर्शयंतीवलोकानामदातुःफलमीदृ
शं॥४॥दृढध्रुमनिशंभुङ्क्ष्वामाभूतकृपणाजनाः॥भाग्यक्षयेणक्षीयंतेनोपभोगे
नसंपदः॥५॥तद्यथा॥भवंतिनम्रास्तरवःफलोद्गमैर्नवांबुभिर्भूरिविलंबिनो
घनाः॥६॥अनुद्धताःसत्पुरुषाःसमृद्धिभिःस्वभावएवैषपरोपकारिणां॥६॥
पिबंतिनद्यःस्वयमेवनांभःस्वादंतिनःस्वादुफलानिवृक्षाः॥वसुंधरानकचि
दतिसंस्यंपरोपकारायसतांविभूतिः॥७॥दयामन्यस्यकुर्वंतिस्वयंतिष्ठतिचातपे॥
फलंतिचपरार्थायनात्महेतोर्महाद्रुमाः॥८॥स्वयमापद्गतोस्यन्यकृशंनुदतिस
ज्जनाः॥इंदुस्तमोनुदत्येवराहुग्रस्तेतरैःकरैः॥९॥किमत्रचित्रंयत्संतःपरानुग्रह

तसरः॥न हि स्वदेहशैत्याय जायंते चंदनद्रुमाः॥१०॥संपदो जलतरंगविलोला
यौवनं चतुराणि दिनानि॥शारदाभ्रपरिमलवमायुः किं धनैः परहिता निकुरुध्व॥
११॥धर्मस्यादितिवासुकीर्तिरितिवा प्रोक्तं प्रियेणेतिवा शिष्टानुष्ठितमंजसेद
मितिवास्यान्मे प्रतिष्ठेतिवा॥ऐश्वर्यस्य फलं किमन्यदितिवा लोके मतोस्मीति
वा वित्तं मे पहरेन्नृपादिरितिवा दानं विधेयं शुभं॥१२॥ ॥इति श्रीवररत्नाकरेव
न्हयाचंद्रपुष्करणिनाम विंशोध्यायः॥२०॥ ॥लिंगे॥ शिवभक्ता महोत्साहाः
शिवार्चनपरायणाः॥संयता धर्मसंपन्नाः शिवाः सर्वार्थसाधकाः॥१॥ सर्वद्वं
द्वसहा धीरा नित्यमुद्युक्तचेतसः॥परोपकारनिरता गुरुशुश्रूषणे रताः॥२॥ आर्
जवामृदवस्वच्छा अनुकूलाः प्रियंवदाः॥शांता स्मितमुखा भद्रा नित्यं स्वागतवा

दिनः ॥३॥ अल्पवाचः सुवक्तारः शूरास्त्यागविशारदाः ॥ अमानिनो बुद्धिमन्तस्सत्क
स्पर्द्धागतास्पृहाः ॥४॥ शौचाचारसमायुक्ता दयादाक्षिण्यगोचराः ॥ दंभमात्सर्य
निर्मुक्ता यथातथ्याभिभाषिणः ॥५॥ संविभागपराः प्राज्ञा ह्यशठाश्चाप्यकुत्सिताः ॥
न दीना नापि मलिना न चैवेन्द्रियवशानुगाः ॥६॥ भवंतिमतात्मानः सुशिष्यास्सा
धुसेविनः ॥ न पादपाणिवाक्चक्षुश्श्रोत्रशिश्नवशानुगाः ॥७॥ चापलानि न कुर्वंति
सर्वव्यासंगवर्जिताः ॥ एकांतभक्तिमास्थाय गुणेष्वेतेषु वर्तिनः ॥८॥ पूजनीया शिव
नित्यं परापरविभूतये ॥ तात्पर्यं संग्रहे येरुद्र लोकादवतीर्य रुद्रा मानुष्यमास्था
य जगद्धिताय ॥ चरंति नानाविधचारुश्चेष्टास्तेभ्यो नमस्त्र्यंबकपूजकेभ्यः ॥९॥
नमो विश्वेशभक्तेभ्यस्तेभ्य एव नमो नमः ॥ अभावे शिवभक्तानां विश्वेशाय नमो

नमः॥१०॥ ध्यालोकव्या विषमवयना विद्रुमा ताम्र भाजाया। मिश्राज टिल शिर
सिश्चंदू लेखावतंसाः॥११॥ निसानंदा नियतलु लिता स्निग्धकल्माषकंठा देवा
रुद्रा धृतपरशवस्तेभ विध्यंतिभक्ताः॥१२॥ नादश्शून्यः शरण्या मेसे वमाग मि
कंवचः॥ इत्युदीरयति प्रायो भक्त एव शिवस्वयं॥१२॥ चंडालः श्वपचागारे लिंग
तिष्ठन्महेश्वरः॥ इत्याचष्टे विशेषेण भक्त एव शिवस्वयं॥१३॥ स्वर्गे वाप्यथ
पाताले करस्थाः सर्वसिद्धयः॥ यस्यस्वेच्छागतिर्मुक्तेः सा यसोमेश्वरो जनः॥१४॥
उपवीतसहस्तेभ्यो ब्रह्मचारी विशिष्यते॥ ब्रह्मचारीसहस्त्रेभ्यो वेदाध्यायी वि
शिष्यते॥१५॥ वेदाध्यायीसहस्त्रेभ्यो ह्याग्निहोत्री विशिष्यते॥ अग्निहोत्रिस
हस्त्रेभ्यो यज्ञयाजी विशिष्यते॥१६॥ यज्ञयाजी सहस्त्रेभ्यः सत्रयाजी विशिष्यते॥

शौ॰र॰
१५०

सत्रयाजीसहस्रेभ्यो सर्वविद्यार्थपारगः ॥ सर्वविद्यार्थविल्कोट्याः । शिवभक्तिर्विशिष्यते ॥१७॥ यस्मिन्कस्मिन् शिवभक्तो भूतिशासनसंयुतः ॥ तत्र स्त्रियो जनं गंगाप्रभावाच्चासनत्सदे ॥१८॥ श्वपचोवाधमोवापि मूर्खो वापंडितोपि वा ॥ यस्मिन्देशे वसेन्नित्यं भूतिशासनसंयुतः ॥१९॥ यस्मिन् सदा शिवः सोमः सर्वभूतगणैर्वृतः ॥ सर्वतीर्थैश्च तीर्थज्ञः सान्निध्यं कुरुते सदा ॥२०॥ शिवरहस्य ॥ अष्टादशानां वर्णानां श्रेष्ठा माहेश्वरा जनाः ॥ पूतस्तत्रीयदेशोपि किंपुनस्तस्य बांधवाः ॥२१॥ शिवभक्तो वसेद्यत्र ग्रामे वा नगरेपि वा ॥ न तत्र क्षुत्पिपासाद्या दुर्भिक्षा व्याधयोपि च ॥२२॥ चंडालवाटिकायां वा शिवभक्तस्थितो यदि ॥ तत्क्षेणिः शिवकस्य यस्यात तद्गृहं शिवमंदिरं ॥२३॥ कीकटेष्वपि देशेषु

यत्र माहेश्वरो जनः॥ मनाकृपय पन्नो पिवसेत्काशीक्षेत्रसमं तत् ॥ २४॥ ना
हं वसाम्म कैलासन मेरौ न च मंदिरे ॥ मद्भक्ता यत्र तिष्ठंति तत्र तिष्ठामि पा
र्वति॥ २५॥ यस्मिन् क्षेत्रे शिवो नास्ति नास्ति माहेश्वरो जनः॥ तत्र स्थानं
न कर्त्तव्यं विध्यं नरवनांतरं॥ २६॥ यमो लोक भयं नास्ति संसारश्च भयं नच॥
मम भक्तस्य माहात्म्यं देवि किं कथयामि ते॥ २७॥ स्कांदे॥ सर्वाचार विहीनोपि
सर्वाश्रय विवर्जितः॥ भक्तिलेश युतस्कंद मत्प्रियो नगुणाधिकः॥ २८॥ यदिपा
परतः क्रूरः स्वाश्रमाचार वर्जितः॥ मम भक्तोयदि भवेन्माननीयः सदैव
हि॥ २९॥ पातके समनुप्राप्ते शिवभक्तस्य हं व्रजेत्॥ याचयेदन्नममृतं त
द्भावे जलं पिबेत्॥ ३०॥ सुदूरमपिगंतव्यं यत्र माहेश्वरो जनः॥ प्रयत्नेना

शि.र.
३५३

पितृ ध्वस्त त्रस न्नि हितो हरः॥७३॥ उपपातककोटिश्च ब्रह्महत्यायुतानि
च॥रहस्य पयापानि शिवभक्तस्य दर्शनात्॥७२॥ विष्णुनारदसंवादे॥
दर्शनाच्छिवभक्तानां सकृत्संभाषणादपि॥ अतिरात्रस्य यज्ञस्य फ
लं भवति नारद॥७३॥ शिवभक्तं सकृन्निंदे द्योजनः पापकर्मकृत्॥
युगकोटि क्रिमिर्भूत्वा विष्टायां जायते पुनः॥७४॥ सूकरः कोटिजन्मा
नि जायते शतकोटिशः॥ मृगश्च कोटिजन्मानि श्रृगालः कोटिजन्मसु॥
अंधस्यात्कोटिजन्मानि कुब्जस्यात्कोटिजन्मसु॥ पंगुश्च शतजन्मानि
पाषंडी जायते व्रत॥ उलुको वायसो गृध्रः सर्पः सूकरगार्दभाः॥७६॥ जा
यते म्रियते चैव निष्कृतिर्न विधीयते॥ मद्भक्तद्वेषिवामोहादपराध्य

तिचाधमः॥ ३७॥ नसहे तं दुरात्मानं सहे मप्यपराधिनं॥ मद्भक्तरक्षणायैव मम सर्वं हि चेष्टितं॥ ३८॥ इति जानीत मद्भक्ताः प्राणेभ्योपि गरीयसः॥ ३९॥ यइदं श्रुणुयान्नित्यं शिवस्य पुरतः सदा॥ ३०॥ स विधुयाखिलापाप्ति शिवसाधर्म्यमाप्नुयात्॥ ४०॥ पुराणज्ञाय शांताय भूमिं दद्याद्विचक्षणः॥ तदला मे तु गो दद्याद्धेमूल्यं चैव भक्तितः॥ ४१॥ भूषणानि च वस्त्राणि दद्याद्भक्तिसमन्वितः॥ भूषणानि च वस्त्राणि दद्याद्भक्तिसमन्वितः॥ ४२॥ मद्भक्ता न विनश्यंति मद्भइति कल्मसाः॥ ४२॥ आंदावेव प तिज्ञातं न मे भक्तिमणस्यति॥ ४३॥ ॥ इति शिवरत्नाकरे महेश्वर महात्म्यं नाम ऐकविंशोध्यायः॥ २३॥ श्रीकृष्णार्पणमस्तु श्री शिवार्पणमस्तु श्रीराम जयराम जय जयराम॥ श्री

श्री शैवरत्नाकरं संपूर्णं भवतु ॥ श्री